Government Oriental Library Series

Edited by the Pandits under the Supervision of the Curator,
Government Oriental Library, Mysore.

Bibliotheca Sanskrita No. 45

स्मृतिचन्द्रिका

श्रीयाज्ञिकदेवणभट्टोपाध्यायरचिता

व्यवहारकाण्डस्तृतीयः

तत्र प्रथमपरिच्छेदः

SMRITICHANDRIKA

BY

DEVANA-BHATTA

EDITED BY

L. SRINIVASACHARYA

Pandit, Govt. Oriental Library, Mysore

III. VYAVAHARA KANDA
Part I

PUBLISHED UNDER THE AUTHORITY OF THE
GOVERNMENT OF HIS HIGHNESS THE
MAHARAJA OF MYSORE

MYSORE:
PRINTED AT THE GOVERNMENT BRANCH PRESS
1914

Rs. 2—0—0

Government Oriental Library Series

EDITED BY PANDITS UNDER THE SUPERVISION OF THE CURATOR, GOVT. ORIENTAL LIBRARY, MYSORE

Bibliotheca Sanskrita No. 45

स्मृतिचन्द्रिका

श्रीयाज्ञिकदेवणभट्टोपाध्यायरचिता

व्यवहारकाण्डस्तृतीयः

तत्र प्रथमपरिच्छेदः

SMRITICHANDRIKA

BY

DEVANA-BHATTA

EDITED BY

L. SRINIVASACHARYA
Pandit, Govt. Oriental Library, Mysore

III. VYAVAHARA KANDA
Part I

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJA OF MYSORE

MYSORE:

PRINTED AT THE GOVERNMENT BRANCH PRESS

1914

NOTE

The following manuscripts have been used for editing this Volume :—

(1) A paper manuscript belonging to the Adyar Library.

(2) A palm-leaf manuscript belonging to the Adyar Library.

(3) Two palm-leaf manuscripts Nos. 3884 and 466 of the Government Oriental Library, Mysore.

(4) A palm-leaf manuscript belonging to Pandit Srisailam Tatacharya of Conjeeveram.

27-7-14. A.M.S.

स्मृतिचन्द्रिकायां व्यवहारकाण्डे
प्रथमपरिच्छेदविषयाः.

विषयसंख्या. पुटसंख्या.

विषयसंख्या.		पुटसंख्या.

व्यवहारकाण्डे प्रथमपरिच्छेदे

अशुद्धसंशोधनम्.

पुटे	पङ्क्तौ	अशुद्धम्	शुद्धम्
32	10	च्छिनत्तीति	छिनत्तीति
,,	17	धार्मिकन्	धार्मिकान्
41	5	याेग्य	योग्य
,,	15	सिद्ध	सिद्धय
80	8	प्रतिज्ञावाद:	प्रतिज्ञापादः
90	5	भेद	छेद
160	21	धनागम	धनागमः
251	10	अङ्गीनां	अङ्गानां

॥ श्रीः ॥

स्मृतिचन्द्रिकायां

व्यवहारकाण्डः.

इदानीं व्यवहारकाण्डमारभ्यते—तत्रादौ व्यवहारस्वरूपं निरूप्यते। तत्र बृहस्पतिः—

धर्मप्रधानाः पुरुषाः पूर्वमासन्नहिंसकाः।
लोभद्वेषाभिभूतानां व्यवहारः प्रकीर्तितः॥

अस्यार्थो नारदेन विवृतः—

धर्मैकतानाः पुरुषाः यदाऽऽसन् सत्यवादिनः।
तदा न व्यवहारोऽभून्न द्वेषो नापि मत्सरः॥
नष्टे धर्मे मनुष्याणां व्यवहारः प्रकीर्तितः।

इति। मनुष्याणां ऋणादानादिविषयका विवादा व्यवहारः प्रकीर्तित इत्यर्थः। तथा च कात्यायनः—

प्रयत्नसाध्ये विच्छिन्ने धर्माख्ये न्यायविस्तरे।
साध्यमूलस्तु यो वादो व्यवहारस्स उच्यते॥

अयमर्थः—'सम्यग्भाषणाहिंसननिमित्तम्' इत्यादिप्रयत्नसाध्ये धर्माख्ये पदार्थे लोभद्वेषादिवशाद्विच्छिन्ने सति यत्र ऋणा

दानादौ साधनप्राप्त्यर्थं समयधर्मादौ च परधर्मवर्जनार्थं न्यायविस्तरणं क्रियते, तत्र साध्यमूलो यो मनुष्याणां विवादः स व्यवहार उच्यते इति। अत एव हारीतः—

स्वधनस्य यथा प्राप्तिः परधर्मस्य वर्जनम्।
न्यायेन क्रियते यत्र व्यवहारस्स उच्यते—

धनापह्नवविवादः पाषण्डादीनां स्वधर्मसमयविवादोपि व्यवहार इत्यर्थः। न चैवं चौर्यपारुष्यादिविवादो न व्यवहार इति शङ्कनीयम्। यत आह याज्ञवल्क्यः—

स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत्॥

इति। कात्यायनोपि—

शिष्यं क्रोधेन हन्याच्चेदाचार्यो लतया विना।
येनात्यर्थं भवेत्पीडा वादस्स्याच्छिष्यतः पितुः॥

बृहस्पतिरपि—

प्रयच्छेच्चेद्भृतिं स्वामी भृत्यानां कर्म कुर्वताम्।
न कुर्वन्ति च भृत्याश्चेत्तत्र वादः प्रवर्तते॥
हिंसां वा कुरुते कश्चिद्देयं वा न प्रयच्छति।
द्वे हि स्थाने विवादस्य तयोर्बहुतरा गतिः॥

उशनाऽपि—

कार्यमुद्दिश्य यत्किञ्चित्स्वच्चिद्राज्ञे निवेदयेत्।
पदं तदष्टादशधा विवादानां प्रकीर्तितम्॥

एवञ्चाष्टादशविधविषयाणामन्यतमाविषयको विवादो व्यवहार इति याज्ञवल्क्यादिवचनानामार्थिकोऽर्थः प्रत्येतव्यः । अत एव नारदः—

ऋणादानं ह्युपनिधिः सम्भूयोत्थानमेव च ।
दत्तस्य पुनरादानमशुश्रूषाऽभ्युपेत्य च ॥
वेतनस्यानपाकर्म तथैवास्वामिविक्रयः ।
विक्रीयासम्प्रदानं च क्रीत्वाऽनुशय एव च ॥
समयस्यानपाकर्म विवादः क्षेत्रजस्तथा ।
स्त्रीपुंसयोश्च सम्बन्धो दायभागोऽथ साहसम् ॥
वाक्पारुष्यं तथैवोक्तं दण्डपारुष्यमेव च ।
द्यूतं प्रकीर्णकं चैवेत्यष्टादशपदः स्मृतः ॥

ऋणादानाद्यष्टादशविषयान्यतमाविषयो व्यवहारः स्मृत इत्यर्थः । न च वाच्यम्—निक्षेपादिपदान्तरव्यवहारस्मरणादष्टादशपदः स्मृत इत्येतद्विरुद्धमिति । यत आह स एव—

एषामेव प्रभेदोऽन्यश्शतमष्टोत्तरं स्मृतम् ।
क्रियाभेदान्मनुष्याणां शतशाखो निगद्यते ॥

इति । कात्यायनोपि—

अष्टादशक्रियाभेदाद्भिन्नान्यष्टसहस्रशः ।

इति । क्रियाभेदात् साध्यभेदादित्यर्थः । अनेन व्यवहारा अप्यष्टसहस्रशो भिन्ना इत्यर्थादुक्तम् । शतमष्टोत्तरमष्टसहस्रश इत्येतयोर्बहुत्वप्रतिपादनपरत्वादविरोधः ।

इति स्मृतिचन्द्रिकायां व्यवहारस्वरूपनिरूपणम् ।

अथाष्टादशपदनिरूपणम् .

तत्र ऋणादानस्य स्वरूपं भेदाश्च केचिन्नारदेन दर्शिताः ।

ऋणं देयमदेयं च येन यत्र यथा च यत् ।
दानग्रहणधर्मश्च ऋणादानमिति स्मृतम् ॥

द्यूतादिकुत्सितेतरकार्यार्थं पित्रादिकृतं ऋणं देयम् । कुटु म्बभरणाद्यावश्यकेतरकार्यार्थं पुत्रादिकृतमृणं देयम् । पुत्रपौत्राद्यधिकारिणां बाल्यापगमनान्तरादिकाले द्वैगुण्यादिप्रकारेण ऋणं देयमिति यत्तत्सर्वं, तथा 'बन्धग्रहणादिधनप्रयोगधर्माश्शनैः' इत्यादिप्रयुक्तधनादानधर्माश्च यस्मिन्विवादविषय उक्ताः तत्पदमृणादानमिति स्मृतमित्यर्थः । द्वितीयपदस्यापि स्वरूपं भेदं चाह स एव —

स्वद्रव्यं यत्र विस्रम्भान्निक्षिपत्यविशङ्कितः ।
निक्षेपो नाम तत्प्रोक्तं व्यवहारपदं बुधैः ॥
असङ्ख्यातमविज्ञातं समुद्रं यन्निधीयते ।
तज्जानीयादुपनिधिं निक्षेपं गणितं विदुः ॥

इति । निक्षेपोपनिध्योर्गणितागणितत्वनिबन्धनो भेद इत्यर्थः । अविज्ञातमित्यस्यार्थो बृहस्पतिना प्रपञ्चितः—

अनाख्यातं व्यवहितमसङ्ख्यातमदर्शितम् ।
मुद्राङ्कितं च यद्दत्तं तदौपनिधिकं स्मृतम् ॥

इति । दत्तं परहस्त इति शेषः । तथा च याज्ञवल्क्यः—

भाजनस्थमसङ्ख्यातं हस्ते न्यस्य यदर्प्यते ।
द्रव्यं तदौपनिधिकं प्रतिदेयं तथैव तत् ॥

भाजनं निक्षेप्यस्याधारभूतं करण्डकादिपात्रम् । हस्त इत्युपलक्षणम् । अत एव नारदः—

अन्यद्रव्यव्यवहितं द्रव्यमव्याकृतं च यत् ।
निक्षिप्यते परगृहे तदौपनिधिकं स्मृतम् ॥

यत्र तल्लक्षणरहितं स्थाप्यते तन्न्यासाख्यमित्याह बृहस्पतिः—

राजचोरारातिभयाद्दायादानां च बाधनात् ।
स्थाप्यतेऽन्यगृहे द्रव्यं न्यासस्तत्परिकीर्तितः ॥

इति । कात्यायनस्त्वस्यापवादमाह—

क्रयप्रोषितनिक्षिप्तबन्धान्वाहितयाचितम् ।
वैश्यवृत्त्यर्पितं चैव सोऽर्थस्तूपनिधिस्स्मृतः ॥

क्रयः क्रयधनम् । प्रोषितनिक्षिप्तमित्यत्र प्रोषितग्रहणं प्रवत्स्यत उपलक्षणार्थम् । बन्ध आधिः । अन्वाहितमन्यस्मै दातुमर्पितम् । याचितं परकीयमलङ्काराद्यर्थमानीतम् । वैश्यवृत्त्यर्पितं वृत्त्यर्थमर्पितं कृष्यादिकर्माद्यर्थमन्यस्यार्पितम् । एवमुक्तभेदो निक्षेपादिः पुनर्द्विविध इत्याह नारदः—

स पुनर्द्विविधः प्रोक्तः साक्षिमानितरस्तथा ।
प्रतिदानं तथैवास्य प्रत्ययस्स्याद्विपर्यये ॥

प्रत्ययो दिव्यम् ॥

तथा तृतीयपदस्यापि तेनैव स्वरूपभेदौ दर्शितौ—

वणिक्प्रभृतयो यत्र कर्म सम्भूय कुर्वते ।
तत्संभूयसमुत्थानं व्यवहारपदं स्मृतम् ॥

वणिजो वाणिज्यं, ऋत्विजो यज्ञं, कृषीवलाः कृषिं, हेमकारादयश्शिल्पं, नर्तकादयो नृत्तादिकं, स्तेनाः स्तेयं यत्र संहत्य कुर्वते, तत्संभूय क्रियमाणं वाणिज्यादि सम्भूय समुत्तिष्ठन्ते समेधन्तेऽनेनेति व्युत्पत्त्या सम्भूयसमुत्थानाख्यं व्यवहारपदमित्यर्थः । वणिक्प्रभृतय इत्यनेनैवैते भेदा दर्शिताः । तथा चतुर्थस्यापि पदस्य स्वरूभेदौ तेनैव दर्शितौ—

दत्वा द्रव्यमसम्यग्यत् पुनरादातुमिच्छति ।
दत्ताप्रदानिकं नाम व्यवहारपदं हि तत् ॥

यस्मिन् दाने दत्तं द्रव्यं कर्मकारादिवैगुण्यात् पुनस्सम्प्रदानादपहार्यं तद्दानम् । दत्तस्याप्रदानमस्मिन्विद्यत इति व्युत्पत्त्या दत्ताप्रदानिकाख्यं व्यवहारपदमिति श्रौतोऽर्थः । तथा कर्मकाराद्यवैगुण्याद्दत्तस्यानपाकर्मानपनयनमस्मिन्निति व्युत्पत्त्या दत्तानपाकर्माख्यमपीदमेव पदमित्यार्थिकोऽर्थः । एवं श्रुत्यर्थाभ्यामस्य पदस्य द्वैविध्यमभिधाय पुनर्देयादेयादिकर्मकारकभूतद्रव्यभेदेन चातुर्विध्यमाह स एव—

अथ देयमदेयं च दत्तं चादत्तमेव च ।

व्यवहारेषु विज्ञेयो दानमार्गश्चतुर्विधः ॥

देयमनिषिद्धं दानक्रियायां निर्वर्तकं द्रव्यम्। अदेयं चानिर्वर्तकम्। दत्तं दाने सति सम्प्रदानादनपहार्यम्। अदत्तं चापहार्यमित्येतैर्देयादेयदत्तादत्तैर्दानमार्गो दानप्रकारश्चतुर्विधो व्यवहारेषु विज्ञेय इत्यर्थः। तथाऽनन्तरपदस्यापि स्वरूपभेदावुक्तौ—

अभ्युपेत्य तु शुश्रूषां यस्तां न प्रतिपद्यते।
अशुश्रूषाऽभ्युपेत्यैतद्विवादपदमुच्यते ॥

यच्छिष्यादिशुश्रूषकस्याङ्गीकृतगुर्वाद्याज्ञाऽकरणं तदभ्युपेत्याशुश्रूषाख्यं विवादपदमित्यर्थः। य इति सामान्यशब्दोक्तशिष्यान्तेवासिभृतककर्मकृद्दासाख्यपञ्चशुश्रूषकवशात् पञ्चविधत्वमस्य पदस्यार्थात्सिद्धमिति न तेन पृथग्भेदो दर्शितः। बृहस्पतिना पुनर्बहुधा भेदा दर्शिताः—

अनेकधा त्वभिहिता जातिकर्मानुरूपतः।
विद्याविज्ञानकामार्थनिमित्तेन चतुर्विधा ॥
एकैकः पुनरेतेषां क्रियाभेदात्प्रभिद्यते ॥

इति। वेदविद्या हि शिष्यस्य शुश्रूषुकत्वे निमित्तम्। शिल्पविज्ञानमन्तेवासिनः। कामार्थौ भृतकादेः। अनन्तरपदस्य तु स्वरूपभेदौ नारदेनाभिहितौ—

भृत्यानां वेतनस्योक्तो दानादानविधिक्रमः।
वेतनस्यानपाकर्म तद्विवादपदं स्मृतम् ॥

भृत्यानां भृत्यर्थं कर्म कुर्वतां वेतनस्य भृतेर्दानादानविधिक्रमः ईदृशस्य देयं ईदृशस्य न देयम्, दत्तमप्येवंविधात् प्रत्यादेयं क्वचिद्द्विगुणं देयमित्याद्युक्तं यत्र विवादपदे तद्वेतनस्य भृतेरनपाकर्म अनपनयनमननुरूपकरणं वाऽत्र विद्यते इति व्युत्पत्त्या वेतनानपाकर्माख्यं विवादपदमित्यर्थः । अनेनैव देयादिसाध्यभेदादस्य पदस्यानेकविधत्वमुक्तम् । एवमनन्तरपदस्याप्याह—

निक्षिप्तं वा परद्रव्यं नष्टं लब्ध्वाऽपहृत्य वा ।
विक्रीयतेऽसमक्षं यत् स ज्ञेयोऽस्वामिविक्रयः ॥

असमक्षं स्वामिन इति शेषः । तथा च व्यासः—

याचितान्वाहितन्यासं हृत्वा वाऽन्यस्य यद्धनम् ।
विक्रीयते स्वाम्यभावे स ज्ञेयोऽस्वामिविक्रयः ॥

स्वाम्यभावे स्वामिनोऽसन्निधावित्यर्थः । एवमनन्तरपदस्यापि स्वरूपविभागौ द्रष्टव्यौ । तथा च नारदः—

विक्रीय पण्यं मूल्येन क्रेतुर्यन्न प्रदीयते ।
विक्रीयासम्प्रदानं तद्विवादपदमुच्यते ॥

अस्य च पण्यभेदतो भेद इति तद्भेदमाह—

लोकेऽस्मिन् द्विविधं द्रव्यं जङ्गमं स्थावरं तथा ।
क्रयविक्रयधर्मेषु सर्वं तत्पण्यमुच्यते ॥
षड्विधस्तस्य तु बुधैः दानादानविधिस्स्मृतः ।
गणितं तुलितं मेयं क्रियया रूपतः श्रिया ॥

अस्यार्थः—गणितं क्रमुकादि, तुलितं कनकादि, मेयं प्रस्थादिना व्रीह्यादि, क्रियया दोहनादिकया अश्वमहिष्यादि, रूपतः पण्याङ्गनादि, श्रिया कान्त्या रत्नादि। एवमनन्तरपदस्यापि स्वरूपमाह—

क्रीत्वा मूल्येन यः पण्यं क्रेता न बहु मन्यते।
क्रीत्वाऽनुशय इत्येतद्विवादपदमुच्यते॥

न बहु मन्यते न परामर्शपूर्वमिति मन्यत इत्यर्थः। तथाऽनन्तरपदार्थनिरूपणार्थमाह—

पाषण्डनैगमादीनां स्थितिस्समय उच्यते।
समयस्यानपाकर्म तद्विवादपदं स्मृतम्॥

पाषण्डाः क्षपणादयः। नैगमास्सार्थिकाः वणिजः। आदिशब्देन त्रैविद्यब्राह्मणसमूहश्रेणीपूगव्रातगणगुल्मग्रामदेशादयो गृह्यन्ते। तेषां स्थितिः पारिभाषिकधर्मतो व्यवस्था समयः तस्यानपाकर्म अनुल्लङ्घनं यत्तत्समयस्यानपाकर्म। तदन्यथा क्रियमाणं विरुद्धलक्षणयाऽर्थवत्। समयस्यानपाकर्माख्यं विवादपदं स्मृतमित्यर्थः। संविद्व्यतिक्रम इति मुख्यमाख्यान्तरमस्य पदस्य प्रसिद्धत्वान्नोक्तम्।

अनन्तरपदमपि व्याचष्टे—

सेतुकेदारमर्यादाविकृष्टाकृष्टनिश्चयाः।
क्षेत्राधिकारा यत्र स्युर्विवादः क्षेत्रजस्स्मृतः॥

सेतुर्जलप्रवाहबन्धः । केदारः क्षुद्रवास्तुभिः कल्पितो देशः, क्षेत्रमात्रा वा । मर्यादा क्षेत्रादिसीमा । विकृष्टो लाङ्गलादिनोद्भेदितो देशः । अकृष्टः खिलो देशः । तेषां निश्चयाः क्षेत्राधिकाराः क्षेत्रविषया यत्र भवेयुः स क्षेत्रजो विवाद इत्यर्थः । स च षट्प्रकार इत्याह कात्यायनः—

आधिक्यं न्यूनता चांशे अस्तिनास्तित्वमेव च ।
आभोगभुक्तिस्सीमा च षट् भूवादस्य हेतवः ॥

अस्यार्थो विविच्योच्यते—काञ्चिद्भूभागमङ्गीकृत्य ततोऽधिका भूरस्ति नेतीति विवाद आधिक्यनिबन्धनः । एतावती भूस्तव नेत्युक्ते ममैतावत्यस्तीत्येवंविधो न्यूनताहेतुकः । अस्यां भुवि ममांशोऽस्तीत्युक्ते नेत्येवंविधोऽशोऽस्तित्वकारितः । अत्र तवांशो नास्तीत्युक्ते विद्यत इत्येवंविधोंऽशो नास्तित्वनिमित्तकः । मदीया भूस्त्वया प्रागभुज्यमानैवेदानीं भुज्यत इत्युक्ते प्रागपि भुक्तिरस्तीत्येवंविधो भोगभुक्तिबीजकः । इयं मर्यादा मदीया या भुव इत्युक्ते नेत्येवंविधस्सीमासम्भवः । स च यावत्सीमाभेदं भिद्यत इति भेदमाह नारदः—

ध्वजिनी मत्स्यिनी चैव नैधानी भयवर्जिता ।
राजशासननीता च सीमा पञ्चविधा स्मृता ॥

ध्वजिनी वृक्षादिना लक्षिता । मत्स्यिनी जलेन । नैधानी निखातकृष्टादिना । भयवर्जिता वादिनोर्मिथस्सम्प्रतिपत्तितः कृता । राजशासननीता राजेच्छया निर्मिता ।

अथ तेनैवानन्तरपदद्वयस्य निरूपणं संक्षेपेण कृतम्—

विवाहादिविधिः स्त्रीणां यत्र पुंसां च कीर्त्यते ।
स्त्रीपुंसयोगसंज्ञं तद्विवादपदमुच्यते ॥
विभागोऽर्थस्य पित्र्यादेः पुत्रैर्यत्र प्रकल्प्यते ।
दायभाग इति प्रोक्तं व्यवहारपदं बुधैः ॥

उभयत्रादिशब्देन बहुविधो भेदो दर्शितः । पुत्रैरिति दायादोपलक्षणार्थम् । अनन्तरपदत्रयस्य तु प्रपञ्चेनैव निरूपणं कृतम्—

सहसा क्रियते कर्म यत्किंचिद्बलदर्पितैः ।
तत्साहसमिति प्रोक्तं सहो बलमिहोच्यते ॥

यत्किञ्चिन्मध्यगधनापहरणादिकमित्यर्थः । तथाच याज्ञवल्क्यः—

सामान्यद्रव्यप्रसभहरणं साहसं स्मृतम् ॥

इति । सामान्यद्रव्यग्रहणं मनुष्यमारणादेरुपलक्षणार्थम् । अतएव बृहस्पतिः—

मनुष्यमारणं चौर्यं परदाराभिमर्शनम् ।
पारुष्यमुभयं चेति साहसं पञ्चधा स्मृतम् ॥

इति । एवमनेकविधत्वमस्य पदस्य यत्किञ्चिच्छब्देन लक्षणश्लोकगतेनोक्त्वा पुनस्त्रैविध्यमाह नारदः—

तत्पुनस्त्रिविधं ज्ञेयं प्रथमं मध्यमं तथा ।
उत्तमं चेति शास्त्रेषु तस्योक्तं लक्षणं पृथक् ॥

लक्षणमपि प्रपञ्चितं तेन—

फलमूलोदकादीनां क्षेत्रोपकरणस्य च ।
भङ्गाक्षेपोपमर्दाद्यैः प्रथमं साहसं स्मृतम् ॥
वासःपक्वान्नपानानां गृहोपकरणस्य च ।
एतेनैव प्रकारेण मध्यमं साहसं स्मृतम् ॥
व्यापादो विषशस्त्राद्यैः परदाराभिमर्शनम् ।
प्राणोपरोधि यच्चान्यदुक्तमुत्तमसाहसम् ॥

इति । विविधानामापदां विषादिभिरापादनं व्यापादनम् ॥ तथा वाक्पारुष्यस्य स्वरूपमाह—

देशजातिकुलादीनामाक्रोशन्यङ्गसंयुतम् ।
यद्वचः प्रतिकूलार्थं वाक्पारुष्यं तदुच्यते ॥

यद्वचनं देशाद्याक्षेपार्थबोधकं, यच्चात्यन्तदुःखकरार्थकं तद्वाक्पारुष्यम् । तदपि त्रिविधमित्याह—

निष्ठुराश्लीलतीव्रत्वात्तदपि त्रिविधं स्मृतम् ।

इति । निष्ठुरादीनां स्वरूपमाह—

साक्षेपं निष्ठुरं ज्ञेयमश्लीलं न्यङ्गसंयुतम् ।
पतनीयैरुपक्रोशैः तीव्रमाहुर्मनीषिणः ॥

धिङ्मूर्खजाल्मेत्यादि साक्षेपम् । न्यङ्गं भगिनीसम्बन्धाद्यवद्यम् । पतनीयैः सुरापोसीत्यादिभिः । तथाच कात्यायनः—

यस्त्वसत्संज्ञितैरङ्गैः परमाक्षिपति क्वचित् ।
अभूतैर्वाऽथ भूतैर्वा निष्ठुरा वाक् स्मृता बुधैः ॥

न्यग्भावकरणं वाचा क्रोधात्तु कुरुते यदा ।
वृत्तेर्देशकुलादीनामश्लीला सा बुधैः स्मृता ॥
महापातकयोक्त्री च रागद्वेषकरी च या ।
जातिभ्रंशकरी वाऽथ तीव्रा सा प्रथिता तु वाक् ॥

बृहस्पतिस्त्वत्रापि साहसवत् प्रथममध्यमोत्तमभेदेन त्रैविध्यमाह—

देशग्रामकुलादीनां क्षेपः पापेन योजनम् ।
द्रव्यं विना तु प्रथमं वाक्पारुष्यं तदुच्यते ॥
भगिनीमातृसम्बन्धमुपपातकशंसनम् ।
पारुष्यं मध्यमं प्रोक्तं वाचिकं शास्त्रवेदिभिः ॥
अभक्ष्यापेयकथनं महापातकदूषणम् ।
पारुष्यमुत्तमं प्रोक्तं तीव्रं मर्माभिघट्टनम् ॥

इति । द्रव्यं विना द्रव्यवैशिष्ट्यं विनेत्यर्थः । कात्यायनस्त्वन्यानपि वाक्पारुष्यभेदानाह—

हुङ्कारः कासनं चैव लोके यच्च विगर्हितम् ।
अनुकुर्यादनुब्रूयाद्वाक्पारुष्यं तथोच्यते ॥
योऽगुणान् कीर्तयेत्क्रोधान्निर्गुणे वा गुणज्ञताम् ।
अन्यसंज्ञानुयोगी वा वाग्दुष्टं तं नरं विदुः ॥

इति । व्यासस्तु दण्डपारुष्यस्वरूपमाह—

भस्मादीनां प्रक्षिपणं मोडनं च करादिना ।
आवेष्टनं चांशुकाद्यैर्दण्डपारुष्यमुच्यते ॥

बृहस्पतिरपि—

हस्तपाषाणलगुडैर्भस्मकर्दमपांसुभिः ।
आयुधैश्च प्रहरणं दण्डपारुष्यमुच्यते ॥

प्रहरणं परगात्रेष्विति शेषः । तथाच नारदः—

परगात्रेष्वभिद्रोहो हस्तपादायुधादिभिः ।
भस्मादिभिश्चोपघातो दण्डपारुष्यमुच्यते ॥

परगात्रेषु स्थावरजङ्गममूर्तिषु । दण्डो द्रोहः । पारुष्यं निष्ठुरता । एतदपि पदं त्रिविधमित्याह स एव—

तस्यापि दृष्टं त्रैविध्यं हीनमध्योत्तमक्रमात् ।
अवगूरणनिश्शङ्कपातक्षतजदर्शनैः ॥

हीनमध्यमोत्तमानां तु द्रव्याणां समतिक्रमादिति कर्तुर्व्यापारतारतम्यात्, कर्मीभूतद्रव्यवैशिष्टयतारतम्याच्च प्रथममध्यमोत्तमभावेन त्रैविध्यमित्यर्थः । ननु—पारुष्यद्वयस्य साहसविशेषत्वात् पदान्तरत्वेनोक्तिरयुक्ता, सत्यम्, सहसा क्रियमाणस्य साहसविशेषत्वं छलेन पुनः क्रियमाणस्य पदान्तरत्वमेव, साहसलक्षणाभावात् । तथाचोक्तं तेनैव—

तस्यैव भेदः स्तेयं स्याद्विशेषस्तत्र तूच्यते ।
आधिस्साहसमाक्रम्य स्तेयमाधिः छलेन तु ॥

आधिः क्लेशः, स आक्रम्यार्थहरणद्वारा क्रियमाणः साहसम् । छलेन पुनरर्थग्रहणद्वारा क्रियमाणं स्तेयमित्यर्थः । ननु अनेन स्तेयस्य भेद उक्तो न पारुष्यस्य । सत्यं, अपृथगुद्दि

ष्टस्यापि भेद उक्ते पृथगुद्दिष्टस्य सुतरामेव भेदो लक्ष्यत इति स्ते-
यमात्रस्योक्त इत्यविरोधः । अतः पदान्तरत्वेनाप्युक्तिर्युक्तैव ।

अत एव सङ्ग्रहकारः—

मनुष्यमारणादीनि क्रियन्ते प्रसभं यदि ।
साहसानीति कथ्यन्ते यथाख्यान्यन्यथा पुनः ॥

अन्यथा पुनर्यद्यप्रसभं कृतानि तदा यथाख्यानि स्तेयस्त्रीसङ्ग्रह
णवाक्पारुष्यदण्डपारुष्याख्यानीत्यर्थः । नन्वेवं स्त्रीस्तेयसङ्ग्रहण-
योरपि साहसात् पृथगुद्देशनं कार्यम् । सत्यम्, तत एवमनुना

स्तेयं च साहसं चैव स्त्रीसंग्रहणमेव च ॥

इति पृथगुद्दिष्टम्। नारदेन तु तयोश्छलेनैव क्रियमाणत्वात् पदा-
न्तरत्वं स्फुटमेवेति साहसान्तर्भाव एवोद्देशदशायां दर्शितः।
पारुष्यद्वयस्य तु प्रायेण प्रसभं क्रियमाणत्वात् पदान्तरत्व-
मव्यक्तमिति पृथगप्युद्देशः कृत इति सर्वमनवद्यम्। स्तेयस्य
साहसात् भेदमुक्त्वा त्रैविध्यमप्युक्तं नारदेन—

तदपि त्रिविधं ज्ञेयं द्रव्यापेक्षं मनीषिभिः ।
क्षुद्रमध्योत्तमानां तु द्रव्याणामपहारतः ॥

क्षुद्रादिद्रव्याण्यपि तेनैव दर्शितानि—

मृद्भाण्डासनखट्वास्थिदारुचर्मतृणादि यत् ।
शमीधान्यं कृतान्नं च क्षुद्रद्रव्यमुदाहृतम् ॥
वासः कौशेयवर्जं तु गोवर्जं पशवस्तथा ।

हिरण्यवर्जं लोहं च मध्यं व्रीहियवादि च ॥
हिरण्यरत्नकौशेयस्त्रीपुंगोगजवाजिनाम् ।
देवब्राह्मणराज्ञां च विज्ञेयं द्रव्यमुत्तमम् ॥
उपायैर्विविधैरेषां वञ्चयित्वाऽपकर्षणम् ।
सुप्तमत्तप्रमत्तेभ्यः स्तेयमाहुर्मनीषिणः ॥

इति । शमीधान्यं कोशवेष्टितं माषमुद्गादि । कौशेयं क्रिमिकोशजाततन्तुनिर्मितम् । स्त्रीसङ्ग्रहणस्य तु त्रैविध्यमाह बृहस्पतिः—

पापमूलं संग्रहणं त्रिप्रकारं निबोधत ।
बलोपाधिकृते द्वे तु तृतीयमनुरागजम् ॥

सङ्ग्रहणं परस्त्रिया सह पुरुषस्य सम्बन्धः । तथाच नारदः—

परस्त्रिया सहाकालेऽदेशे वा पुरुषस्य तु ।
स्थानसंभाषणामोदास्त्रयस्संग्रहणक्रमाः ॥

इति । स्वोक्तत्रिप्रकारलक्षणमाह बृहस्पतिः—

अनिच्छन्त्या यत्क्रियते सुप्तोन्मत्तप्रमत्तया ।
प्रलपन्त्या वा रहश्च बलात्कारकृतं तु तत् ॥
छद्मना गृहमानीय दत्वा वा मद्यकार्मणम् ।
संयोगः क्रियते यस्यां तत्तूपाधिकृतं विदुः ॥
अन्योन्यचक्षूरागेण दूतीसंप्रेषणेन वा ।
कृतं रूपार्थलोभेन ज्ञेयं तदनुरागजम् ॥

कार्मणं वशीकरणम् । तथा प्रथममध्यमोत्तमभावेनापि त्रैविध्यलक्षणमाह स एव—

तत्पुनस्त्रिविधं प्रोक्तं प्रथमं मध्यमोत्तमम् ।
अपाङ्गावेक्षणं हास्यं दूतीसंप्रेषणं तथा ॥
स्पर्शो भूषणवस्त्राणां प्रथमस्संग्रहः स्मृतः ।
प्रेषणं गन्धमाल्यानां धूपमध्वन्नवाससाम् ॥
संभाषणं रहसि च मध्यमं संग्रहं विदुः ।
एकशय्यासनक्रीडाचुम्बनालिङ्गनं तथा ॥
एतत्संग्रहणं प्रोक्तमुत्तमं शास्त्रवेदिभिः ।

इति । व्यासोपि—

सङ्ग्रहस्त्रिविधो ज्ञेयः प्रथमो मध्यमस्तथा ।
उत्तमश्चेति शास्त्रेषु तस्योक्तं लक्षणं पृथक् ॥
अदेशकालसंभाषा निर्जने च परस्त्रिया ।
कटाक्षावेक्षणं हास्यं प्रथमस्संग्रहः स्मृतः ॥
प्रेषणं गन्धमाल्यानां धूपभूषणवाससाम् ।
प्रलोभनं चान्नपानैर्मध्यमस्सङ्ग्रहः स्मृतः ॥
शय्यासनं विविक्ते तु परस्परमुपाश्रयः ।
केशाकेशिग्रहैश्चैव ज्ञेय उत्तमसङ्ग्रहः ॥

विविक्ते रहसि । केशाकेशिग्रहैः परस्परकेशग्रहणपूर्वकक्रीडाभिः । कात्यायनोपि संग्रहभेदानाह—

दूतोपचारयुक्तश्चेदवेलास्थानसंस्थितिः ।
कण्ठकेशाञ्चलग्राहः कर्णनासाकरादिषु ॥

एकस्थानासनाहाराः संग्रहो नवधा स्मृतः ।

अञ्चलं वस्त्रप्रान्तम् । तथा—

परस्त्रियाऽभिभाषेत तीर्थेऽरण्ये गृहेऽपि वा ।

नदीनां चैव संभेदे स सङ्ग्रहणमाप्नुयात् ॥

सम्भेदस्सङ्गमः । तथा—

उपकारक्रिया केळिः स्पर्शो भूषणवाससाम् ।

सहखट्वासनं चैव सर्वं संग्रहणं स्मृतम् ॥

उपकारक्रिया ताम्बूलादिदानेनोपकारकरणम् । केळिः परिहासः । तथा च—

स्त्रियं स्पृशेददेशे यः स्पृष्टो वा मर्षयेत्तया ।

परस्परस्यानुमते सर्वं सङ्ग्रहणं स्मृतम् ॥

अदेशः स्तनादिप्रदेशः । नारदोपि—

पाणौ यां च निगृह्णीयात् वेण्यां वस्त्राञ्चलेऽपि वा ।

तिष्ठतिष्ठेति वा ब्रूयात्सर्वं संग्रहणं स्मृतमिति ॥

तथा द्यूतसमाह्वयाख्यस्यापि पदस्य स्वरूपभेदबोधनार्थमाह स एव—

अक्षवर्ध्र[1] शलाकाद्यैः देवनं जिह्मकारितम् ।

पणक्रीडावयोभिश्च पदं द्यूतसमाह्वयम् ॥

वर्ध्रः चर्ममयपट्टिका । आद्यशब्देन कपर्दिकादयो गृह्यन्ते । अक्षादिभिः पणपूर्वकं देवनं क्रीडनं जिह्मकारितं कौटिल्येन कृतं

---

[1] अक्षब्रध्न इति पाठान्तरम्.

यत् तत् द्यूताख्यम् । तथा वयोभिः कुक्कुटादिभिः पणपूर्वकं देवनं समाह्वयाख्यम् । तद्द्वयं मिळितं द्यूतसमाह्वयाख्यमेकमेव पदमित्यर्थः । वयोग्रहणं प्राण्युपलक्षणार्थम् । अत एव मनुः—

अप्राणिभिर्यत्क्रियते तल्लोके द्यूत उच्यते ।
प्राणिभिः क्रियमाणस्तु स विज्ञेयस्समाह्वयः ॥

बृहस्पतिरपि—

अन्योन्यं परिगृहीताः पक्षिमेषवृषादयः ।
प्रहरन्ते कृतपणाः तद्वदन्ति समाह्वयम् ॥

इति । प्रकीर्णकस्य लक्षणाभेदौ तु नारदेनोक्तौ—

प्रकीर्णके पुनर्ज्ञेया व्यवहारा नृपाश्रयाः ।
राज्ञामाज्ञाप्रतीघातः तत्कर्मकरणं तथा ॥
पुरप्रधानसंभेदः प्रकृतीनां तथैव च ।
पाषण्डिनैगमश्रेणीगणधर्मविपर्ययाः ॥
पितापुत्रविवादश्च प्रायश्चित्तव्यतिक्रमः ।
प्रतिग्रहविलोपश्च लोप आश्रमिणामपि ॥
वर्णसङ्करदोषश्च तद्वृत्त्यनियमस्तथा ।
न दृष्टं यच्च पूर्वेषु सर्वं तत्स्यात्प्रकीर्णकम् ।

इति । नृपेण यद्यत्स्वाज्ञाव्यतिक्रमादौ प्रतिवादित्वमास्थाय निर्णेतव्यम्, यच्च ऋणादानादिपूर्वोक्तपदेषु नोक्तम्, तत्सर्वं प्रकीर्णकाख्यं पदमित्यर्थः । बृहस्पतिः—

कुसीदनिध्याधेयाख्यं संभूयोत्थानमेव च ।
भृत्यादानमशुश्रूषा भूवादोऽस्वामिविक्रयः ॥
क्रयाविक्रयानुशयः समयातिक्रमस्तथा ।
स्त्रीपुंसयोगः स्तेयं च दायभागोऽक्षदेनवम् ॥
एतान्यर्थसमुत्थानि पदानि तु चतुर्दश ।
पुनरेवं प्रभिन्नानि क्रियाभेदादनेकधा ॥
पारुष्ये द्वे वधश्चैव परस्त्रीसङ्गहस्तथा ।
हिंसोद्भवानि चत्वारि पदान्याह बृहस्पतिः ॥
हीनमध्योत्तमत्वेन प्रभिन्नानि पृथक्पृथक् ।
विशेष एषां निर्दिष्टः चतुर्णामप्यनुक्रमात् ॥
पदान्यष्टादशैतानि धर्मशास्त्रोदितानि तु ।
मूलं सर्वविवादानां ये विदुस्ते परीक्षकाः ॥

इति स्मृतिचान्द्रिकायामष्टादशपदनिरूपणम्

अथ व्यवहारभेदाः

उक्तं स्वरूपान्तर्गतविषयभेदतो व्यवहारस्य बहुविधत्वम् । अथ तस्यैवेदानीं पणादिवशात् भेदः प्रतिपाद्यते । अत्र याज्ञवल्क्यः—

सपणश्चेद्विवादस्स्यात्तत्र हीनं तु दापयेत् ।

इति । पराजिते मयैतावत् राज्ञे दीयत इति दर्पवशादभ्युपगतं धनं पणं तेन सहितः सपणः । चेच्छब्दादपणोपि, तेन द्विविधो व्यवहारः । तथा चोक्तं नारदेन—

सोत्तरोऽनुत्तरश्चेति स विज्ञेयो द्विलक्षणः ।
सोत्तरोऽभ्यधिको यत्र विलेखापूर्वकः पणः ॥

प्रतिज्ञाविलेखनात्पूर्वं यत्र व्यवहारे दण्डादभ्यधिकः पण उभाभ्यामुपेयते अन्यतरेण वा स सोत्तरो व्यवहार इत्यर्थः । तथाऽन्येऽपि भेदास्तेनोक्ताः—

स चतुष्पाच्चतुस्स्थानः चतुस्साधन एव च ।
चतुर्हितश्चतुर्व्यापी चतुष्कारी च कीर्त्यते ॥
अष्टाङ्गोऽष्टादशपदः शतशाखस्तथैव च ।
त्रियोनिर्द्व्यभियोगश्च द्विद्वारो द्विगतिस्तथा ॥

इति । स्वयमेव चैतान् प्रकारान् व्याचष्टे—

धर्मश्च व्यवहारश्च चरित्रं राजशासनम् ।
चतुष्पाद्व्यवहारोऽयं उत्तरः पूर्वबाधकः ॥

ननु—प्रतिज्ञोत्तरप्रमाणनिर्णयानां व्यवहारपदत्वं न धर्मादीनामिति किमिदमुक्तम्? उच्यते—निर्णयपादो धर्माद्यनुसारेण चतुर्विधः। तत्र यदनुसारेण यो निर्णयः सः तच्छब्देन निर्दिश्यते। तेन धर्मादिभिरपि चतुष्पात्त्ववर्णनं युक्तमेव । तथाच बृहस्पतिः—

धर्मेण व्यवहारेण चरित्रेण नृपाज्ञया ।
चतुष्प्रकारोऽभिहितस्सन्दिग्धेऽर्थे विनिर्णयः ॥

चतुर्विधानामपि निर्णयानां लक्षणमाह कात्यायनः—

दोषकारी तु कर्तृत्वं धनस्वामी स्वकं धनम् ।
विवादे प्राप्नुयाद्यत्र धर्मेणैव स निर्णयः ॥

दोषो हिंसादिः । कर्तृत्वं तत्कारित्वम् ।

स्मृतिशास्त्रं तु यत्किंचित् प्रथितं धर्मसाधकैः ।
कार्याणां निर्णयार्थे तु व्यवहारः स्मृतो हि सः॥

धर्मशास्त्रनिरूपितप्रतिज्ञोत्तराद्यनुसारेण निर्णयो व्यवहाराख्य इत्यर्थः ।

यद्यदाचर्यते येन धर्म्यं वाऽधर्म्यमेव वा ।
देशस्याचरणान्नित्यं चरित्रं तत्प्रकीर्तितम् ॥

तदनुसारीति निर्णयोपि तथैव प्रकीर्तित इत्यर्थः ।

न्यायशास्त्राविरोधेन देशदृष्टेस्तथैव च ।
यं धर्मं स्थापयेद्राजा न्याय्यं तद्राजशासनम् ॥

अस्यायमर्थः — मानान्तराविरुद्धो राजबुद्धिमात्रपरिकल्पितो निर्णयो राजशासनमित्युच्यते इति । अत्रैकैकप्रकारस्य पुनश्च द्वैविध्यमाह बृहस्पतिः—

एकैको द्विविधः प्रोक्तः क्रियाभेदान्मनीषिभिः ।

इति । द्वैविध्यमपि तेनैव दर्शितम्—

समग्विचार्य कार्यं तु युक्त्या संपरिकल्पितम् ।
परीक्षितं च शपथैः स ज्ञेयो धर्मनिर्णयः ॥
प्रतिवादी प्रपद्येत यत्र धर्मस्स निर्णयः ।
दिव्यैर्वा शोधितस्सम्यक् द्वितीयस्स उदाहृतः ॥

सह तत्त्वानुसरणेन कृतः प्रथमो धर्माख्यनिर्णयः । विना तत्त्वानुसरणं सत्योत्तरेण वा दिव्यप्रमाणेन वा कृतो द्वितीय इत्यर्थः ।

प्रमाणनिश्चितो यस्तु व्यवहारस्स उच्यते ।
वाक्छलानन्तरत्वेन द्वितीयः परिकीर्तितः ॥

प्रमाणमत्र मानुषं विवक्षितम् । दिव्यनिश्चितस्य धर्मनिर्णयकोटित्वात् ।

अनुमानेन निर्णीतं चरित्रमिति कथ्यते ।
देशस्थित्या द्वितीयस्तु शास्त्रविद्भिरुदाहृतः ॥

अनुमानमुल्काहस्तादि लिङ्गम् ।

प्रमाणरहितो यस्तु राजाज्ञानिर्णयः स्मृतः ।
शास्त्ररीत्यविरोधेन तथा चान्यः प्रकीर्तितः ॥

इति । प्रमाणरहित इत्यस्यार्थो व्यासेन प्रपञ्चितः—

लिखितं साक्षिणो भुक्तिः प्रमाणं त्रिविधं स्मृतम् ।
अनुमानं विदुर्हेतुं तर्कश्चेति मनीषिणः ॥
देशस्थितिः पूर्वकृता चरित्रं समुदाहृतम् ।
अर्थानुरूपाश्शपथाः स्मृत्यस्सत्यपदादयः ॥
तेषामभावे राजाज्ञां निर्णयं तु विदुर्बुधाः ।

इति । नन्वेवं तर्हि— 'उत्तरः पूर्वबाधकः' इति नारदवचनमसम्बद्धं, तत्त्वार्थानुगुण्यातिशयेन पूर्वस्यैवोत्तरबाधकत्वात्,

छलं निरस्य भूतेन व्यवहरान्नयेन्नृपः ।

इति याज्ञवल्क्येनोक्तत्वाच्च, उच्यते—सत्यम्, उत्सर्गतस्सर्वत्रैवं, क्वचिद्विषये तूत्तरः पूर्वबाधको भवत्येव । तद्विषयं च नारदवचनम् । तथाहि—यदा केनचिद्विशिष्टेन राजन्यादिना मोहात्कथञ्चित्

राजदारादेः स्पर्शनादिकं कृतम्, कृत्वा च स्वप्राणभयान्मिथ्या करोति साक्षिणश्च सन्ति ते च राज्ञा पृष्टास्सन्तो वधोऽस्य माभूदिति नायमस्य कर्मणः कर्तेति मिथ्यासाक्ष्यं ब्रूयुः तदा दोषकारिणस्तत्कर्तृत्वाप्राप्तेर्धर्मो व्यवहारेण बाध्यते। युक्तं चात्र धर्मबाधनं 'वर्णिनां तु वधो यत्र' इति साक्षिणां मिथ्याभिधानविधानात्। यदा पुनः परदाराभिगमनं कृतमनेन साक्षिणो विद्यन्त इति कश्चिदाभीरादिः केनचिदभियुक्तो ब्रूते—सत्यमेतत् साक्षिभाषितं तथाऽपि नाहं दण्ड्यः चरित्रबलान्मयैतत्कृतम्। निवेशितं च पुस्तके राज्ञा तदिति चरित्रेण व्यवहारो बाध्यते, व्यवहारतः प्राप्तस्य दण्डस्य चरित्रतो निवृत्तत्वात्। युक्तं चात्र चरित्रेण बाधनम्—

ग्रामगोष्ठपुरश्रेणीसार्थसेनानिवासिनाम्।
व्यवहारश्चरित्रेण निर्णेतव्यो बृहस्पतिः॥

इति वचनात्। चरित्रमपि क्वचिद्राजाज्ञया बाध्यते—कुलगृहाभ्यन्तरे न केनचिद्राजपुरुषेण प्रवेष्टव्यमिति चरित्रमीदृशं कृतम्। ततो राज्ञा कश्चिदपराधी गृहं प्रविष्टो ज्ञातः, ततो राज्ञा कश्चिद्राजपुरुष आज्ञप्तः गृहाभ्यन्तरमपि प्रविश्य स दुष्ट आनेतव्य इति तदा चरित्रमपि राजशासनेन बाध्यते। दुष्टनिग्रहस्यावश्यकत्वेन चरित्रतो राजशासनस्य बलीयस्त्वात्। एवंविधमेव विषयं मनसि निधाय बृहस्पतिनाऽप्युक्तम्—

शास्त्रं केवलमाश्रित्य क्रियते यत्र निर्णयः।
व्यवहारस्स विज्ञेयः धर्मस्तेनापहीयते॥

देशस्थित्याऽनुमानेन नैगमानुगतेन च ।
क्रियते निर्णयस्तत्र व्यवहारस्तु बाध्यते ॥
विहाय चरिताचारं यत्र कुर्यात् पुनर्नृपः ।
निर्णयं सा तु राजाज्ञा चरित्रं बाध्यते तया ॥

इति । प्रकृतमुच्यते—चतुस्स्थानव्याख्यानार्थमाह—

तत्र सत्ये स्थितो धर्मो व्यवहारस्तु साक्षिषु ।
चरित्रं पुस्तकरणे राजाज्ञायां तु शासनम् ॥

साक्षिग्रहणं धर्मशास्त्रस्थदिव्यतरप्रमाणस्य चोपलक्षणार्थम् । पुस्तकरणं लेख्यम् ।

चतुस्साधनमाह—

सामाद्युपायसाध्यत्वाच्चतुस्साधन उच्यते ।

विप्रतिपन्नार्थिप्रत्यर्थिनोस्सामाद्युपायसाध्यत्वादित्यभिप्रायः ।

चतुर्हितमाह—

चतुर्णामाश्रमाणां तु रक्षणाच्च चतुर्हितः ।

आश्रमग्रहणं वर्णानामपि प्रदर्शनार्थम् ।

चतुर्व्यापिनमाह—

कर्तॄंस्तथा साक्षिणश्च सभ्यान्राजानमेव च ।
व्याप्नोति पादशो यस्माच्चतुर्व्यापी ततस्स्मृतः ॥

सम्यगसम्यक् दृष्टो धर्माधर्मफलेन कर्त्रादीन् पादशो व्याप्नोतीत्यर्थः ।

चतुष्कारिणमाह—

धर्मस्यार्थस्य यशसो लोकसक्तेस्तथैव च ।
चतुर्णां करणादेषां चतुष्कारी प्रकीर्त्यते ॥

लोकसक्तिः लोकानुरागः ।

अष्टाङ्गमाह—

राजा सपुरुषास्सभ्याः शास्त्रं गणकलेखकौ ।
हिरण्यमग्निरुदकमष्टाङ्गं समुदाहृतम् ॥

एतेषां तूपयोगमुपरिष्टाद्वक्ष्यामः । अष्टादशपदशतशाखयोर्व्याख्यानं पूर्वप्रकरणयोर्दर्शितमिहानुसंधेयम् ।

त्रियोनिमाह—

कामात्क्रोधाच्च लोभाच्च त्रिभ्यो यस्मात्प्रवर्तते ।
त्रियोनिः कीर्त्यते तेन त्रयमेतद्विवादकृत् ॥

यथासम्भवं सर्वत्रेति शेषः ॥

द्व्यभियोगमाह—

द्व्यभियोगस्तु विज्ञेयः शङ्कातत्त्वाभियोगतः ।

अत्रैवोदाहरणमाह—

शङ्काऽसतां तु संसर्गात्तत्त्वं होढादिदर्शनात् ।

कितवस्तेनाद्यसद्भिस्संसर्गात् साधावपि स्तेयादिशङ्का भवति । होढादिदर्शनमपहृतैकदेशादिलिङ्गोपलम्भः, प्रत्यक्षदर्शनं वा । उदाहणमात्रमसतां संसर्गस्सतामप्याढ्यानां संसर्गे सति निक्षे-

पादिशङ्कासम्भवात् । अतो नैतल्लक्षणं शङ्काभियोगस्य ॥

द्विद्वारमाह—

पक्षद्वयाभिसम्बन्धात् द्विद्वारस्समुदाहृतः ।
पूर्ववादस्तयोः पक्षः प्रतिपक्षस्तदुत्तरः ॥

वाद इति शेषः । द्वारं कार्यारम्भप्रवृत्तिः ॥

द्विगतिमाह—

भूतच्छलानुसारित्वात् द्विगतिस्समुदाहृता ।
भूतं तत्त्वार्थसंयुक्तं प्रमादाभिहितं छलमिति ॥

हारीतोपि कांश्चिद्भेदानाह—

एकमूलो द्विरुत्थानो द्विस्कन्धो द्विफलस्तथा ॥

इति । कात्यायनस्तुतान्व्याचष्टे—

साध्यवादस्य मूलं स्याद्वादिना यन्निवेदितम् ।
देयाप्रदानं हिंसा चेत्युत्थानद्वयमुच्यते ॥
धर्मशास्त्रार्थशास्त्रे तु स्कन्धद्वयमुदाहृतम् ।
जयश्चैवावसायश्च द्वे फले समुदाहृते ॥

इति । अवसायः पराजयः ।

तथाऽन्योपि भेदस्तेनैव दर्शितः—

पूर्वपक्षश्चोत्तरश्च प्रत्याकलितमेव च ।
क्रियापादश्च तेनायं चतुष्पात्समुदाहृतः ॥

इति । प्रत्याकलितमुत्तराङ्गीकारानन्तरमपि विवदमानयोः कस्य अत्र क्रियोपन्यसनं न्याय्यमिति प्राड्विवाकादीनां विमर्शनम् ।

क्रिया लिखितादिप्रमाणं, तन्निर्देशः क्रियापादः। विवादात्मक-व्यवहारपर्यवसानभागतया प्रत्याकलितक्रिययोरपि व्यवहारत्वा च्चतुष्पात्समुदाहृत इत्युक्तम् ॥

अत एव सङ्ग्रहकारेणापि पर्यवसानभागस्यापि व्यव हारत्वमुक्तम्—

परस्परं मनुष्याणां स्वार्थविप्रतिपत्तिषु।
वाक्यान्न्याय्यव्यवस्थानं व्यवहार उदाहृतः॥

इति। केचित्—उपन्यस्ते प्रमाणे प्रमाणाभावशङ्कापनोदकं जयपराजयनिर्णयफलकं विमर्शनं प्रत्याकलितमाहुः। तन्मते पाद-सङ्ख्यैव हि विवक्षिता, न तु क्रमः। प्रत्याकलितपादस्य तुरीय-त्वापातात्। यत्तु याज्ञवल्क्येनोक्तम्—

तत्सिद्धौ सिद्धिमाप्नोति विपरीतमतोऽन्यथा।

इति। तत्रापि सिद्धिशब्देन सिद्धिफलकं प्रत्याकलितमुच्यते। न पुनर्जयपराजयावधारणरूपम्, तस्य संप्रतिपत्त्युत्तरेऽपि सत्त्वात्, द्विपात्संप्रतिपत्तिष्विति वचनविरोधप्रसङ्गात्। तस्मात्तत्कात्याय नवचनसमानार्थतैव याज्ञवल्कीयस्य। अन्ये पुनरस्य वचनस्य—

भाषोत्तरक्रियासाध्यसिद्धिभिः क्रमवार्तिभिः।
आक्षिप्तचतुरंशस्तु चतुष्पादभिधीयते॥

इति स्मृत्यन्तरवचनेन समानार्थतां वर्णयन्ति। संप्रतिपत्त्यु त्तरे तु साधनानिर्देशात्, प्रतिज्ञातार्थस्य असाध्यत्वाच्च न

साध्यसिद्धिलक्षणः पादोऽस्तीति द्विपात्संप्रतिपत्तिष्विति वचन-
विरोधोपि नास्तीति च वदन्ति ।

अत्र मते पादक्रमोपि स्मृत्यन्तरे दर्शितः —

भाषापादस्तु तत्राद्यो द्वितीयश्चोत्तरस्तथा ।
क्रियापादस्तथा चान्यः चतुर्थो निर्णयः स्मृतः ॥

इति । इति स्मृतिचन्द्रिकायां व्यवहारभेदाः.

अथ निर्णेतृनिर्णयः

अत्र बृहस्पतिः—

एकस्त्वनेकधा प्रोक्तो व्यवहारो मनीषिभिः ।
तस्य निर्णयकृद्राजा ब्राह्मणश्च बहुश्रुतः ॥

इति । ब्राह्मणः प्राड्विवाकाख्यः । तथाच स एव—

विवादे पृच्छति प्रश्नं प्रतिप्रश्नं तथैव च ।
प्रियपूर्वं प्राग्वदति प्राड्विवाकस्ततस्तु सः ॥

इति । पूर्वोत्तरपक्षौ पृच्छतीति प्राट् । निर्णयं च विशेषेण वक्तीति विवाक इति यौगिकी तस्य संज्ञेत्यर्थः ।

नारदेनापि ब्राह्मणे बहुश्रुतत्वं प्रपञ्चयता विधाना-
न्तरेण इयं संज्ञा दर्शिता—

अष्टादशपदाभिज्ञः तद्भेदाष्टसहस्रवित् ।
आन्वीक्षक्यादिकुशलः श्रुतिस्मृतिपरायणः ॥
विवादसंश्रुतं धर्मं पृच्छति प्रकृतं मतम् ।
विवेचयति यस्तस्मात्प्राड्विवाकस्तु स स्मृतः ॥

इति । एवमुभाभ्यामपि यौगिक्याख्योक्तैवार्थादस्य कार्य-मप्युक्तम् ।

उक्तं च साक्षादपि नारदेन—

यथा शल्यं भिषक्कायादुद्धरेद्यन्त्रयुक्तितः ।
प्राड्विवाकस्तथा शल्यमुद्धरेद्व्यवहारतः ॥

इति । ब्राह्मणश्चेति चशब्दो निर्णेत्रन्तरसमुच्चयार्थः ।

अत एव मनुः—

येषु स्थानेषु भूयिष्ठं विवादं चरतां नृणाम् ।
धर्मं शाश्वतमाश्रित्य कुर्युस्तेषां विनिर्णयम् ॥

इति । येषु स्थानेष्वष्टादशपदेष्वित्यर्थः ।

कात्यायनोपि—

सप्राड्विवाकस्सामात्यः सब्राह्मणपुरोहितः ।
ससभ्यः प्रेक्षको राजा स्वर्गे तिष्ठति धर्मतः ॥

इति । प्राड्विवाकः पूर्वोक्तलक्षणः तेन सह वर्तमानः सप्राड्विवाकः । एवं सामात्य इत्यादावपि वक्ष्यमाणसङ्ख्यानुसारेण विग्रहः ।

अमात्यस्य पुनर्लक्षणमुक्तं व्यासेन—

सर्वशास्त्रार्थवेत्तारमलुब्धं न्यायभाषिणम् ।
विप्रं प्राज्ञं क्रमायातममात्यं स्थापयेद्द्विजम् ॥

इति । सत्यपि विप्रग्रहणे पुनर्द्विजग्रहणमुक्तलक्षणान्वितविप्राभावे

तल्लक्षणं क्षत्रियं वैश्यं वाऽमात्यं स्थापयेत् । न तु शूद्रमिति दर्शयितुम् ।

यत आह स एव—

द्विजान्विहाय यः पश्येत्कार्याणि वृषलैस्सह ।
तस्य प्रक्षुभ्यते राष्ट्रं बलं कोशं च नश्यति ॥

इति । अमात्यमित्येकवचनमुपलक्षणमात्रं उद्देश्यगतत्वात्,

मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतः प्रविशेत्सभाम् ।

इति मनुना बहुभिर्मन्त्रिभिस्सह सभाप्रवेशविधानाच्च । मन्त्रज्ञैरिति विशेषणोपादानं कार्यदर्शनोपयोगिमन्त्रालोचकत्वेन तेषामस्त्यत्रोपयोग इति प्रतिपादयितुम् ।

तथा ब्राह्मणेऽपि बहुत्वमुक्तं तेनैव—

व्यवहारान्दिदृक्षुस्तु ब्राह्मणैस्सह पार्थिवः ।

इति पूर्वार्धेन । ब्राह्मणैर्विद्वद्भिरिति शेषः ।

तथाच याज्ञवल्क्यः—

व्यवहारान्नृपः पश्येद्विद्वद्भिर्ब्राह्मणैस्सह ।

इति । यद्यप्येषां विद्वत्तया ब्राह्मणत्वबहुत्वाभ्यां सभायां च साधुत्वेन सर्वेभ्यो न भेदः । तथाऽप्यनियुक्तत्वेन तेभ्यो भेदो व्यवसेयः । ते हि नियुक्ताः ।

अत एव वसिष्ठः—

नियुक्तो वाऽनियुक्तो वा धर्मज्ञो वक्तुमर्हति ।
दैवीं वाचं स वदति यश्शास्त्रमुपजीवति ॥

यत्तु नारदेनोक्तम्—

नानियुक्तेन वक्तव्यं व्यवहारे कथंचन ।

नियुक्तेन तु वक्तव्यमपक्षपतितं वचः ॥

इति । तद्यदृच्छया कार्यान्तरवशाद्वा आगतानियुक्तविषयम् । अन्यथा पूर्वोक्तवचनविरोधात्, ब्राह्मणानां सहायत्वनिर्वाहाय कार्यान्तराक्षेपापत्तेश्च । पुरोहितस्त्वेक एव ।

तथाच व्यासः—

राजा पुरोहितं कुर्यादुदीच्यं ब्राह्मणं हितम् ।
श्रुताध्ययनसम्पन्नमलुब्धं सत्यवादिनम् ॥

इति । एकत्वमत्र विवक्षितं, यूपं च्छिनत्तीतिवदुत्पाद्यगतत्वात् । हितमिति वदन् राज्ञ उच्छृङ्खलप्रवृत्तिर्दण्ड्यादण्ड्येषु पुरोहितेन निवार्येति दर्शयति । अत एव वसिष्ठेन राज्ञो दण्डशास्त्रार्थातिक्रमे पुरोहितस्यापि प्रायश्चित्तमुक्तम्—

"दण्ड्योत्सर्गे राजैकरात्रमुपवसेत्, त्रिरात्रं पुरोहितः । कृच्छ्रं अदण्ड्यदण्डने पुरोहितः, त्रिरात्रं राजा" इति ।

सभ्याः पुनर्बहवः इति । तथाच नारदः—

राजा तु धार्मिकान् सभ्यान् कुर्वीत सुपरीक्षितान् ।

व्यवहारधुरं वोढुं ये शक्तास्सद्गवा इव ॥

इति । सभ्यान् कुर्वीत व्यवहारदर्शनार्थम् । सभायां स्थितिं यथा न त्यजन्ति तथाऽर्थदानमानप्रभृत्युपायेन नियुञ्जीतेत्यर्थः । व्यवहारधुरं वोढुं के शक्ता इत्यपेक्षिते याज्ञवल्क्यः—

श्रुताध्ययनसंपन्ना धर्मज्ञास्सत्यवादिनः ।
राज्ञा सभासदः कार्याः रिपौ मित्रे च ये समाः ॥

इति । तेऽपि ब्राह्मणा एव ।

तथा च कात्यायनः—

स तु सभ्यैः स्थिरैर्युक्तः प्राज्ञैः मौलैर्द्विजोत्तमैः ।
धर्मशास्त्रार्थकुशलैरर्थशास्त्रविशारदैः ॥

इति । अत्रवर्जनीयानाह बृहस्पतिः—

देशाचारानभिज्ञा ये नास्तिकाश्शास्त्रवर्जिताः ।
उन्मत्तक्रुद्धलुब्धार्ताः न प्रष्टव्या विनिर्णये ॥

इति । तथसा ङ्ख्यानियममप्याह स एव—

लोकवेदाङ्गधर्मज्ञाः सप्त पञ्च त्रयोपि वा ।
यत्रोपविष्टा विप्रास्स्युः सा यज्ञसदृशी सभा ॥

इति । अत्र प्राड्विवाकादीनामर्थार्थितया ऋत्विग्वत्सहायमात्रं, नाधिकारः । अधिकारस्तु व्यवहारदर्शने राज्ञ एवेति मन्तव्यम् । अत एवात्र सप्राड्विवाक इत्यादिना तस्यैवाप्राधान्येन निर्देशो नेतरेषाम्, फलसम्बन्धोपि तस्यैवोक्तो न त्वन्येषाम् । तथाऽकरणे दोषः, स्मृतिबलान्नित्याधिकारोपि राज्ञ एव ।

अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
अयशो महदाप्नोति नरकं चैव गच्छति ॥

इति मनुना राज्ञ एव दोषस्मरणात् । अत एव च राजेतरेषां सभाप्रवेशनियमः तेनैव दर्शितः—

सभा वा न प्रवेष्टव्या वक्तव्यं वा समञ्जसम् ।
अब्रुवन् विब्रुवन् वाऽपि नरो भवति किल्बिषी ॥

राज्ञः पुनस्सभाप्रवेशनियमो बृहस्पतिना दर्शितः—

राजा कार्याणि संपश्येत् सद्भिरेव त्रिभिर्वृतः ।
सभामेव प्रविश्याग्र्यामासीनस्स्थित एव वा ॥

इति। सभ्यैस्त्रिभिरेव वृतो न त्वेकेन द्वाभ्यां वा वृत इत्यर्थः। अतो न प्रागुक्तसभ्यसङ्ख्याविरोधः । अतो राजसूय इव व्यवहार-दर्शने राज्ञ एवाधिकार इति सिद्धम् । राजशब्देन चात्र क्षत्रजातीयो वाऽन्यजातीयो वाऽभिषिक्तो वा अनभिषिक्तो वा प्रजापरिपालनादिराज्यकर्ता गौणवृत्त्या प्रतिपाद्यते, न पुनः राज्ञः कर्म राज्यमिति शाब्दस्मृतेः, बाहुजजातौ राजशब्दो मुख्य इत्यवेष्टिन्यायाद्राजा राजसूयेनेतिवत् क्षत्रिय एव । आर्याणां मन्वादीनां राजशब्दप्रयोगो राज्यकर्तरि गौण इत्यवेष्ट्यधि-करण एवोक्तत्वादत एव बृहस्पतिना नृपतिमात्रस्य सभाप्रवे-शोऽभिहितः—

प्रातरुत्थाय नृपतिः शौचं कृत्वा विधानतः ।
गुरून् ज्योतिर्विदो वैद्यान् देवान्विप्रान्पुरोहितान् ॥
यथार्हमेतान् संपूज्य सुपुष्पाभरणाम्बरैः ।
अभिवन्द्य च गुर्वादीन् सुमुखः प्रविशेत्सभाम् ॥

इति। अत एव याज्ञवल्क्येनापि व्यवहारदर्शनं तस्यैव विहितम्— व्यवहारान्नृपः पश्येदिति । यत्तु प्रजापतिनोक्तम्—

राजाऽभिषेकसंयुक्तो ब्राह्मणो वा बहुश्रुतः ।
धर्मासनगतः पश्येद्व्यवहाराननुल्बणः ॥

इति, अनुल्बणः अनुद्धत इत्यर्थः । एतदपि राज्ञोऽभिषिक्तस्य व्यवहारदर्शनं कर्तव्यमिति विधानार्थं न पुनरितरस्य प्रतिषेधार्थं, तथात्वे परिसङ्ख्यापत्तेः । अत एवानन्तरमेवोक्तं तेनैव—

एवं क्षत्रियसामन्ताः स्वदेशेषु पृथक्पृथक् ।
इतरेषां नृपाणां तु कुर्याद्ब्राह्मणपुंगवः ॥

इति । धर्मासनगता अनुल्बणास्सन्तः क्षत्रियसामन्ताः व्यवहारं पश्येयुः । इतरे पुनः नृपाः ब्राह्मणवैश्यादिजातीयाः स्वाधिकारसिद्धये ब्राह्मणश्रेष्ठमेव सदा व्यवहारद्रष्टारं कुर्युरित्यर्थः । यत्पुनस्तेन—'ब्राह्मणो वा बहुश्रुतः' इति पक्षान्तरमुक्तं, तदपि न ब्राह्मणस्याधिकारप्रतिपादनपरं, किंतु–विनाऽपि राज्ञा बहुश्रुतः प्राड्विवाको राजनियोगात् पश्येदित्येवंपरं, ब्राह्मणस्य नास्त्यधिकारो व्यवहारदर्शन इति प्रागेव दर्शितत्वात् । अत एव विष्णुः—

'व्यवहारदर्शने ब्राह्मणं वा नियुञ्ज्यात्'

इति । अनेनैवाभिप्रायेण बृहस्पतिरपि—

राजा कार्याणि संपश्येत् प्राड्विवाकोऽथवा द्विजः ।
न्यायाङ्गान्यग्रतः कृत्वा सभ्यशास्त्रमते स्थितः ॥

इति । एतच्च पक्षान्तरं यदा नृपतिः स्वयं न पश्यति तदैव ।

तथाच मनुः—

यदा स्वयं न कुर्यात्तु नृपतिः कार्यदर्शनम् ।
तदा नियुञ्ज्याद्विद्वांसं ब्राह्मणं कार्यदर्शने ॥

इति । विद्वांसं बहुश्रुतमित्यर्थः । अत एव कात्यायनः—

एकशास्त्रमधीयानो न विद्यात्कार्यनिश्चयम् ।
तस्माद्बह्वागमः कार्यो विवादेपूत्तमो नृपैः ॥

इति । बह्वागमग्रहणं गुणान्तरस्यापि प्रदर्शनार्थम् । तथा चोक्तम्—

अक्रूरो मधुरस्स्निग्धः क्षमायातो विचक्षणः ।
उत्साहवानलुब्धश्च वादे योज्यो नृपेण तु ॥

इति । कात्यायनेनापि—

यदा न कुर्यान्नृपतिः स्वयं कार्यविनिर्णयम् ।
तदा तत्र नियुञ्जीऽत ब्राह्मणं शास्त्रपारगम् ॥
दक्षं कुलीनमध्यस्थमनुद्वेगकरं स्थिरम् ।
परत्रभीरुं धर्मिष्ठमुद्युक्तं क्रोधवर्जितम् ॥

इति। यदा कार्यान्तरविशेषादिति शेषः। तथाच याज्ञवल्क्यः—

अपश्यता कार्यवशात् व्यवहारान्नृपेण तु ।
सभ्यैस्सह नियोक्तव्यो ब्राह्मणस्सर्वधर्मवित् ॥

इति । व्यवहारदर्शनात् गुरुतरकार्यान्तरव्यग्रत्वेन व्यवहारानपश्यता नृपेण सभ्यैस्त्रिभिरेव सह नियोक्तव्यः प्राड्विवाको नामामात्यादिभिस्सहेत्यर्थः । अत एव मनुः—

सोऽस्य कार्याणि संपश्येत् सभ्यैरेव त्रिभिर्वृतः ।
सभामेव प्रविश्याग्र्यामासीनः स्थित एव वा ॥

इति । सभ्यैरेवेत्यवधारणमन्यनिवृत्त्यर्थम् । त्रिभिरिति च पञ्चसप्तसङ्ख्यानिवृत्त्यर्थम् । अनेनैवाभिप्रायेण व्यासोपि—

विवादानुगतं दृष्ट्वा ससभ्यस्तं प्रयत्नतः ।
विचारयति येनासौ प्राड्विवाकस्ततस्स्मृतः ॥

इति । अत्र कात्यायनः—

ब्राह्मणो यत्र न स्यात्तु क्षत्रियं तत्र योजयेत् ।
वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत् ॥

इति । ब्राह्मणो विद्वानिति शेषः । तथाच स एव—

यत्र विप्रो न विद्वान् स्यात् क्षत्रियं तत्र योजयेत् ।
वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत् ॥

इति । क्षत्रियमित्यत्र विद्वांसमिति विद्वद्ब्राह्मणस्थाने विधानाद्गम्यते । यत्नेनेति वदन्नवर्जने गुर्वी हानिर्भवतीति दर्शयति । उदिता च सा मनुना—

यस्य राज्ञस्तु कुरुते शूद्रो धर्मविवेचनम् ।
अस्य सीदति तद्राष्ट्रं पङ्के गौरिव पश्यतः ॥

इति । तेन धर्मशास्त्रज्ञक्षत्रियवैश्ययोरलाभेऽपि शूद्रो वर्ज्यः । तथाचतेनैवोक्तम्—

जातिमात्रोपजीवी वा कामं स्याद्ब्राह्मणब्रुवः ।

धर्मवक्ता तु नृपतेः न तु शूद्रःकथंचन ॥

इति। जातिमात्रोपजीवी न विद्याव्रतोपजीवी। व्यासस्त्वमात्यादिस्थानेऽपि शूद्रपरिग्रहे दोषमाह—

द्विजान् विहाय यः पश्येत् कार्याणि वृषलैस्सह।
तस्य प्रक्षुभ्यते राष्ट्रं बलं कोशं च नश्यति ॥

इति। अतस्तद्दोषपरिहारायामात्यादिस्थानेऽपि शूद्रान्वर्जयेदित्यभिप्रायः। तथा राष्ट्ररञ्जनार्थं राज्ञा कतिपयैर्वणिग्भिरपि सह संसदि स्थातव्यमित्याह कात्यायनः—

कुलशीलवयोवृत्तिवित्तवद्भिरमत्सरैः।
वणिग्भिः स्यात्कतिपयैः कुलभूतैरधिष्ठितम् ॥

इति। कुलभूतैः बृन्दभूतैरित्यर्थः। तथा तेषां कार्यमप्याह स एव—

श्रोतारो वणिजस्तत्र कर्तव्या न्यायदर्शने ॥

इति। तथा राज्ञा गणकलेखकावपि कर्तव्यावित्याह बृहस्पतिः—

शब्दाभिधानतत्त्वज्ञौ गणनाकुशलौ शुची।
नानालिपिज्ञौ कर्तव्यौ राज्ञा गणकलेखकौ ॥

इति। व्यासोपि—

त्रिस्कन्धज्यौतिषाभिज्ञं स्फुटप्रत्ययकारकम्।
श्रुताध्ययनसम्पन्नं गणकं योजयेन्नृपः ॥
स्फुटलेखं नियुञ्जीत शब्दक्षेपणिकं शुचिम्।
स्पष्टाक्षरं जितक्रोधमलुब्धं सत्यवादिनम् ॥

इति । त्रिस्कन्धज्यौतिषाभिज्ञं होरा गणितं संहितेतिस्कन्धत्रयसहितज्योतिश्शास्त्राभिज्ञमित्यर्थः । श्रुताध्ययनसंपन्नमिति विशेषणं गणकस्य द्विजातित्वख्यापनार्थम् । शूद्रादेस्तदसम्भवात् । लेखकोपि तत्साहचर्याद्विज एव । अत एव साध्यपालस्य द्विजत्वपरिहारार्थं

साध्यपालस्तु कर्तव्यो राज्ञा साध्यस्य साधकः ।
क्रमायातो दृढश्शूद्रः सभ्यानां च मते स्थितः ॥

इति शूद्रग्रहणं तेनैव कृतम् । साध्यस्यार्थिप्रत्यार्थिसाक्ष्यादिनामाह्वानकार्यस्येत्यर्थः । तथाच बृहस्पतिः —

आकारणे रक्षणे च साक्ष्यर्थिप्रतिवादिनाम् ।
सभ्याधीनस्सत्यवादी कर्तव्यस्तु स्वपूरुषः ॥

इति । आकारणमाह्वानम् । स्वपूरुषः क्रमायातो यस्स सभ्याधीनः कर्तव्यो राज्ञेत्यर्थः । एवमेते श्रेष्ठनिर्णयस्थाने मन्वादिभिरुक्ते । भृगुणा तु जघन्यान्यपि निर्णयस्थानान्युक्तानि—

दश स्थानानि वादानां पञ्च चैवाब्रवीद्भृगुः ।
निर्णयं येन गच्छन्ति विवादं प्राप्य वादिनः ॥

इति । तानि च पञ्चदश स्थानानि तेनैव दर्शितानि—

आरण्यास्तु स्वकैः कुर्युः सार्थिकास्सार्थिकैस्स्मृताः ।
सैनिकास्सैनिकैरेव ग्रामेऽप्युभयवासिभिः ॥
उभयानुमतं चैव गृह्यते स्थानमीप्सितम् ।
कुलिकास्सार्थमुख्याश्च पुरग्रामनिवासिनः ॥

ग्रामपौरगणश्रेण्यः चातुर्विद्यश्च वर्गिणः ।
कुलानि कुलिकाश्चैव नियुक्ता नृपतिस्तथा ॥

इति । अत्राद्यानि पञ्च स्थानान्यारण्यादिजनविशेषाणामेव । ग्रामाकारेणावस्थिते जनविवादे समीपवासिभिर्निर्णयः । अर्थिप्रत्यर्थिनोरननुशयानुमतास्थानकुलिकसार्थमुख्यपुरग्रामवासिनो गृह्यते । ग्रामादीनि दश स्थानानि साधारणानि । ग्रामो ग्रामाकारेणावस्थितो जनः । पौरः पुरवासिनां समूहः । गणः कुलानां समूहः ।

कुलानां हि समूहस्तु गणस्संपरिकीर्तितः ॥

इति कात्यायनस्मरणात् । श्रेण्यो रजकाद्यष्टादशहीनजातयः । चातुर्विद्यः आन्वीक्षक्यादिविद्याचतुष्टयोपेतः । चातुर्विद्यश्चेति चशब्दो विद्वद्भिः पुरुषान्तरैस्सह चातुर्विद्यस्य समुच्चयार्थः ।

तस्मान्न वाच्यमेकेन विधिज्ञेनापि धर्मतः ।

इति पितामहेनैकस्य धर्मकथननिषेधात् । वर्गिणो गणप्रभृतयः—

गणाः पाषण्डपूगाश्च व्राताश्च श्रेणयस्तथा ।
समूहस्थाश्च ये चान्ये वर्ग्याख्यास्ते बृहस्पतिः ॥

इति कात्यायनस्मरणात् । बृहस्पतिग्रहणं गणादिविषयेयमाख्या पूर्वमेव प्रसिद्धेति दर्शयितुम् । आयुधधराणां समूहो व्रातः ।

नानायुधधरा व्रातास्समवेतास्तु कीर्तिताः ।

इति तेनैवोक्तत्वात् । कुलान्यर्थिप्रत्यर्थिनोस्सगोत्राणि । कुलिकाः केचनार्थिप्रत्यर्थिगोत्रजा वृद्धाः । नियुक्ताः प्राड्विवाकसहितास्त्रयस्सभ्याः । नृपतिर्ब्राह्मणादिसहितः ।

अत्र बृहस्पतिः —

प्रतिष्ठिताऽप्रतिष्ठिता मुद्रिता शास्त्रिता तथा ।
चतुर्विधा सभा प्रोक्ता सभ्याश्चैव तथाविधाः ॥

इति । आरण्यकादिस्थानत्रये या सभा सा अप्रतिष्ठिता । प्रायेण देशान्तरगमनयोग्यत्वादुभयवासिप्रभृतिषु दशसु स्थानेषु तदभावात् प्रतिष्ठिता । नियुक्तस्थानेपुनः मुद्राहस्ताध्यक्षसाहित्या मुद्रिता । नृपस्थाने तु शास्त्रनियन्तृकत्वाच्छास्त्रिता ॥

अयं च सभाविभागस्तेनैव दर्शितः—

प्रतिष्ठिता पुरे ग्रामे चला नामाऽप्रतिष्ठिता ।
मुद्रिताऽध्यक्षसंयुक्ता राजयुक्ता तु शास्त्रिता ॥

इति । अध्यक्षः प्राड्विवाकः । व्यवहारदर्शनेऽधिकृतत्वात् । तस्य च हस्ते राज्ञा स्वमुद्रा प्रतिवाद्यानयनार्थं देयेत्यत एवावगम्यते । तत्र प्रतिष्ठिता अप्रतिष्ठिता च सभा निर्णयार्थिभिरेव प्रार्थनार्थं दानमाननादिभिः कार्या । शास्त्रप्रयुक्त्या नृपतिप्रयुक्त्यभावात् सभासिद्ध्यभावात् । मुद्रिता शास्त्रिता च स्वाधिकारवशाद्राज्ञैव क्रियते, तेन तत्र निर्णयार्थिनां तत्समीपगमनमेव न सभाकरणम् ॥

अत्र च शास्त्रितसभायां सभान्तरेभ्यः प्राबल्यमाह पितामहः—

पूर्वस्थानगता वादाः धर्मतोऽधर्मतोऽपि वा ।
नृपस्थानं समाश्रित्य पूर्ववादं भजन्ति ते ॥

इति । पूर्ववादं पूर्वपक्षमित्यर्थः । नृपस्थानग्रहणं प्रचलस्थानोपलक्षणार्थम् ॥ यतस्स एवाह—

ग्रामे दृष्टः पुरं यायात् पुरे दृष्टस्तु राजनि ।
राज्ञा दृष्टः कुदृष्टो वा नास्ति तस्य पुनर्भवः ॥

इति । नारदोऽपि—

कुलानि श्रेणयश्चैव गणाश्चाधिकृतो नृपः ।
प्रतिष्ठा व्यवहाराणां गुर्वेषामुत्तरोत्तरम् ॥

इति स्मृतिचन्द्रिकायां निर्णेतृनिर्णयः

अथ धर्मस्थाने अवस्थानम्.

तत्र कात्यायनः—

धर्मशास्त्रविचारेण मूलसारविवेचनम् ।
यत्राधिक्रियते स्थाने धर्माधिकरणं हि तत् ॥

यत्र स्थाने मूलस्यावेदितस्य सारविवेचनं तत्र निष्कर्षो धर्मशास्त्रविचारेण निर्णेतृभिरधिक्रियते प्रस्तूयते, तत् स्थानं धर्मशास्त्रैरधिक्रियते । मूलसारविवेचनमत्रेति व्युत्पत्त्या धर्माधिकरणमिति । हिः प्रसिद्ध्यर्थः । एतच्च धर्माधिकरणं प्राच्यां दिशि कार्यम् ।

तथाच शङ्खः—

'धर्मस्थानं प्राच्यां दिशि तच्चाग्न्युदकैस्समवेतं स्यात्'

इति। प्राच्यां दिशि राजमन्दिरादिति शेषः । अत एव बृहस्पतिः—

दुर्गमध्ये गृहं कुर्यात् जलमध्योच्छ्रितं पृथु ।

प्राग्दिशि प्राङ्मुखीं तस्य लक्षण्यां कल्पयेत्सभाम् ॥
माल्यधूपासनोपेतां बीजरत्नसमन्विताम् ।
प्रतिमालेख्यदेवैश्च युक्तामग्न्यम्बुना तथा ॥

इति । एवं कल्पितां प्रातर्हुत्वा प्रविशेत् । तथा च मनुः—

उत्थाय पश्चिमे यामे कृतशौचस्समाहितः ।
हुत्वाऽग्निं[1] ब्राह्मणानर्च्य प्रविशेद्वै शुभां सभाम् ॥

अत्रार्च्येत्यसमासेऽपि क्त्वाप्रत्ययस्य ल्यबादेशश्छान्दसत्वादविरुद्धः । प्रविशेन्नृपतिरिति शेषः । अत एव बृहस्पतिः—

प्रातरुत्थाय नृपतिः शौचं कृत्वा समाहितः ।
गुरून् ज्योतिर्विदो वैद्यान् देवान् विप्रान् पुरोहितान् ॥
यथार्हमेतान् संपूज्य सुपुष्पाभरणाम्बरैः ।
अभिवाद्य च गुर्वादीन् सुमुखः प्रविशेत्सभाम् ॥

अत्र नृपतिः प्रविशेदित्यन्वयः । पुरोहितानिति बहुवचनं पाशानितिवत् कर्मत्वमात्रस्याभिधायकं, न तु बहुत्वस्यापि, पुरोहितस्यैकत्वात् । नृपतिरपि ब्राह्मणादिसहितः प्रविशेत् ।
तथाच मनुः—

व्यवहारादिदृक्षुस्तु ब्राह्मणैस्सह पार्थिवः ।
मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतः प्रविशेत्सभाम् ॥

---

[1] भुक्ताऽन्नं.

इति। चशब्दोत्र प्राड्विवाकपुरोहितसभ्यवणिग्गणकलेखकसाध्यपा-लहिरण्यधर्मशास्त्रैरपि सहेति ज्ञापनार्थः । तेषामपि ब्राह्मणादिवत् दर्शनोपयोगित्वात् । तत्र केषांचिदुपयोगो निर्णेतृनिर्णये दर्शितः। अत्र केषांचिदुपयोगो वक्ष्यते ॥ सभाप्रवेशे विशेषमाह संवर्तः—

लोकपालान्नमस्कृत्य प्रविश्य विपुलां सभाम् ।
प्रजानां रक्षणं कुर्यान्नृपतिः कार्यदर्शने ॥

निमित्तार्थे चेयं सप्तमी । कार्यदर्शनरूपानिमित्तेन प्रजारक्षणं कुर्यादित्यर्थः । निमित्तत्वं च तस्य प्रजारक्षणोपयोगिदुष्टप-रिज्ञानहेतुत्वेन परम्परया द्रष्टव्यम ॥

एवं सभाप्रविष्टानामर्थसिद्धोपवेशनमनूद्य केषाञ्चिद्दिङ्नियममाह बृहस्पतिः—

पूर्वामुखस्तूपविशेद्राजा सभ्या उदङ्मुखाः ।
गणकः पश्चिमास्यस्तु लेखको दक्षिणामुखः ॥
हिरण्यमग्निमुदकं धर्मशास्त्राणि चैव हि ।
तन्मध्ये स्थापयेद्राजा पुण्यानि च हितानि च ॥

इति । अन्येषां पुनर्यथासौकर्यमुपवेशनम् । नियमाभावात् । एवं राजादिभिर्दशभिर्व्यवहारसाधकाङ्गैरध्यासिता सभा यज्ञ-समेत्याह स एव—

नृपाधिकृतसभ्याश्च स्मृतिर्गणकलेखकौ ।
हेमाग्न्यम्बुस्वपुरुषास्साधनाङ्गानि वै दश ॥

एतद्दशाङ्गं करणं यस्यामध्यास्य पार्थिवः ।
न्यायात्पश्येत्कृतमतिः सा सभाऽध्वरसंमिता ॥

अधिकृतः प्राड्विवाकः स्वपुरुषस्साध्यपालः । साधनाङ्गानां कार्यमप्याह स एव—

दशानामपि चैतेषां कर्म प्रोक्तं पृथक्पृथक् ।
वक्ताऽध्यक्षो नृपश्शास्ता सभ्याः कार्यपरीक्षकाः ।
स्मृतिर्विनिर्णयं ब्रूते जयं दानं दमं तथा ॥
शपथार्थे हिरण्याग्नी तृषितक्षुब्धयोः जलम् ।
गणको गणयेदर्थं लिखेन्न्याय्यं च लेखकः ॥
प्रत्यर्थिसभ्यानयनं साक्षिणां च स्वपूरुषः ।
कुर्यादलग्नकौ रक्षेदर्थिप्रत्यर्थिनौ तदा ॥

वक्ताऽध्यक्ष इत्येतत्प्रकर्षाभिप्रायेण । 'सभ्यादिनाऽपि धर्मज्ञेनावश्यं वक्तव्यम्' इति वसिष्ठेनोक्तत्वात् । नृपश्शास्तेत्येतदप्यर्थवधदण्डकारित्वाभिप्रायेण । 'वाग्दण्डधिग्दण्डाभ्यां शासनं प्राड्विवाकेन कार्यम्' इति तेनैवाभिधानात् । तथाच– 'तस्य निर्णयकृद्राजा ब्राह्मणश्च बहुश्रुतः' इत्यभिधायाभिहितम्—

वाग्दण्डो धिग्दमश्चैव प्रायश्चित्तावुभौ स्मृतौ ।
अर्थदण्डवधावुक्तौ राजायत्तावुभावपि ॥

इति । प्रतिष्ठिताप्रतिष्ठितसभ्यानां तु धर्मस्थाने विशेषविध्यभावादनियत एव । शुभे स्थान उपविश्य विनिर्णयमात्रं कृत्वा

तैरुपरन्तव्यम् । दण्डदापनेऽर्थदापने वा तेषां अधिकाराभावात् । साहसविवादे तु तैर्निर्णमात्रमपि न कार्यम् ।

अत आह बृहस्पतिः—

राज्ञा ये विदितास्सम्यक्कुलश्रेणीगणादयः ।
साहसन्यायवर्ज्यानि कुर्युः कार्याणि ते नृणाम् ॥

इति । मुद्रिता तु सभा ब्रह्मसभातुल्येत्याह मनुः—

यस्मिन् देशे निषीन्दन्ति विप्रा वेदविदस्त्रयः ।
राज्ञश्च प्रकृतो विद्वान् ब्रह्मणस्तां सभां विदुः ॥

प्रकृतोऽधिकृतः प्राड्विवाक इति यावत् । सभ्येष्वप्यर्थ्यादिरञ्जकस्सभास्तारोऽखिललोकश्श्लाघ्यो भवतीत्याह व्यासः—

अर्थिप्रत्यर्थिनौ सभ्यान् लेखकं प्रेक्षकांश्च यः ।
धर्म्यवाक्यै रञ्जयति स सभ्यश्श्लाघ्यतामियात् ॥

तथा विवादिनां संशयहन्ता सभ्यस्तेषां प्राणद इत्याह स एव—

परस्परविसंवादं सन्देहात् कुर्वतो नरान् ।
यस्तेषां संशयच्छेत्ता स सभ्यः प्राणदः स्मृतः ॥

नरान्विवादतो निवार्येति शेषः ।

प्राणदस्य फलमाह वसिष्ठः—

यत्पुण्यमुद्धृते विप्रे म्रियमाणे जलाशयात् ।
तत्पुण्यं संशयारूढे व्यवहारात्समुद्धृते ॥
म्रियमाण इति दार्ष्टान्तिकेऽप्यनुषज्यते ।

तथा सभ्यविशेषे फलविशेषमाह बृहस्पतिः—

अज्ञानतिमिरोपेतान् सन्देहपटलान्वितान् ।
निरामयान् यः कुरुते शास्त्राञ्जनशलाकया ॥
इह कीर्तिं राजपूजां लभते स्वर्गतिं च सः ।
लोभद्वेषादिकं त्यक्त्वा यः कुर्यात्कार्यनिर्णयम् ।
शास्त्रोदितेन विधिना तस्य यज्ञफलं भवेत् ॥

ये पुनः शास्त्रोदितविधिमतिक्रम्य निर्णयं कुर्युः तेषां दोषमाह कात्यायनः—

न्यायशास्त्रमतिक्रम्य सभ्यैर्यत्र विनिश्चितम् ।
तत्र धर्मो ह्यधर्मेण हतो हन्ति न संशयः ॥

तथा अन्यायप्रवृत्तनृपत्यनिवारणेऽपि दोषस्तेनैव दर्शितः—

अधर्मतः प्रवृत्तं तु नोपेक्षेरन् सभासदः ।
उपेक्षमाणास्सनृपाः नरकं यान्त्यधोमुखाः ॥

अतस्तत्र तदनुसरणं सभासद्भिर्न कार्यमित्याह स एव—

अन्यायेनापि तं यान्तं येऽनुयान्ति सभासदः ।
तेऽपि तद्भागिनस्तस्मात् बोधनीयश्शनैर्नृपः ॥

शनैरिति वचनात्तदैव तत्प्रातिकूलबोधनं न पापभयात् कार्यम् । किन्तु सति कालान्तरे । अत एवोक्तं तेनैव—

न्यायमार्गादपेतं तु ज्ञात्वा चित्तं महीपतेः ।
वक्तव्यं तत्प्रियं तत्र न सभ्यः किल्बिषी मतः ॥

इति । मनुस्त्वन्यायेन निर्णीयमाने प्रतिषेधमकुर्वतामपि सभ्यानां दोषमाह—

यत्र धर्मो ह्यधर्मेण सत्यं चैवानृतेन वा ।
हन्यते प्रेक्षमणानां हतास्तत्र सभासदः ॥

प्रेक्षमाणानामित्यनादरे षष्ठी ।

अथ कांश्चित्सभ्याननादृत्य धर्मानिर्णेतॄणां सभ्यानामपि दोषस्तेनैव दर्शितः—

धर्मो विद्धस्त्वधर्मेण सभां यत्रोपतिष्ठति ।
शल्यं चास्य न कृन्तन्ति हतास्तत्र सभासदः ॥

शल्यानिकृन्तनं सर्वसभ्यसंमत्यभावेऽपि निश्चयः ।

तथा च नारदः—

यत्र सभ्यो जनस्सर्वः साध्वेतदिति मन्यते ।
स निश्शल्यो विवादस्स्यात्सशल्यस्स्यादतोऽन्यथा ॥

अत आत्मरक्षणार्थं सर्वथा धर्मो न हन्तव्य इत्याह मनुः—

धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः ।
तस्माद्धर्मो न हन्तव्यो मा नो धर्मो हतो वधीत् ॥

तथा वृषलत्वपरिहारार्थमपि धर्माप्रतिहतिः कार्येत्याह स एव—

वृषो हि भगवान् धर्मः तस्य यः कुरुते ह्यलम् ।
वृषलं तं विदुर्देवास्तस्माद्धर्मं न लोपयेत् ॥

अलं वारणम् । हारीतस्तु वृषलस्य नरकमाह—

अन्धो मत्स्यानिवाश्नाति निरपेक्षः सकण्टकान् ।

परोक्षमर्थं वैकल्यात् भाषते यस्सभागतः ॥

इति । अत्र नारदः—

तस्मात्सभ्यस्सभां प्राप्य रागद्वेषविवर्जितः ।
वचस्तथाविधं ब्रूयात् यथा न नरकं व्रजेत् ॥

कीदृग्विधं वचो नरकपरिहारार्थं वाच्यमित्यत आह स एव—

शुद्धेषु व्यवहारेषु शुद्धिं यान्ति सभासदः ।
शुद्धिश्च धर्मात्तेषां हि धर्ममेव वदेत्ततः ॥

तेषां व्यवहाराणाम् । कात्यायनोऽपि—

सभ्येनावश्यवक्तव्यं धर्मार्थसहितं वचः ।
शृणोति यदि नो राजा स्यात्तु सभ्यस्ततोऽनघः ॥

अर्थसहितमर्थशास्त्रमर्थोपेतम् । मनुरपि—

राजा भवत्यनेनास्तु मुच्यन्ते हि सभासदः ।
एनो गच्छति कर्तारं निन्दार्हो यत्र निन्द्यते ॥
सभा वा न प्रवेष्टव्या वक्तव्यं वा समञ्जसम् ।
अब्रुवन्विब्रुवन्वाऽपि नरो भवति किल्बिषी ॥

यत्पुनस्तेनोक्तम्—

सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात्सत्यमप्रियम् ।

इति तन्निर्णेतृव्यतिरिक्तविषयम् । तत्र पक्षपातेनाप्रियोक्तिरपि कार्यैवेत्युक्तत्वात् । एवं हिताहितप्राप्तिपरिहारोपायोपदर्शनेऽपि योऽसन्तोत्कटरागादिवशात् सभ्यस्स्मृत्याचारविरुद्धं वादनि-

र्णयं विदधाति तस्य दण्डमाह नारदः—

रागादज्ञानतो वाऽपि यो लोभादन्यथा वदेत् ।
सभ्योऽसभ्यस्स विज्ञेयः तं पापं विनयेद्भृशम् ॥

कात्यायनोऽपि—

स्नेहादज्ञानतो वाऽपि मोहाद्वा लोभतोपि वा ।
तत्र सभ्योऽन्यथावादी दण्ड्योऽसभ्यस्स्मृतो हि सः

स्नेहो रागः। मोहः विपरीतज्ञानम्। अत्र रागलोभवशात् भयाद्वा अन्यथावादी विवादपराजयनिबन्धनदमाद्विगुणं दमं दण्ड्य इत्याह याज्ञवल्क्यः—

रागाल्लोभाद्भयाद्वाऽपि स्मृत्यपेतादिकारिणः ।
सभ्याः पृथक्पृथग्दण्ड्याः विवादाद्विगुणं दमम् ॥

विवादे यो दमो भवति पराजये तद्विगुणं दाप्य इति बहुव्याख्यातृसंमतोऽर्थो ग्राह्यः, न पुनर्विवादास्पदीभूताद्द्रव्याद्विगुणमिति कस्यचिद्व्याख्यातुरर्थः अयुक्तत्वात्। अयुक्तत्वं च बहुव्याख्यातृभिरुक्तं, विस्तरभयान्नोच्यते । एवं मोहवशादप्यन्यथावादिनो दण्ड्या इत्याह कात्यायनः—

कार्यस्य निर्णयं सम्यक् ज्ञात्वा सभ्यस्ततो वदेत् ।
अन्यथा नैव वक्तव्यं वक्ता द्विगुणदण्डभाक् ॥

अज्ञानक्रोधवशादन्यथा वादिनस्तु विशेषोक्त्यभावात् सामान्येन सभ्यसम्बन्धितया बृहस्पत्युक्तं तत्र व्यवतिष्ठते—

अन्यायवादिनस्सभ्यास्तथैवोत्कोचजीविनः ।

विश्वस्तवञ्चकाश्चैव निर्वास्यास्सर्वे एव ते ॥

इति । उत्कोचजीविन इत्येतत्सभ्येतरविषयम् ।

'कूटसाक्षिणां सर्वस्वापहारः, उत्कोचजीविनां सभ्यानां च' इति विष्णुना सभ्यविषये सर्वस्वापहारस्योक्तत्वात् । यत्तु कैश्चिदज्ञानादिनाऽन्यथावादे 'मोहात्सहस्रं दण्ड्यस्तु' इत्यादिमनुवचनोक्तद्विशतादिदण्डवैचित्र्यमुक्तं तद्याज्ञवल्क्यवचनतो रागादावेव द्विगुणो दम इति नियमादज्ञानादौ दण्डान्तरं मृग्यमित्येवंपरं, न पुनर्मनुवचनबलेन द्विशतादिदण्डप्रतिपादनार्थम् ।

एतानाहुः कौटसाक्ष्ये प्रोक्तान् दण्डान् मनीषिणः ।

इत्युपसंहारतो मनुवचनस्य साक्ष्यपराधविषयत्वात् । तस्मादज्ञानादौ बार्हस्पत्यवचनविहितो दमः सभ्यविषये त्वनुसंधेयः । प्राड्विवाकस्सभ्या वा व्यवहारनिर्णयात् पूर्वं विजनेऽर्थिना सह संभाषणमात्रादपि दण्ड्या इत्याह कात्यायनः—

अनिर्णीते तु यद्यर्थे संभाषेत रहोऽर्थिना ।
प्राड्विवाकोऽथ दण्ड्यस्स्यात् सभ्याश्चैव न संशयः ॥

निर्णयादूर्ध्वं सभ्यदोषपरिज्ञाने तु दमं दाप्य इत्याह स एव—

सभ्यदोषात्तु यन्नष्टं देयं सभ्येन तत्तदा ।
कार्यं तु कार्यिणामेव निश्चितं न विचालयेत् ॥

दुष्टसभ्येनापि निर्णीतं कार्यं न परावर्तयेत्, किंतु दौष्ट्यात् नष्टं दापयेदित्यर्थः । सभ्यदोषानाह नारदः—

एते सभ्यास्सभां गत्वा तूष्णीं ध्यायन्त आसते ।
यथाप्राप्तं न चेदूचुः सर्वे तेऽनृतवादिनः ॥

प्राप्तं युक्तमित्यर्थः । तथा—

न सा सभा यत्र न सन्ति वृद्धाः
वृद्धा न ते ये न वदन्ति धर्मम् ।
नासौ धर्मो यत्र न सत्यमस्ति
न तत्सत्यं यच्छलेनानुविद्धम् ॥

इति स्मृतिचन्द्रिकायां धर्मस्थानेऽवस्थानम् .

अथ दर्शनविधिः

तत्र कात्यायनः—

विनीतवेषो नृपतिः सभां गत्वा समाहितः ।
आसीनः प्राङ्मुखस्स्थित्वा पश्येत्कार्याणि कार्यिणाम् ।
सह त्रैविद्यवृद्धैश्च मन्त्रज्ञैश्चैव मन्त्रिभिः ॥

अत्रासनस्थित्योः युगपत्कर्तुमशक्यत्वाद्विकल्पः । अत एव मनुः—

तत्रासीनस्स्थितो वाऽपि पाणिमुद्यम्य दक्षिणम् ।
विनीतवेषाभरणः पश्येत्कार्याणि कार्यिणाम् ॥

अयं चासनस्थित्योर्विकल्पः शयनचङ्क्रमणनिषेधार्थः । 'दक्षिणं पाणिमुद्यम्य' इति प्रावरणार्थं वस्त्रमप्युपवीतवदेव ब्राह्मणसभायां धार्यमिति नियमार्थम् । तथाच स्मृत्यन्तरम्—'ब्राह्मणानां तु संसदि' इति, 'दक्षिणं बाहुमुद्धरेत्' इति । 'विनीतवेषाभरणः' इत्यौद्धत्यनिषेधार्थम् । तथाच प्रजापतिः—

राजाऽभिषेकसंयुक्तो ब्राह्मणो वा बहुश्रुतः ।
धर्मासनगतः पश्येद्व्यवहाराननुल्बणः ॥

अनुल्बणोऽनुद्धतः, उल्बणग्रहणं मत्सरस्यापि प्रदर्शनार्थम् । तथाच नारदः—

तस्माद्धर्मासनं प्राप्य राजा विगतमत्सरः ।
समस्स्यात्सर्वभूतेषु बिभ्रद्वैवस्वतं व्रतम् ॥

वैवस्वतं व्रतं यमव्रतम् । तच्च तेनैव दर्शितम्—

यथा यमः प्रियद्वेष्यौ प्राप्ते काले नियच्छति ।
तथा राज्ञा नियन्तव्याः प्रजास्तद्धि यमव्रतम् ॥

याज्ञवल्क्योपि—

तस्माद्यम इव स्वामी स्वयं हित्वा प्रियाप्रिये ।
वर्तेत धर्म्यया वृत्त्या जितक्रोधो जितेन्द्रियः ॥

क्रोधग्रहणं लोभस्याापि प्रदर्शनार्थम् । तथाच स एव—

व्यवहारान्नृपः पश्येद्विद्वद्भिर्ब्राह्मणैस्सह ।
धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः ॥

धर्मशास्त्रानुसारेणेत्येतदौशनसाद्यर्थशास्त्रानुसारस्य निवृत्त्यर्थं, न पुनर्धर्मशास्त्रान्तर्गतराजनीत्याद्यर्थशास्त्रानुसरणस्यापि, यत आह नारदः—

धर्मशास्त्रार्थशास्त्राभ्यामविरोधेन पार्थिवः ।
समीक्षमाणो निपुणं व्यवहारगतिं नयेत् ॥

धर्मशास्त्राणि च पितामहेन दर्शितानि—

वेदास्साङ्गास्तु चत्वारो मीमांसा स्मृतयस्तथा ।
एतानि धर्मशास्त्राणि पुराणं न्यायदर्शनम् ॥

प्रमाणान्तरदृष्टार्थविषया स्मृतिरर्थप्रधानत्वादर्थशास्त्रतयाऽभिप्रेता, सा च भविष्यत्पुराणे दर्शिता—

षाड्गुण्यस्य प्रयोगश्चाप्रयोगः कार्यगौरवात् ।
सामादीनामुपायानां योगो व्याससमासतः ॥
अध्यक्षाणां च निक्षेपः कण्टकानां निरूपणम् ।
दृष्टार्थेयं स्मृतिः प्रोक्ता ऋषिभिर्गरुडाग्रज ॥

इति । दृष्टार्थायाः स्मृतेरुदाहरणमात्रमेतत् । एवंच सन्धिविग्रहादिदृष्टार्थविषया स्मृतिरर्थशास्त्रमित्यर्थः । एतच्चोभयविधशास्त्रानुसरणं तयोः मिथो विरोधाभाव एव । तथाच नारदः—

यत्र विप्रतिपत्तिस्स्याद्धर्मशास्त्रार्थशास्त्रयोः ।
अर्थशास्त्रोक्तमुत्सृज्य धर्मशास्त्रोक्तमाचरेत् ॥

अतो यत्रैकस्य जयेऽवधार्यमाणेऽर्थशास्त्रोक्तमित्रलब्धिर्धर्मशास्त्रोक्तमार्गविरोधेन भवति तत्र मित्रलब्धिविरोधेनापरस्यैव जयावधारणं कार्यम् । यत्र पुनर्धर्मस्मृत्योर्विरोधस्तत्रोक्तं याज्ञवल्क्येन—

स्मृत्योर्विरोधे न्यायस्तु बलवान् व्यवहारतः ।

इति । श्रुतिमूलस्मृत्योर्विरोधे वृद्धव्यवहारावगतसावकाशनिरवकाशत्वादितर्कबलेन यथा व्यवस्थितविषयता तयोर्ज्ञायते तथा

गृहीतव्यमित्यर्थः । एवमविरोधेऽपि न्यायावधारितशास्त्रार्थस्यै-वानुसरणं कार्यमित्याह बृहस्पतिः—

केवलं शास्त्रमाश्रित्य न कर्तव्यो विनिर्णयः ।
युक्तिहीने विचारे तु धर्महानिः प्रजायते ॥

अतस्तर्कानुगृहीतमेव शास्त्रार्थमाश्रित्य निर्णेतव्यमित्यर्थादुक्तं भवति । उक्तं च गौतमेन—

'न्यायाधिगमे तर्कोऽभ्युपायः, तेनाभ्यूह्य यथास्थानं गमयेत्'

न्यायाधिगमो धर्माधिगम इत्यर्थः । तथाच स्मृत्यन्तरम्—

यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः ।

इति । अतो न सहसा निश्चिनुयादित्याह पितामहः—

असत्यास्सत्यसङ्काशास्सत्याश्चासत्यसन्निभाः ।
दृश्यन्ते भ्रान्तिजनकास्तस्माद्युक्तं परीक्षणम् ॥

नारदोपि—

तलवद्दृश्यते व्योम खद्योतो हव्यवाडिव ।
न तलं विद्यते व्योम्नि न खद्योतो हुताशनः ॥
तस्मात्प्रत्यक्षदृष्टेऽपि युक्तमर्थात्परीक्षितुम् ।
परीक्ष्य ज्ञापयन्नर्थान् न धर्मात् परिहीयते ॥
यात्यचोरोपि चोरत्वं चोरश्चायात्यचोरताम् ।
अचोरश्चोरतां प्राप्तो माण्डव्यो व्यवहारतः ॥
सूक्ष्मो हि भगवान् धर्मो दुष्प्रेक्षो दुर्विचारणः ।
अतः प्रत्यक्षमार्गेण व्यवहारगतिं नयेत् ॥

तलमवनितलं, व्यवहारतः व्यवहाराख्यनिर्णयविशेषे इत्यर्थः। प्रत्यक्षमार्गः स्पष्टमार्गः। मनुरपि—

यथा नयत्यसृक्पातैः मृगस्य मृगयुः पदम्।
नयेत्तथाऽनुमानेन धर्मस्य नृपतिः पदम्॥
बाह्यैर्विभावयेल्लिङ्गैर्भावमन्तर्गतं नृणाम्।
स्वरवर्णेङ्गिताकारैश्चक्षुषा चेष्टितेन च॥

याज्ञवल्क्योपि—

असाक्षिके हते चिह्नैर्युक्तिभिश्चागमेन च।
द्रष्टव्यो व्यवहारस्तु कूटचिह्नकृताद्भयात्॥

असाक्षिकहतविषये न क्षतादिचिह्नदर्शनमात्रेण निश्चिनुयात्, कृत्रिमक्षतादिसंभवात्। किंतु युक्त्यादिभिः परीक्षणीयमित्यर्थः। तथाच नारदः—

कश्चित्कृत्वाऽऽत्मनश्चिह्नं द्वेषात्परमुपद्रवेत्।
युक्तिहेत्वर्थसम्बन्धैस्तत्र युक्तं परीक्षणम्॥

चिह्नं व्रणादि। युक्तिरर्थापत्तिः। हेतुरनुमानम्। अर्थः प्रयोजनम्। सम्बन्धस्सन्निधिः, पूर्वकलहो वा। परीक्षणं भूतेन व्यवहारनयनार्थम्। अत एव याज्ञवल्क्यः—

छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः।
भूतमप्यनुपन्यस्तं हीयते व्यवहारतः॥

लिखितादिप्रमाणस्य यथार्थानुसारित्वनियमाभावाद्वादिप्रतिवाद्यनुपन्यस्तं परमार्थतो विद्यमानमपि व्यवहारवशाद्धीयते। यत

एव तेन प्रयत्नतो भूतानुसरणं कार्यमित्यर्थः । नारदोऽपि—

न तु शिष्टं छलं राजा मर्षयेद्धर्मसाधनः ।

भूतमेव प्रपद्येत धर्ममूला यतश्श्रियः ॥

शिष्टं अर्थिप्रत्यर्थिभिरभिहितम् । नात्र जल्पमार्गवत् पुरुषप्रतिभा अन्वेषणीया, किंतु तत्त्वानुसरणं सति संभवे कार्यमिति तात्पर्यार्थः । यदा तु सर्वदा भूतानुसरणं न शक्यते कर्तुं तदा छलानुसारेणापि साक्ष्यादिप्रमाणाधीनो निर्णयः कार्य एव । तथाच तेनैवोक्तम्—

भूतच्छलानुसारित्वात् द्विगतिस्समुदाहृता ।

इति । गौतमेनाप्युक्तम्—

'विप्रतिपत्तौ साक्षिनिमित्ता सत्यव्यवस्था'

इति । साक्षिनिमित्तेति प्रमाणोपलक्षणार्थम् । अत एव मनुः—

प्रत्यहं देशदृष्टैश्च शास्त्रदृष्टैश्च हेतुभिः ।

अष्टादशसु मार्गेषु निबन्धानि पृथक्पृथक् ॥

देशदृष्टैः तत्तद्देशव्यवस्थितधर्माचारैः शास्त्रप्रसिद्धैः साक्षिद्रव्यादिदृष्टादिप्रमाणैः प्रत्यहं ऋणादानाद्यष्टादशपदेषु पृथक्पृथक् निबन्धानि कार्याणि पश्येदित्यर्थः । तत्र शास्त्रदृष्टानामभावे देशदृष्टैर्द्रष्टव्यम् । तथाच कात्यायनः—

अस्वर्ग्यलोकनाशाय परानीकभयावहा ।

आयुर्वीर्यहरा राज्ञः सति वाक्ये स्वयं कृतिः ॥

तस्माच्छास्त्रानुसारेण राजा कार्याणि साधयेत् ।

वाक्याभावेषु सर्वेषां देशदृष्टं मतं नयेत् ॥

इति । परानीकभयावहा परसैन्यतो भीत्युत्पादिका । वाक्यं शास्त्रम् । देशदृष्टस्य लक्षणमप्याह स एव—

यस्य देशस्य यो धर्मः प्रवृत्तस्सार्वकालिकः ।
श्रुतिस्मृत्यविरोधेन देशदृष्टस्स उच्यते ॥

स च राज्ञा पुस्तके निवेशितव्य इत्याह स एव—

देशस्यानुमतेनैव व्यवस्था या निरूपिता ।
लिखिता तु सदा धार्या मुद्रिता राजमुद्रया ॥
शास्त्रवद्यत्नतो रक्ष्या तां निरीक्ष्य विनिर्णयेत् ।

इति । तामिति कुलाद्यनुमताया अपि व्यवस्थायाः प्रदर्शनार्थम् । अत एव पितामहः—

यद्यदाचरति श्रेष्ठो धर्म्यं वाऽधर्म्यमेव वा ।
कुलादिदेशाचरणाच्चरित्रं तत्प्रकीर्तितम् ॥
ग्रामगोष्ठपुरश्रेणीसार्थसेनानिवासिनाम् ।
व्यवहारश्चरित्रेण निर्णेतव्यो बृहस्पतिः ॥

ग्रामादिनिवासिनां मिथोविवादविषयमेतत् । अन्यैस्सह तेषां विवादे तु शास्त्रदृष्टैरेव निर्णेतव्यम् । तथाच स एव—

देशपत्तनगोष्ठेषु पुरग्रामेषु वासिनाम् ।
तेषां स्वसमयैर्धर्मशास्त्रतोऽन्येषु तैस्सह ॥

इति । यत्र चैते हेतवो न विद्यन्ते तत्र पार्थिववचनान्निर्णय इत्याह स एव—

लेख्यं यत्र न विद्येत न भुक्तिर्न च साक्षिणः ।
न च दिव्यावतारोऽस्ति प्रमाणं तत्र पार्थिवः ॥
निश्चेतुं ये न शक्यास्स्युर्वादास्संदिग्धरूपिणः ।
तेषां नृपः प्रमाणं स्यात् स सर्वस्य प्रभुर्यतः ॥

इति । अत्र हारीतः—

धर्मशास्त्रार्थशास्त्रोक्तशिष्टाचारादिलक्षणः ।
छलेन च व्यपेतो यो व्यवहारस्स धार्मिकः ॥

धार्मिको धर्मादनपेतः । एवं पश्यतो नृपतेः फलमाह नारदः—

धर्मेणोद्धरतो राज्ञो व्यवहारान् कृतात्मनः ।
सम्भवन्ति गुणास्सप्त सप्त वह्नेरिवार्चिषः ॥

वह्नेस्सप्तार्चिष इव सप्त गुणास्सम्भवन्तीत्यर्थः । तान् गुणानाह स एव—

धर्मश्चार्थश्च कीर्तिश्च लोकपक्तिरुपग्रहः ।
प्रजाभ्यो बहुमानश्च स्वर्गस्थानं च शाश्वतम् ॥

लोकपक्तिर्लोकानुरागः । उपग्रह आश्रयणीयत्वम् ।

निग्रहेण च पापानां साधूनां सङ्ग्रहेण च ॥
द्विजातय इवेज्याभिः पूयन्ते सततं नृपाः ॥

याज्ञवल्क्योऽपि—

यो दण्ड्यान् दण्डयेद्राजा सम्यग्वध्यांश्च घातयेत् ।
इष्टं स्यात्क्रतुभिस्तेन सहस्रशतदक्षिणैः ॥

इति संचिन्त्य नृपतिः क्रतुतुल्यफलं पृथक् ।
व्यवहारान् स्वयं पश्येत् सभ्यैः परिवृतोऽन्वहम् ॥

अन्वहमित्येतच्चतुर्दश्यादिव्यतिरिक्ताहर्विषयम् । तथा च संवर्तः—

चतुर्दशी ह्यमावास्या पौर्णमासी तथाऽष्टमी ।
तिथिष्वासु न पश्येत्तु व्यवहारांस्तु नित्यशः ॥

आभ्योऽन्यास्वपि तिथिष्वावर्तनान् पूर्वमेव । तथा च बृहस्पतिः—

पूर्वाह्णे तामधिष्ठाय वृद्धामात्यानुजीविभिः ।
पश्येत्पुराणधर्मार्थशास्त्राणि शृणुयात्तथा ।
राजा कार्याणि संपश्येत् सभ्यैरेव त्रिभिर्वृतः ॥

इति । तामुक्तलक्षणां सभामित्यर्थः । पूर्वाह्णेऽप्याद्यघटिकाचतुष्टया-दूर्ध्वमेव, तस्याग्निहोत्राद्यर्थत्वात् । अत एव कात्यायनः—

आद्यादह्नोऽष्टभागाद्यदूर्ध्वं भागत्रयं भवेत् ।
स कालो व्यवहाराणां शास्त्रदृष्टः परं स्मृतः ॥

इति । अस्मिन् भागत्रयपरिमिते काले सततं पश्येत् । तथाच पितामहः—

लेखको गणकश्शास्त्रं साध्यपालस्सभासदः ।
हिरण्यमग्निरुदकमष्टाङ्गं करणं स्मृतम् ॥
तदध्यास्यानिशं पश्येत् पौरैः कार्यं निवेदितम् ।

पौरग्रहणं स्वराष्ट्रगताखिलजनोपलक्षणार्थम् । तथाच मनुः—

तत्र स्थितः प्रजास्सर्वाः प्रतिनन्द्य विसर्जयेत् ।

तत्र सभायामित्यर्थः । प्रजास्वापि स्वयं विवादमुत्पाद्य दर्शनं न कार्यम् । तथाच पितामहः—

न तु पश्येत्समुत्प्रेक्ष्य स्वयं वा पुरुषेण वा ।

पुरुषेण वेति राजप्रेरितस्य पुरुषोत्प्रेक्षितस्य प्रतिषेधोऽयं, न पुनः पुरुषमात्रोत्प्रेक्षितस्य । तथात्वेऽर्थितत्सम्बन्धिपुरुषोत्प्रेक्षितस्यापि व्यवहारदर्शनमेव प्रतिषिद्धं स्यात् । अत एव मनुना पुरुषो विशेषितः—

नोत्पादयेत् स्वयं कार्यं राजा नाप्यस्य पूरुषः ।

इति । अविवादिनां नराणामिति शेषः । तथाच नारदः—

न तु राजा वशित्वेन धनलोभेन वा पुनः ।
उत्पादयेत्तु कार्याणि नराणामविवादिनाम् ॥

कार्याणि विवादानीत्यर्थः । तथा प्रजाभ्य एवोत्पन्नमपि कार्यं कार्यिणा तत्सम्बन्धिना वा अनिवेदितं कथंचिदवगम्य न ग्राह्यमित्याह मनुः—

न चाप्रापितमन्येन ग्रसेतार्थं कथंचन ।

इति । अप्रापितमनावेदितं कथंचन रागादिनेत्यर्थः । अत एव पितामहः—

न रागेण न लोभेन न क्रोधेन ग्रसेन्नृपः ।
परैरप्रापितानर्थान् न चापि स्वमनीषया ॥

इति । परैरावेदकैः । अत्रापवादमाह स एव—

छलानि चापराधांश्च पदानि नृपतेस्तथा ।
स्वयमेतानि गृह्णीयान्नृपस्त्वावेदकैर्विना ॥

तत्र छलान्याह स एव—

पथिभङ्गी कराक्षेपी प्राकारोपरि लङ्घकः ।
निपानस्य विनाशी च तथा चायतनस्य च ॥
परिघापूरकश्चैव राजच्छिद्रप्रकाशकः ।
अन्तःपुरं वासगृहं भाण्डागारं महानसम् ॥
प्रविशत्यनियुक्तो यो भोजनं च निरीक्षते ।
विण्मूत्रश्लेष्मवातानां क्षेप्तुकामो नृपाग्रतः ॥
पर्यङ्कासनबन्धा चाप्यग्रस्थाननिरोधकः ।
राज्ञोऽतिरिक्तवेषश्च विधृतः प्रविशेत्तु यः ॥
यश्चापद्वारेण विशेदवेलायां तथैव च ।
शय्यासने पादुके च शयनासनरोहणम् ॥
राजन्यासन्नशयने यस्तिष्ठति समीपतः ।
राज्ञो विद्विष्टसेवी वाऽप्यदत्तविहितासनः ॥
वस्त्राभरणयोश्चैव सुवर्णपरिधायकः ।
स्वयंग्राहेण ताम्बूलं गृहीत्वा भक्षयेत्तु यः ॥
अनियुक्तप्रभाषी च नृपाक्रोशक एव च ।
एकवासास्तथाऽभ्यक्तः मुक्तकेशोऽवकुण्ठितः ॥
विचित्रिताङ्गस्स्रग्वी च परिधानविधूनकः ।

शिरःप्रच्छादनश्चैव छिद्रान्वेषणतत्परः ॥
आसङ्गी मुक्तकेशश्च यश्च कर्णाक्षिकर्शकः ।
दन्तोल्लेखनकश्चैव कर्णनासाविशोधकः ॥
छलान्येतानि पञ्चाशत् भवन्ति नृपसन्निधौ ॥

इति । राज्ञश्शय्यायां शयनं, तदीयासने चोपवेशनं, तत्पादुकारोहणमिति त्रीणि छलानि । वस्त्राभरणयोश्चैवेत्यत्रादत्तग्राहक इति शेषो विज्ञेयः । मुक्तकेश इति द्विःपाठो मुण्डस्यापि संग्रहार्थः । अवशिष्टं व्यक्तार्थम् । अपराधानाह नारदः—

आज्ञालङ्घनकर्तारः स्त्रीवधो वर्णसङ्करः ।
परस्त्रीगमनं चौर्यं गर्भश्चैव पतिं विना ॥
वाक्पारुष्यमवाच्यं यत् दण्डपारुष्यमेव च ।
गर्भस्य पातनं चैवेत्यपराधा दशैव तु ॥

इति । एतांश्चावेदकं विना स्वयं राजा विचारयेदिति शेषः । तथाच संवर्तः—

आसेधं पथिभङ्गं च यश्च गर्भः पतिं विना ।
स्वयमन्वेषयेद्राजा विना चैव विवादिना ॥
यस्य दृश्यस्य संपत्तिर्न दृश्येतागमः क्वचित् ।
स्वयमन्वेषयेद्राजा विना चैव विवादिना ॥
सभाभङ्गं तरुच्छेदं सस्यव्याघातमेव च ।
स्वयमन्वेषयेद्राजा विना चैव विवादिना ॥

कन्यापहारकं पापं विप्रं च पतितं तथा ।
परार्थवादसंयुक्तं स्वयं राजा विचारयेत् ॥
पङ्गभागकरशुल्कार्थे मार्गभेदकमेव च ।
स्वराष्ट्रचौर्यभीतिं च परदाराभिमर्शनम् ॥
गोब्राह्मणनिहन्तारं सस्यानां चैव घातुकम् ।
दशैतानपराधांश्च स्वयं राजा विचारयेत् ॥

एतानासेधादीन् दशापराधान् स्वयं राजा विचारयेदित्यर्थः। अत्र पथिभङ्गग्रहणं छलानां प्रदर्शनार्थं, दशापराधान्तर्गतानां केषांचिद्ग्रहणं तेषां प्रदर्शनार्थम् । सस्यघातुकग्रहणं तु पदानां प्रदर्शनार्थम् । पदानि च समस्तानि पितामहेन दर्शितानि—

उत्कर्ता सस्यघाती चाप्यग्निदश्च तथैव च ।
विध्वंसकः कुमार्याश्च निधानस्योपगोपकः ॥
सेतुकण्टकभेत्ता च क्षेत्रसञ्चारकस्तथा ।
आरामच्छेदकश्चैव गरदश्च तथैव च ॥
राज्ञो द्रोहप्रकर्ता च तन्मुद्राभेदकस्तथा ।
तन्मन्त्रस्य प्रभेत्ता च बद्धस्यैव च मोचकः ॥
भोगदण्डौ च गृह्णाति दानमुत्सेकमेव च ।
पटहाघोपणाच्छादी द्रव्यमस्वामिकं च यत् ॥
राजावलीढं द्रव्यं यद्यच्चैवाङ्गविनाशनम् ।
द्वाविंशतिं पदान्याहुः नृपज्ञेयानि पण्डिताः ॥

इति । एवं छलादीनि साक्षाद्वा स्तोभकसूचकवचनाद्वा ज्ञात्वा राज्ञा द्रष्टव्यानि । अन्यानि पुनः कार्याणि कार्थिणा तत्सम्ब-न्धिना वा ज्ञात्वा, नान्यथेत्यवगन्तव्यम् । स्तोभकसूचकयोर्ल-क्षणमाह कात्यायनः—

शास्त्रेण निन्दितं त्वर्थमुख्यश्चार्थप्रचोदितः ।
आवेदयति यः पूर्वं स्तोभकस्स उदाहृतः ॥
नृपेणैव नियुक्तो यः परदोषमवेक्षितुम् ।
नृपस्य सूचयेज्ज्ञात्वा सूचकस्स उदाहृतः ॥

अर्थमुख्योऽर्थप्रधान इत्यर्थः । अत्र हारीतः—

शास्त्राणि वर्णधर्मांस्तु प्रकृतीनां च भूपतिः ।
व्यवहारस्वरूपं च ज्ञात्वा तत्सर्वमाचरेत् ॥

प्रकृतयः पुनः पितामहेन दर्शिताः—

रजकश्चर्मकारश्च नटो बुरुड एव च ।
कैवर्तकश्च विज्ञेया म्लेच्छभिल्लौ तथैव च ॥
वेमरस्थिरविव्याधहस्तलाक्षद्रुघट्टकाः ।
कोसेदकाभीरपद्मातङ्गाण्डोपगोपकाः ॥
एताः प्रकृतयः प्रोक्ताः अष्टादश मनीषिभिः ।
वर्णानामाश्रमाणां च सर्वदा तु बहिस्स्थिताः ॥

इति । व्यवहारस्वरूपं च आद्यप्रकरण एव निरूपितम् । मनुरपि—

जातिजानपदान् धर्मान् श्रेणीधर्मांश्च शाश्वतान् ।
समीक्ष्य कुलधर्मांश्च स्वे वर्गे प्रतिपादयेत् ॥

श्रेणीधर्माः वणिक्कारुकादीनां स्वे स्वे वर्गे इदमस्मिन् अहनि न विक्रेयं इदं चानयैव श्रेण्या विक्रेयमित्येवमादयः। अस्मिन् कुले पञ्चमेऽह्नि पञ्चमे वाऽब्दे कर्णवेधः कर्तव्य इत्यादयः कुलधर्माः। प्रतिपादयेत् बोधयेत्। अकुर्वतश्चानापदि बलात्कारेण कारयेत्। तथाच याज्ञवल्क्यः—

कुलानि प्रकृतीश्चैव श्रेणीजानपदानपि।
स्वधर्माच्चलितान् राजा विनीय स्थापयेत्पथि॥

नारदस्तु कार्यदर्शनप्रकारमाह—

धर्मशास्त्रं पुरस्कृत्य प्राड्विवाकमते स्थितः।
समाहितमतिः पश्येत् व्यवहारानन्नुक्रमात्॥

अनुक्रमात् अर्थिवचनश्रवणादनुक्रमेणेत्यर्थः। तथाच स एव—

आगमः प्रथमः कार्यो व्यवहारपदं ततः।
विचारो निर्णयश्चेति दर्शनं स्याच्चतुर्विधम्॥

आगमोऽर्थिवचनश्रवणं, तदादौ कर्तव्यम्। ततस्तद्वचनमृणादानाद्यन्यतमस्मिन् पदेऽन्तर्भाव्यम्। ततः प्रतिज्ञोत्तरप्रमाणानां विचारः, ततः प्रमाणतो जयावधारणं एवं तदीयभाष्ये व्याख्यातम्। तत्र मनुः—

क्षन्तव्यं प्रभुणा नित्यं क्षिपतां कार्यिणां नृणाम्।
बालवृद्धातुराणां च कुर्वता हितमात्मनः॥
यत् क्षिप्तो मर्षयत्यार्तैः तेन स्वर्गे महीयते।
यस्त्वैश्वर्यान्न क्षमते नरकं तेन गच्छति॥

इति स्मृतिचन्द्रिकायां दर्शनविधिः

अथासेधविधिः

तत्र नारदः—

वक्तव्येऽर्थे ह्यतिष्ठन्तमुत्क्रामन्तं च तद्वचः ।
आसेधयेद्विवादार्थी यावदाह्वानदर्शनम् ॥

संदिग्धेऽप्यर्थे निर्णयोदासीनं निर्णयाय प्रवर्तितव्यमित्यादि चार्थिनो वचनमवमन्यमानमासेधयेद्राजाज्ञया निरुन्ध्याद्व्यवहारदर्शनार्थाह्वानपर्यन्तं विवादनिर्णयार्थीत्यर्थः । चतुर्विधश्चायमासेध इत्याह स एव—

स्थानासेधः कालकृत प्रवासात् कर्मणस्तथा ।
चतुर्विधस्स्यादासेधस्तमासिद्धो न लङ्घयेत् ॥

स्थानासेधो गृहदेवकुलादिस्थानान्न चलितव्यमित्यवरोधनम् । कालकृतः पञ्चम्यादावात्मा दर्शयितव्यो नो चेद्राजाज्ञामुल्लङ्घितवानित्येवंविधः । प्रवासादासेधो यात्रावारणम् । कर्मण आसेधः पण्यप्रसारणादेः वारणं, न पुनर्निरीक्षणादेः । यदाह कात्यायनः—

यस्त्विन्द्रियनिरोधेन व्याहारोच्छ्वसनादिभिः ।
आसेधयेदनासेध्यं स दण्ड्यो न त्वतिक्रमी ॥

इन्द्रियनिरोधादेस्सङ्कटत्वात् न तत्र राजाज्ञातिक्रमो दोषमावहतीत्यर्थः । अत एव नदीसन्तरणादिसङ्कटविषयेऽपि अपराधो नास्तीत्याह नारदः—

नदीसंतारकान्तारदुर्देशोपप्लवादिषु ।

आसिद्धस्तं परासेधमुत्क्रामन्नापराध्नुयात् ॥

नद्यास्संतरणं नदीसन्तारः । कान्तारो दुर्गमो मार्गः । दुष्टचोरव्याघ्रादिदेशो दुर्देशः । उपप्लवः परबलादिभिर्व्याकुलता । एवमादावाज्ञातिक्रमेऽपि नापराधः । अन्यत्र त्वपराधमाह पितामहः—

राजाज्ञा लङ्घिता येन करणीया विशेषतः ।
सप्ताङ्गस्य तु राज्यस्य द्रोह्यं तेन कृतं भवेत् ॥

यत्र त्वाज्ञातिक्रमेऽपराधः तत्र दण्डमाह व्यासः—

आसेधयोग्य आसिद्ध उत्क्रामन्दण्डमर्हति ।

इति । नारदोऽपि—

आसेधकाल आसिद्ध आसेधं योऽतिवर्तते ।
स विनेयोऽन्यथा कुर्वन्नासेद्धा दण्डभाग्भवेत् ॥

अन्यथा कुर्वन् अनासेध्यमासेधयन्नित्यर्थः । तथा च व्यासः—

आसेधयंस्तुनासेध्यान् राज्ञा शास्य इति स्थितिः ।

इति । अनासेध्यानाह कात्यायनः—

वृक्षपर्वतमारूढा हस्त्यश्वरथनौस्थिताः ।
विषमस्थाश्च ते सर्वे नासेध्याः कार्यसाधकैः ॥
व्याध्यार्ता व्यसनस्थाश्च यजमानास्तथैव च ।
अनुत्तीर्णाश्च नासेध्या मत्तोन्मत्तजडास्तथा ॥
न कर्षको बीजकाले सेनाकाले तु सैनिकः ।

प्रतिज्ञाय प्रयातश्च कृतकालश्च नान्तरा ॥
उद्युक्तः कर्षकस्सस्ये तोयस्यागमने तथा ।
आरम्भात्संग्रहं यावत् तत्कालं न विवादयेत् ॥

अनासेधकालत्वादित्यभिप्रायः । बृहस्पतिरपि—

सत्रोद्वाहोद्यतो रोगी शोकार्तोन्मत्तबालकाः ।
मत्तो वृद्धो नियुक्तश्च नृपकार्योद्यतो व्रती ॥
आसन्ने सैनिकस्सङ्ख्ये कर्षको वापसङ्ग्रहे ।
विषमस्थाश्च नासेध्याः स्त्रीसनाथास्तथैव च ॥

सङ्ख्ये सङ्ग्रामे । नारदोऽपि—

निर्वेष्टुकामो रोगार्तो यियक्षुर्व्यसने स्थितः ।
अभियुक्तस्तथाऽन्येन राजकार्योद्यतस्तथा ॥
गवां प्रचारे गोपालाः सस्यारम्भे कृषीवलाः ।
शिल्पिनश्चापि तत्काल आयुधीयाश्च विग्रहे ॥
अप्राप्तव्यवहारश्च दूतो दानोन्मुखो व्रती ।
विषमस्थाश्च नासेध्या न चैतानाह्वयेन्नृपः ॥

निर्वेष्टुकामो विवाहाभिमुखः । गवां प्रचारोऽटवीमुखः । अप्राप्तव्यवहारोऽपूर्णषोडशवर्षः । विषमस्थाः चोराद्यपहृतसर्वस्वाः ।
व्यासोऽपि—

रोगी यियक्षुरुन्मत्तो धर्मार्थी व्यवसनी व्रती ।
दानोन्मुखो नाभियोज्यो नासेध्यो नाह्वयेच्च तम् ॥

अत्र विशेषमाह बृहस्पतिः—

वणिग्विक्रीतपण्यस्तु सस्ये जाते कृषीवलः ।
सत्रोद्यताश्चापि तथा प्रापणीयाः कृतक्रियाः इति ॥

इति स्मृतिचन्द्रिकायामासेधः.

अथ दर्शनोपक्रमः.

तत्र मनुः—

धर्मासनमधिष्ठाय संवीताङ्गस्समाहितः ।
प्रणम्य लोकपालेभ्यः कार्यदर्शनमारभेत् ॥

शास्त्रोक्तकाले इति शेषः । तथाच कात्यायनः—

काले कार्यार्थिनं पृच्छेत् प्रणतं पुरतस्स्थितम् ।
किं कार्यं का च ते पीडा मा भैषीर्ब्रूहि मानव ॥

किं कार्यमिति देयाप्रदानस्य ज्ञानार्थं प्रश्नः, का च पीडेति हिंसायाः । तथा तयोः कर्तृदेशकालकारणपरिज्ञानार्थं सभापतिना प्रश्नचतुष्टयं कार्यमित्याह स एव—

केन कस्मिन् कदा कस्मात् पृच्छेदेवं सभां गतः ॥

इत्येवं पृष्टः कार्यार्थी ततस्तस्मै वक्तव्यजातं विज्ञापयेत् । तथाच याज्ञवल्क्यः—

स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः ।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ॥

अनेन वादी परकृतमुपद्रवमावेदयेदित्यर्थादुक्तम् । चेच्छब्दोऽत्रावेदकरुच्यैवावेदनं कार्यम्, न तु राजाज्ञयेति ज्ञापनार्थः ।

परैरिति बहुवचनमुपलक्षणार्थम्। अत एव कात्यायनेनापराध कर्तृप्रश्नः केनेत्येकवचनान्तेन दर्शितः। आधर्षितग्रहणं विवादेऽधिकारिणः अभिधानार्थं, न तु कर्तुः—

अर्थिना संनियुक्तो वा प्रत्यर्थिप्रहितोपि वा।
यो यस्यार्थे विवदते तयोर्जयपराजयौ॥

इति कात्यायनेन विवादे नियुक्तस्यापि कर्तृत्वाभिधानात्। नियुक्तग्रहणं तदीयानामप्युपलक्षणार्थम्। अत एव पितामहः—

पिता भ्राता सुहृच्चापि बन्धुस्सम्बन्धिनोपि वा।
यदि कुर्युरुपस्थानं वादं तत्र प्रवर्तयेत्॥
यत्किंचित्कारयेत्किंचित् नियोगाद्येन केनचित्।
तत्तेनैव कृतं ज्ञेयमनिवर्त्यं हि तत्स्मृतम्॥

इति। एवंचार्थिना वा तदीयेन वा पुरुषेणावेदनं कार्यं न त्वन्येनेत्यनुसंधेयम्। अत एव नारदः—

यो न भ्राता न च पिता न पुत्रो न नियोगकृत्।
परार्थवादी दण्ड्यस्स्याद्व्यवहारेषु विब्रुवन्॥

कात्यायनोपि—

दासाः कर्मकराश्शिष्याः नियुक्ता बान्धवास्तथा।
वादिनो न च दण्ड्यास्स्युः यस्त्वतोऽन्यस्स दण्डभाक्॥

एवमावेदनकर्ताऽप्यावेदनसमये अविनीतो वदन् दण्ड्य इत्याहोशना—

सशस्त्रोऽनुत्तरीयश्च मुक्तकेशस्ससाधनः।

वामहस्तेन च स्रग्वी वदन् दण्डमवाप्नुयात् ॥

अतोऽनेवंभूतो वदेदित्यभिप्रायः। ततस्तद्वचनं सर्वं फलकादौ लेखको लिखेत्। तथाच नारदः—

रागादीनां यदेकेन कोपितः करणे वदेत्।
तदोमिति लिखेत्सर्वमर्थिनः फलकादिषु ॥

करणे राजादिसन्निधावित्यर्थः। तच्च लिखितं जन्मान्तरे मयाऽस्मै धनं दत्तं तदसौ न प्रयच्छतीतिवद्विचारायोग्यं यदि न स्यात् तदा तत्प्रत्यर्थ्यानयनाय मुद्राप्रदानादिकं कुर्यात्। तथाच कात्यायनः—

एवं पृष्टस्स यद्ब्रूयात्तत्सभ्यैर्ब्राह्मणैस्सह।
विमृश्य कार्यं न्याय्यं चेदाह्वानार्थमतःपरम् ॥
मुद्रां वा निक्षिपेत्तस्मिन् पुरुषं वा समादिशेत्।

तस्मिन्नावेदके। पुरुषः साध्यपालः। न्याय्यं योग्यम्। आह्वानार्थमभियुक्तस्येति शेषः। तथा च बृहस्पतिः—

यस्याभियोगं कुरुते तथ्येनाशङ्कयाऽथवा।
तमेवानाययेद्राजा मुद्रया पुरुषेण वा ॥

उत्तरदाने तस्यैवाधिकारादित्यभिप्रायः। अत एव कात्यायनः—

अधिकारोऽभियुक्तस्य नेतरस्यास्त्यसङ्गतेः।

इति। इतरस्यानभियुक्तस्य तस्मिन्विवादे सम्बन्धाभावान्नास्त्युत्तरदानेऽधिकार इत्यर्थः। अतः इतरस्योत्तरवादित्वं, न स्वतः, किंतु अभियुक्तेन प्रतिवादित्वकरणात्। प्राड्विवाके वा स्वका

र्यकरणत्वेन समर्पणादर्थिना वा स्वरुच्या प्रतिवादित्वाङ्गीकारात्। नान्यथा, तदाह स एव—

इतरोप्यभियुक्तेन प्रतिरोधीकृतो मतः ।
समर्पितोऽर्थिना योऽन्यः परो धर्माधिकारिणि ॥
प्रतिवादी स विज्ञेयः प्रतिपन्नश्च यस्स्वयम् ।

अयमर्थः—इतरो विवादासम्बद्धोऽपि अभियुक्तेन प्रतिरोधीकृतः-प्रतिवादीकृतः मन्वादीनामुत्तरवादित्वेन संमतः। तथा अन्यो द्वितीयः स विज्ञेयः, यः परो विवादासंबन्धी धर्माधिकारिणि प्राड्विवाकेऽभियुक्तेन समर्पितः अर्थिना वा स्वयमेव यः प्रतिपन्नः प्रतिवादित्वेनाङ्गीकृत इति। एतच्चानधिकारिणः प्रतिवादित्वमकल्याद्यधिकारिविषये वेदितव्यम् । तत्राधिकारिणः साक्षात्कर्तृत्वस्य दुष्करत्वात् । अत एव बृहस्पतिः—

अप्रगल्भजडोन्मत्तवृद्धस्त्रीबालरोगिणाम् ।
पूर्वोत्तरं वदेद्बन्धुः नियुक्तोऽन्योऽथवा नरः ॥

अत एव च तेषामाह्वानप्रतिषेधो हारितादिभिस्स्मर्यते—

अकल्यबालस्थविरविषमस्थक्रियाकुलान् ।
कार्यातिपातिव्यसनिनृपकार्योत्सवाकुलान् ॥
मत्तोन्मत्तप्रमत्तार्तभृत्यान्नाह्वापयेन्नृपः ॥

अकल्यो व्याधितः । विषमस्थ उत्पन्नसङ्कटः । क्रियाकुलः नित्यनैमित्तिककर्मकरणव्यग्रः । यस्य त्वागच्छतो गुरुतरकार्यहानिस्स कार्यातिपाती । व्यसनमिष्टवियोगादिजं दुःखं, तद्वान्

व्यसनी । मत्तो दुत्तूरादिमदनीयद्रव्येण स्खलितबुद्धिः । उन्मत्तो ग्रहपित्तादिभिः । प्रमत्तस्सर्वत्रावधानहीनः । आर्तो विषादिना दुःखितः । भृत्यग्रहणमस्वतन्त्रस्त्रीणामप्युपलक्षणार्थम् । अत एव कात्यायनः—

धर्मोत्सुकानभ्युदये रोगिणोऽथ जडानपि ।
अस्वस्थमत्तोन्मत्तार्तास्त्रियो नाह्वापयेन्नृपः ॥

स्त्रियोऽत्र परतन्त्रा विवक्षिताः । आह स एव—

न हीनपक्षां युवतिं कुले जातां प्रसूतिकाम् ।
सर्ववर्णोत्तमां कन्यां ताः ज्ञातिप्रभुकास्स्मृताः ॥
तदधीनकुटुम्बिन्यः स्वैरिण्यो गणिकाश्च याः ।
निष्कुला याश्च पतितास्तासामाह्वानमिष्यते ॥

इति । हीनपक्षा मन्दकुला, युवतीतितस्या एव विशेषणम् । कुले जाता सत्कुले जाता, सर्ववर्णोत्तमा वाद्यपेक्षयोत्तमवर्णा । ताः पूर्वोक्ताः पञ्च ज्ञातिप्रभुकाः परतन्त्राः । नेतराः । तेन तदधीनकुटुम्बिन्यादीनामाह्वानं मन्वाद्यभीष्टमित्यर्थः । नारदोपि केषुचिदाह्वानं प्रतिषेधति—

निर्वेष्टुकामो रोगार्तो यियक्षुर्व्यसने स्थितः ।
अभियुक्तस्तथाऽन्येन राजकार्योद्यतस्तथा ॥
गवां प्रचारे गोपालाः सस्यारम्भे कृषीवलाः ।
शिल्पिनश्चापि तत्काल आयुधीयाश्च विग्रहे ॥
अप्राप्तव्यवहारश्च दूतो दानोन्मुखो व्रती ।

विषमस्थाश्च नासेध्याः न च तानाह्वयेन्नृपः ॥

निर्वेष्टुकामो विवाहाभिमुखः । व्यासोपि—

रोगी यियक्षुरुन्मत्तो धर्मार्थी व्यसनी व्रती ।
दानोन्मुखो नाभियोज्यो नासेध्यो नाह्वयेच्च तम् ॥

इति । अतोऽकल्यादिविषय एव प्रतिनिधिविधानं व्यवतिष्ठत इति स्थितम् । यदा त्वकल्यादिप्रहितप्रतिनिधिना न कार्यनिष्पत्तिः तदाऽकल्यादीनामप्याह्वानं कार्यम् । तथा च हारीतः—

देशं कालं च विज्ञाय कार्याणां च बलाबलम् ।
अकल्यादीनपि शनैर्यानैराह्वापयेन्नृपः ॥

इति । यदा तु गुरुतरकार्येष्वभियोगः तदाऽभियुक्तस्यैवाह्वानमावश्यकं, तत्र प्रतिनिधिनिषेधात् । तथाच कात्यायनः—

ब्रह्महत्यासुरापानस्तेयगुर्वङ्गनागमे ।
अन्येष्वसभ्यवादेषु प्रतिवादी न दीयते ॥

असभ्यवादानपि स एवाह—

मनुष्यमारणे स्तेये परदाराभिमर्शने ।
अभक्ष्यभक्षणे चैव कन्याहरणदूषणे ॥
पारुष्ये कूटकरणे नृपद्रोहे तथैव च ।
प्रतिवादी न दाप्यस्स्यादर्थिप्रत्यर्थिनोरपि ॥

वादिप्रतिवादिनोः प्रतिनिधिः प्रतिवादी, स सर्वथा गुरुकार्येष्वेवमादिषु न ग्राह्यः । अत एव हारीतः—

ज्ञात्वाऽभियोगं येऽपि स्युर्वने प्रव्रजितादयः ।
तानप्याह्वपयेद्राजा गुरुकार्येष्वकोपयन् ॥

अत्राकोपयन्निति वदन् प्राकृतजने निष्ठुरगिराऽप्याह्वानं कार्यमिति ज्ञापयति । स्पष्टीकृतं चैतद्व्यासेन—

उत्पादयति यो हिंसां देयं वा न प्रयच्छति ।
याचमानाय दौश्शील्यादाकृष्योऽसौ नृपाज्ञया ॥

यस्तु नृपाज्ञयाऽपि नागच्छति तस्य दण्डमाह बृहस्पतिः—

आहूतो यस्तु नागच्छेत् दर्पाद्बन्धुबलान्वितः ।
अभियोगानुरूपेण तस्य दण्डं प्रकल्पयेत् ॥

कात्यायनोपि—

आहूतस्त्ववमन्येत यश्शक्तो राजशासनम् ।
तस्य कुर्यान्नृपो दण्डं विधिदृष्टेन कर्मणा ॥
हीने कर्मणि पञ्चाशत् मध्यमे द्विशतावरः ।
गुरुकार्येषु दण्ड्यस्स्यान्नित्यं पञ्चशतावरः ॥

पणानां सङ्ख्येयम् ॥

कल्पितो यस्य यो दण्डस्त्वपराधस्य यत्नतः ।
पणानां ग्रहणं तु स्यात्तन्मूल्यं वाऽथ राजनि ॥

इति तेनैवाभिधानात् । पणपरिमाणमुत्तरत्र वक्ष्यमाणमनुसन्धेयम् । शक्त इति वचनादापदादिविषये न दण्डप्रकल्पनं, किंतु तन्निवृत्तौ पुनराह्वानं कार्यम् । अत एव व्यासः—

परानीकहते देशे दुर्भिक्षे व्याधिपीडिते ।

कुर्वीत पुनराह्वानं दण्डं न परिकल्पयेत् ॥

हारीतोपि—

राजिकं दैविकं कार्यमभियुक्तस्य तत्त्वतः ।
स्थाने वाऽप्यन्तराळे वा यात्येवं तु न दोषभाक् ॥

तत्त्वतः परमार्थतः । अपरमार्थं चेद्दण्डयित्वा पश्चान्न्यायेन वर्तयेत् । तथाच स एव—

प्रतिष्ठाप्यं तु यत्नेन सोऽन्यथा दण्डभाग्भवेत् ।
दण्डयित्वा पुनः पश्चाद्राजा न्याये प्रवर्तयेत् ॥

एवं येनकेनाप्युपायेन नीतमभियुक्तं अभियोक्त्रा सह सभायाः पुरतोऽन्यत्र वाऽपेक्षितस्थाने स्थापयेत् । तथाच पितामहः—

सभायाः पुरतस्स्थाप्योऽभियोगी वादिनां तथा ।
ईप्सितेऽन्यत्र वा स्थाने प्रमाणं सोऽन्यथा न तु ॥

यत्र स्थिते दुष्टलक्षणप्रच्छादनमशक्यं तत्रावस्थाप्य इत्यर्थः । ततो राज्ञा पृष्टोऽभियोगी स्वोपयोगिवृत्तान्तमावेदयेत् । अभियोक्तृकृतावेदनमात्रतो भूतान्वेषणानुपपत्तेः । अत एव भूतान्वेषणविधावुक्तं मनुना—

स्वरवर्णेङ्गिताकारैश्चक्षुषा भाषितेन च ।

इति । छलव्यवहारेऽपि पूर्वपक्षलेखनादर्वाक् छलवादित्वावधारणायाभियुक्तस्य वृत्तान्तस्तन्मुखेनावगन्तव्यः । द्वयोश्छलवादित्वे निश्चिते पश्चाच्छलानुसारेण दर्शनाविधिः । तस्मादभि-

युक्तस्यापि वृत्तान्तावेदनमस्तीत्यवगन्तव्यम् । विवादिनोः छलित्वनिश्चयानन्तरं याज्ञवल्क्यः—

उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्यनिर्णये ॥

साधितधनदण्डधनयोरनायासेन प्राप्तिः कार्यनिर्णयः, तत्करण समर्थः प्रतिभूरर्थिप्रत्यर्थिनोर्द्वयोरपि ग्राह्यो व्यवहारद्रष्ट्रेत्यर्थः । अत्र वर्जनीयानाह कात्यायनः—

न स्वामी न च वै शत्रुस्स्वामिनाऽधिकृतस्तथा ।
निरुद्धो दण्डितश्चैव संशयस्थाश्च न क्वचित् ॥
नैव रिक्थी न रिक्तश्च न चैवात्यन्तवासिनः ।
राजकार्यनियुक्तश्च ये च प्रव्रजिता नराः ॥
नाशक्तो धनिने दातुं दण्डं राज्ञे च तत्समम् ।
नाविज्ञातो ग्रहीतव्यः प्रतिभूत्वक्रियां प्रति ॥

संशयस्थाः अभिशस्ताः । अत्यन्तवासिनः नैष्ठिकब्रह्मचारिणः । तत्समं विवादास्पदीभूतद्रव्यसमम् । विहितदण्डोपलक्षणार्थमेतत् । यदि वादी विवादप्रतिभुवं दातुमसमर्थः तदाऽपि तेनैवोक्तं—

अथ चेत्प्रतिभूर्नास्ति वादयोग्यस्य वादिनः ।
स रक्षितो दिनस्यान्ते दद्याद्दूताय वेतनम् ॥

दूताय साध्यपालाय । तथा परित्याजितगृहीतद्रव्य एव विवादी न्याये प्रवर्त्य इत्याह स एव—

गृहीतग्रहणो न्याये न प्रवर्त्यो महीभृता ।

तस्य वा तत्समर्प्यं स्यात् स्थापयेद्वा परस्य तत् ॥

इति । परस्य मध्यस्थस्य, समीप इति शेषः । तथाऽभियोक्त्रा-दीनामुक्तिक्रमोपि तेनैवोक्तः—

तत्राभियोक्ता प्राक् ब्रूयादभियुक्तस्त्वनन्तरम् ।
तयोरन्ते सदस्यास्तु प्राड्विवाकस्ततः परम् ॥

प्राग्ब्रूयात् प्रतिज्ञां कुर्यादित्यर्थः । तथाच नारदः—

आज्ञालेख्यै पट्टके शासने वा
आधौ पत्रे विक्रये वा क्रये वा ।
राज्ञे कुर्यात्पूर्वमावेदनं यः
तस्य ज्ञेयः पूर्ववादो विधिज्ञैः ॥

विवादे सर्वत्राभियोक्तुरेव प्रतिज्ञावादित्वमित्यर्थः । अत्रापवाद-माह स एव—

यस्य वाऽभ्यधिका पीडा कार्यं वा ह्यधिकं भवेत् ।
तस्यार्थिवादो दातव्यो न यः पूर्वं निवेदयेत् ॥

अर्थिवादः पूर्वपक्षः । तथाच कात्यायनः—

यस्य स्यादधिका पीडा कार्यं वाऽप्यधिकं भवेत् ।
पूर्वपक्षो भवेत्तस्य न यः पूर्वं निवेदयेत् ॥

एवंविधविषये अर्थिप्रत्यर्थिभावस्य वैपरीत्यं परीक्षकैः कार्य-मित्यर्थः । यत्रोभयोरपि परस्परमार्थित्वं प्रत्यर्थित्वं च सा-ध्यभेदात् युगपद्भवति तत्रोत्कृष्टजातेः बहुपीडस्य वा अर्थि-वादः पूर्वं द्रष्टव्यः । तथाच बृहस्पतिः—

अहंपूर्विकया तावदर्थिप्रत्यर्थिनौ यदा ।
वादो वर्णानुपूर्व्येण ग्राह्यः पीडामवेक्ष्य वा ॥

समानवर्णत्वे पीडापेक्षया ग्राह्यः । अनेकवादियुग्मानां युगपदुपस्थाने तु दर्शनक्रममाह मनुः—

अर्थानर्थावुभौ बुद्ध्वा धर्माधर्मौ च केवलौ ।
वर्णक्रमेण सर्वाणि पश्येत्कार्याणि कार्यिणाम् ॥

इति स्मृतिचन्द्रिकायां दर्शनोपक्रमः.

अथ प्रतिज्ञावादः.

तत्र बृहस्पतिः—

उपस्थिते ततस्तस्मिन् वादी पक्षं प्रकल्पयेत् ।

इति । समीपस्थे प्रत्यर्थिनि पक्षं लेखयेदित्यर्थः । तथाच याज्ञवल्क्यः—

प्रत्यर्थिनोऽग्रतो लेख्यं यथाऽऽवेदितमर्थिना ॥

इति । यथाऽऽवेदितमिति यत्साध्यमावेदितं तदेव लेख्यं, न साध्यान्तरमिति प्रतिपादनार्थं, न पुनर्यावदावेदितं तावदेव लेख्यमिति । यतोऽनावेदितस्यापि वत्सरादिविशेषस्येदानीं लेखनं कार्यमिति स एवाह—

समामासतदर्धाहर्नामजात्यादिचिह्नितम् ।

इति । समा संवत्सरः । स च धनप्रयोगादिकालीनो लेखनीयः। मासादिरपि तत्कालीन एव । आदिशब्दसंगृहीतानि विशेषणानि कात्यायनेन दर्शितानि—

निवेश्य कालं वर्षं च मासं पक्षं तिथिं तथा ।
वेलां प्रदेशं विषयं स्थानं जात्याकृती वयः ॥
साध्यद्रव्यप्रमाणं च सङ्ख्यां नाम तथाऽऽत्मनः ।
राज्ञां च क्रमशो नाम निवासं साध्यनाम च ॥
क्रमात्पितॄणां नामानि पीडामाहर्तृदायकौ ।
क्षमालिङ्गानि चान्यानि पक्षं सङ्कीर्त्य कल्पयेत् ॥

इति । कालो धनप्रयोगादिकालः वर्तमानेन राज्ञोपलक्षितः । वर्षं देववर्षमित्यादि । वेला भुज्यादिक्रियोपलक्षितः कालः । प्रदेशः साध्यक्षेत्रादेः स्थलविशेषः । विषयोऽन्तर्वेद्यादिदेशः । स्थानं विवादास्पदस्य गृहादेर्ग्रामादिः । आकृतिः अवयवसंस्थानविशेषः । वयस्तारुण्यादि । प्रमाणं परिमाणं दण्डतुलाप्रस्थादिकम् । आत्मनोऽर्थिनः । राज्ञां क्षेत्रादिभुक्तिकालीनानाम् । निवासो वासस्थानं गृहगोष्ठादि । पितरोऽर्थिप्रत्यर्थिनोर्जनकादयः । पीडा प्रतिभुवा धनिकेन कृता । आहर्ता प्रतिग्रहाद्यागमकर्ता । दायको दाता । क्षमालिङ्गानि आत्मीयधनादेः परोपभोगासहननिमित्तानि । अन्यानि प्रदर्शितेभ्योऽधिकान्यपि वृद्ध्यागमादीनि । तथाच बृहस्पतिः—

निरवद्यं सप्रतिज्ञं प्रमाणागमसंयुतम् ।
द्रव्यसङ्ख्योदयं पीडां क्षमालिङ्गं च लेखयेत् ॥

तथा लक्षणान्तराण्यपि स एवाह—

अल्पाक्षरः प्रभूतार्थो निस्सन्दिग्धस्त्वनाकुलः ।

युक्तो विरोधिकरणैर्विरोधिप्रतिषेधकः ॥
एवमादिगुणान् सम्यगालोच्य च सुनिश्चितः ।
पक्षः कृतस्समादेयः पक्षाभासस्ततोऽन्यथा ॥

इति । सङ्ग्रहकारोऽपि—

अर्थवद्धर्मसंयुक्तं परिपूर्णमनाकुलम् ।
साध्यवद्वाचकपदं प्रकृतार्थानुबन्धि च ॥
प्रसिद्धमविरुद्धं च निश्चितं साधनक्षमम् ।
संक्षिप्तं निखिलार्थं च देशकालाविरोधि च ॥
वर्षर्तुमासपक्षाहोवेलादेशप्रदेशवत् ।
स्थानावसथसाध्याख्याजात्याकारवयोयुतम् ॥
साध्यप्रमाणसङ्ख्यावदात्मप्रत्यर्थिनामवत् ।
परात्मपूर्वजानेकराजनामभिरङ्कितम् ॥
क्षमालिङ्गात्मपीडावत् कथिताहर्तृदायकम् ।
यदावेद्यते राज्ञे तद्भाषेत्यभिधीयते ॥

इति । अर्थवत् प्रयोजनवत् । धर्मसंयुक्तं अल्पाक्षरत्वप्रभूतार्थवत्त्वादिगुणान्वितम् । परिपूर्णं अध्याहारानपेक्षम् । अनाकुलं असंदिग्धाक्षरकम् । साध्यवत् सिषाधयिषितार्थाहीनम् । वाचकपदं गौणलाक्षणिकरहितम् । प्रकृतार्थानुबन्धि प्रागावेदितार्थाविरोधि । प्रसिद्धं लोकप्रसिद्धवस्तुविषयम् । अविरुद्धं पुरराष्ट्रप्राड्विवाकनृपाद्यविरुद्धम् । तथा पूर्वापराविरुद्धं प्रत्यक्षादिप्रमाणाविरुद्धं व्यावहारिकधर्माविरुद्धं च । निश्चितमर्थान्तरश-

ङ्काराहितम् । साधनक्षमं साधनार्हम् । संक्षिप्तं अनतिविस्तृम् । निखिलार्थं अनवशेषितवक्तव्यम् । देशकालाविरोधि मध्यदेशीयं क्रमुकक्षेत्रं, शरत्कालीनमाम्रफलसहस्रमपहृतमित्येवमादिरहितम् । परात्मपूर्वजानेकराजनामभिराङ्कितम्, परः प्रतिवादी । आत्मा वादी । पूर्वजाः तयोः पित्रादयः । अनेके राजानो भुक्तिकालीनाः । तेषां नामानि परात्मपूर्वजानेकराजनामानि, तैश्चिह्नितम् । शिष्टमुक्तार्थम् । अर्थवत्त्वादीनि देशकालाविरोधित्वान्तान्यर्थिप्रत्यर्थिनामसहितानि सर्वव्यवहारभाषोपयोगीनि । तेन तैस्सर्वत्र भाषायामवश्यंभवितव्यम् । तैर्विना क्वचिदपि साध्यसिद्धेः सुखेन कर्तुमशक्यत्वात् । वर्षादीनि पुनर्विशेषणानि सर्वाणि न सर्वत्रोपयोगीनि, कतिपयैर्विनाऽपि तत्र तत्र साध्यसिद्धिसम्भवात् । अतो यत्र येषामुपयोगस्तत्रैव तेषां निवेशनं कार्यं, नेतरत्रापि, प्रयोजनाभावात् । तत्र वर्षादिकालानां वृद्धिमद्धनद्वैगुण्यादिविवादे प्रतिग्रहक्रयाध्यादीनां पौर्वापर्यविवादे चोपयोगः । देशप्रदेशस्थानानां तथा परात्मपूर्वजानेकराजनामधेयानामाहर्तृदायककथनस्य च स्थावरविवादेषूपयोगः । साध्याख्याजात्याकारवयसां चौर्यास्वामिविक्रयादावर्थविवादेऽप्युपयोगः । प्रमाणसंख्ययोर्मेयतुलिमगणिमादिद्रव्यविवादे चौर्यविवादे चोपयोगः । क्षमालिङ्गानां उपेक्षितस्थानादिविवादेषूपयोगः । आत्मपीडायाः ऋणिकलग्नकविवादादावुपयोग इत्येषा दिक् । एवंचार्थवत्त्वादिभिस्सह वर्षादीनां यथो-

पयोगं क्वचित्क्वचिन्निवेशनमिति मन्तव्यम् । अत एव कात्यायनः—

देशश्चैव तथा स्थानं सन्निवेशस्तथैव च ।
जातिस्संज्ञा निवासश्च प्रमाणं क्षेत्रनाम च ॥
पितृपैतामहश्चैव पूर्वराजानुकीर्तनम् ।
स्थावरेषु विवादेषु दशैतानि निवेशयेत् ॥

इति । तेषां तत्रोपयोगादित्यभिप्रायः । हारीतोपि—

आसनं शयनं यानं ताम्रं कांस्यमयोमयम् ।
धान्यमश्ममयं वस्त्रं द्विपदं च चतुष्पदम् ॥
मणिमुक्ताप्रवाळानि हीरकं रूप्यकाञ्चनम् ।
यदि द्रव्यसमूहस्स्यात् सङ्ख्या कार्या तथैव च ॥
यस्मिन् देशे च यद्द्रव्यं येन मानेन मीयते ।
तेन तस्मिन् तथा सङ्ख्या कर्तव्या व्यवहारिभिः ॥

इति । हीरकं वज्रं, तेन मानेन मित्वा सङ्ख्या कर्तव्येत्याह । एवंच यत्र यदुपयुज्यते तत्र तदभावे साध्यसिद्धेः कर्तुमशक्यत्वादनादेय एवोपयोगिविहीनः पक्षः । अत एव कात्यायनः—

देशकालविहीनश्च द्रव्यसङ्ख्याविवर्जितः ।
क्रियाप्रमाणहीनश्च पक्षो नादेय इष्यते ॥

क्रियाप्रमाणं साध्यपरिमाणम् । तथा प्रयोजनवत्त्वादिलक्षण हीनोऽपि पक्षो हेय एव ।

अप्रसिद्धं निराबाधं निरर्थं निष्प्रयोजनम् ।
असाध्यं वा विरुद्धं वा पक्षं राजा विवर्जयेत् ॥

तत्राप्रसिद्धो बृहस्पतिना निरूपितः—

न केनचित्कृतो यस्तु सोऽप्रसिद्ध उदाहृतः ।

इति । अत्रोदाहरणं पलसहस्रकृतं स्थालं गृहीतमिति । निराबाधो निरुपद्रवः, यथा अस्मद्भवनस्थप्रदीपप्रभया स्वगृहे व्यवहरतीति । निरर्थनिष्प्रयोजनौ बृहस्पतिना दर्शितौ—

स्वल्पापराधस्स्वल्पार्थो निरर्थक इति स्मृतः ।
कार्यबाधविहीनस्तु विज्ञेयो निष्प्रयोजनः ॥

तत्र निरर्थकस्योदाहरणं—अहमनेन सस्मितं निरीक्षितः, मामकी लाक्षाऽनेनापहृतेति वा । निष्प्रयोजनस्य तु यथा—यज्ञदत्तोऽस्मद्गृहसमीपे श्लाघमानः पठतीति । प्रकारान्तरेणाप्येतौ तेनैव दर्शितौ—

कुसीदाद्यैः पदैर्हीनो व्यवहारो निरर्थकः ।
वाक्पारुष्यादिभिश्चैव विज्ञेयो निष्प्रयोजनः ॥

ऋणादानाद्यष्टादशपदानन्तर्भूतो निरर्थकः । वाक्पारुष्यादिभिस्साध्यसिद्ध्यनुपयुक्तैस्सहितः पक्षो निष्प्रयोजन इत्यर्थः । असाध्यविरुद्धावपि तेनैव दर्शितौ—

ममानेन प्रदातव्यं शशशृङ्गकृतं धनुः ।
असम्भाव्यमसाध्यं तं पक्षमाहुर्मनीषिणः ॥
यस्मिन्नावेदिते पक्षे प्राड्विवाके च राजनि ।

पुरे राष्ट्रे विरोधस्स्याद्विरुद्धस्सोऽभिधीयते ॥

इति । नारदोपि भाषादोषान् दर्शयति—

अन्यार्थमर्थहीनं च प्रमाणागमवर्जितम् ।
लेख्यहीनाधिकं भ्रष्टं भाषादोषा उदाहृताः ॥

स्वयमेव व्याचष्टे—

अर्थे साधारणेऽप्येको वाद्यर्थे वाऽनियुक्तकः ।
लेखयेद्यस्तु भाषायामन्यार्थां तां विदुर्बुधाः ॥

एक एव गणी गणस्य कार्यमेकस्य वा कार्यमनियुक्तोऽसम्वन्धी वा लेखयेद्यस्यां भाषायामित्यर्थः ।

ब्रह्महाऽयमिति ज्ञेयो द्वेषान्मोहाद्वदेत्तु यः ।
साध्यं च मोचयेत्तत्र द्रव्यहीनां तु तां विदुः ॥

उक्तं साध्यवादिना यस्यां त्यज्यते सा च भाषाऽर्थहीनेत्यर्थः ।

गणिमे तुलिमे मेये तथा क्षेत्रगृहादिके ।
यत्र सङ्ख्या न निर्दिष्टा सा प्रमाणविवर्जिता ॥
विद्यया प्राप्तमाध्याप्तं लब्धं क्रीतं क्रमागतम् ।
न त्वेवं लिख्यते यत्र सा भाषा स्यादनागमा ॥
समा मासस्तथा पक्षस्तिथिर्वारस्तथैव च ।
यत्रैतानि न लिख्यन्ते लेख्यहीनां तु तां विदुः ॥
लेखयित्वा तु यो भाषामनिर्दिष्टे तथोत्तरे ।
उद्दिशेत्साक्षिणं पूर्वमधिकां तां विनिर्दिशेत् ॥
यत्र स्यादुभयं सर्वं निर्दिष्टं पूर्ववादिना ।

संदिग्धमिव लिख्येत भ्रष्टां भाषां तु तां विदुः ॥

इति । यत्र पक्षद्वयमखिलं प्रतिज्ञावादिनैव निर्दिष्टं स्यादित्यर्थः । तथाऽन्यानपि पक्षाननादेयानाह स एव—

भिन्नक्रमो व्युत्क्रमार्थः प्रकीर्णार्थो निरर्थकः ।
अतीतकालो द्विष्ठश्च पक्षोऽनादेय इष्यते ॥

तत्र भिन्नक्रमस्तेनैव व्याख्यातः—

यथास्थाननिवेशेन नैव पक्षार्थकल्पना ।
शस्यते न स पक्षस्तु भिन्नक्रम उदाहृतः ॥

व्यस्ताक्षरसंस्थानो भिन्नक्रम इत्यर्थः । व्युत्क्रमार्थो व्यवहितान्वयेनार्थबोधकः । प्रकीर्णार्थः संकलितार्थः । निरर्थकादीन् स एवाचष्टे—

मूलमर्थं परित्यज्य तद्गुणो यत्र लिख्यते ।
निरर्थकः स वै पक्षो भूतसाधनवर्जितः ॥
भूतकालमतिक्रान्तं द्रव्यं यत्र विलिख्यते ।
अतीतकालः पक्षोऽसौ प्रमाणे सत्यपि स्मृतः ॥
यस्मिन् पक्षे द्विधा साध्यं भिन्नकालविमर्शनम् ।
विमृश्यते क्रियाभेदात्स पक्षो द्विष्ठ उच्यते ॥

इति । भूतसाधनं मूलभूतधनसाधनम् । भूतकालोऽवधिभूतः कालः । क्रियाभेदात् प्रमाणभेदात् । तथाऽपरानपि पक्षाभासानाह स एव—

अन्याक्षरनिवेशेन अन्यार्थगमनेन च ।

आकुलं तु भवेल्लेख्यं क्रिया चैवाकुला भवेत् ॥
उपेक्षा यत्र साध्यस्य विंशतिर्दश वा समाः ।
शक्तेनापि कृता वादे तस्य पक्षो मृषा भवेत् ॥
साहसं सह साध्येन निर्दिष्टं यत्र लेखयेत् ।
उक्तिक्रमविहीनत्वात् सोपि पक्षो न सिद्ध्यति ॥

क्रिया साध्यं, साधनं प्रमाणम् । हारीतोपि—

प्रक्रान्तसाधनोऽर्थस्तु द्विधा यस्मिन्निवेश्यते ।
स्वसाध्याद्वा विभिन्नो वा सोपि पक्षो मृषा भवेत् ॥

प्रक्रान्तः साधयितुमुपक्रान्तोऽर्थो द्विधा द्विप्रकारेण साध्यतयाऽथवाऽऽवेदितात्साध्याद्विधान्तरेण तद्विरोधितया वा यत्र पक्षे निवेश्यते सोपि पक्षाभास इत्यर्थः । भृगुरपि—

उत्सृष्टं यत्र हीनेन कल्प्यं वाऽप्येकमेकतः ।
तत्र पक्षो न साध्यस्स्याच्छास्त्रशिष्टविवार्जितः ॥
विरुद्धश्चाविरुद्धश्च द्वावप्यर्थौ निवेशितौ ।
एकस्मिन् यत्र दृश्येते तं पक्षं दूरतस्त्यजेत् ॥

हीनेन हीनवादिना । पितामहोपि—

परस्परविरुद्धानि यः पदानि निवेशयेत् ।
विरुद्धपदसङ्कीर्णा भाषा तस्य न सिद्ध्यति ॥

कात्यायनोपि—

न्यायस्थं नेच्छते कर्तुं अन्याय्यं वा करोत्ययम् ।
न लेखयति यस्त्वेवं तस्य पक्षो न सिद्ध्यति ॥

न्यायागतं मदीयं धनं गृहीत्वा न ददातीतिवत् प्रतिषेधरूपेण वा मदीयं क्षेत्रादिकमपहरतीतिवद्विधिरूपेण वा न लेखयतीत्यर्थः । तथा—

पुरराष्ट्रविरुद्धश्च यश्च राज्ञा विवर्जितः ।
अनेकपदसंकीर्णः पूर्वपक्षो न सिद्ध्यति ॥

पुरराष्ट्राचारविरुद्धो राजत्यक्तशुल्कशालादिविषयस्सर्वथा न सिद्ध्यति । ऋणादानाद्यनेकपदसङ्कीर्णस्तु क्रियाभेदाद्यौगपद्येन न सिद्ध्यतीत्यर्थः । यत्पुनस्तेनोक्तम्—

बहुप्रतिज्ञं यत्कार्यं व्यवहारे सुनिश्चितम् ।
कामं तदपि गृह्णीयाद्राजा तत्त्वबुभुत्सया ॥

इति, तदनेकपदसङ्कीर्णस्य कालभेदेनोपादेयत्वप्रतिपादनार्थं, अथवा ऋणादानाद्येकपदान्तर्गतानेकजातीयानां हिरण्यवस्त्रपशुधान्यानामेकजातीयानां सङ्ख्यापरिमाणदेशकालवृद्ध्यादिभेदेन गृहीतानां यथावृत्तकथनार्थं भेदेन प्रतिज्ञाय पुनस्तत्सर्वं प्रतिदेयमित्येककार्यतयोपसंहृतं ग्राह्यमित्येवं प्रतिपादनार्थम्, अतो न प्राचीनवचनेन विरोधः । तथा—

आगमः परिभोगश्च व्युच्छित्तिः प्रार्थना तथा ।
एतच्चतुष्टयं प्राहुः भापादोपास्त्वकारणाः ॥

आगमो धनागमननिमित्तं प्रतिग्रहादिः । परिभोगो यथेष्टविनियोगानिवृत्तिः । व्युच्छित्तिः देशविप्लवादिना भोगविच्छित्तिः। प्रार्थना युक्तिभिर्भोगागमकीर्तनम् । एतदागमादिचतुष्टयं भा-

षागुणा इति प्राहुः । ये पुनरागमादयः अकारणाः विना निवेश-कारणं भाषायां निविष्टास्ते भाषादोषा इति प्राहुरित्यर्थः । अतोऽत्राकाङ्क्षितस्यावापः कार्योऽनाकाङ्क्षितस्य बोद्धारः। तथाच स एव—

अधिकान् भेदयेदर्थान् न्यूनांश्च प्रतिपूरयेत् ।
भूमौ निवेशयेत्तावत् यावदर्थो न निश्चितः ॥

छेदयेदुद्धरेदित्यर्थः । भूमावित्युपलक्षणार्थः । तथाच स एव—

पूर्वपक्षं स्वभावोक्तं प्राड्विवाकोऽभिलेखयेत् ।
पाण्डुलेखेन फलके ततः पत्रे विशोधितम् ॥

स्वभावोक्तं भयाद्युपाधिराहित्येनोक्तम् । विशोधितं अन्यूना-नतिरिक्तमप्रसिद्धत्वादिदूषणरहितं च । तथाच बृहस्पतिः—

प्रतिज्ञादोषनिर्मुक्तं साध्यतत्कारणान्वितम् ।
निश्चितं लोकसिद्धं च पक्षं पक्षविदो विदुः ॥

लोकसिद्धं व्यावहारिकधर्माविरुद्धमित्यर्थः, लोकप्रसिद्धमित्ये-वंविधार्थस्य प्रतिज्ञादोषनिर्मुक्तमित्यनेनैवार्थादुक्तत्वात् । अत एव मनुः—

सभ्या भाषा न भवति यद्यपि स्यात् प्रतिष्ठिता ।
वहिश्चेद्भाष्यते धर्मात् नियताद्व्यावहारिकात् ।

सर्वदोषरहिताऽपि भाषा व्यावहारिकधर्मविरुद्धा चेत् सभास-द्भिर्न ग्राह्येत्यर्थः । एवमुक्तलक्षणः पक्षश्चतुर्विध इत्याह बृहस्पतिः—

शङ्काऽभियोगस्तथ्यं च लब्धेऽर्थेऽभ्यर्थनं तथा ।
वृत्ते वादे पुनर्न्यायः पक्षो ज्ञेयश्चतुर्विधः ॥

अत्र नारदः—

शोधयेत्पूर्ववादं तु यावन्नोत्तरदर्शनम् ।
अवष्टब्धस्योत्तरेण निवृत्तं शोधनं भवेत् ॥

न चात्र शङ्खवेलान्यायेनोत्तरदानयोग्यकालातीते शोधननिवृत्तिरिति शङ्कनीयम् । यत आह स एव—

भाषाया उत्तरं यावत्प्रत्यर्थी न निविशयेत् ।
अर्थी तु लेखयेत्तावद्यावद्वस्तु विवक्षितम् ॥

इति । केचिन्निर्दिष्टेऽप्युत्तरे शोधनमिच्छन्ति तदनवस्थाप्रसङ्गात् पूर्वोक्तवचनविरोधाच्च हेयम् । अत एव सङ्ग्रहकारः—

भाषान्यूनातिरिक्तेषु सम्यक्सूत्रणकारिभिः ।
पुनः प्रतिसमाधाय शृणुयादुत्तरं ततः ॥
यस्मात्प्रत्यर्थिनाऽऽरब्ध उत्तरेऽर्थिप्रभाषितम् ।
उपयोग्यपि नादेयं तस्यात्रसरवर्जनात् ॥

आरब्धे दत्त इत्यर्थः । दीयमानेऽप्युत्तरे प्रतिसमाधानस्येष्टत्वात् तथाच कात्यायनः—

मोहाद्वा यदि वा शाठ्याद्यन्नोक्तं पूर्ववादिना ।
उत्तरान्तर्गतं वाऽपि तद्ग्राह्यमुभयोरपि ॥

उत्तरान्तर्गतमुत्तरे कथ्यमानेऽपि वादिना प्रोच्यमानमित्यर्थः। उभयोः अर्थिप्रत्यर्थिनोः । प्रत्यर्थिनस्तु क्रियापाद उत्तरः ।

यदा पूर्वपक्षमशोधयित्वैव सभ्यैरुत्तरं गृहीतं, तदा सभ्यदण्डनं कृत्वा प्रतिज्ञापूर्वकं कार्यं द्रष्टव्यम्। यदा त्वर्थी सपदि प्रतिज्ञां कर्तुमसमर्थः तदा बृहस्पतिराह—

अभियोक्ताऽप्रगल्भत्वात् वक्तुं नोत्सहते यदा।
तस्य कालः प्रदातव्यः कार्यशक्त्यनुरूपतः॥

इति स्मृतिचन्द्रिकायां प्रतिज्ञापादः

अथोत्तरपादः

तत्र बृहस्पतिः—

विनिश्चिते पूर्वपक्षे ग्राह्याग्राह्यविशोषिते।
प्रतिज्ञार्थे स्थिरीभूते लेखयेदुत्तरं ततः॥

वादिना निश्चितस्यापि पक्षस्य पुनः प्राड्विवाकादिभिर्विचार्य कृते स्थैर्ये ततस्तत्पक्षस्योत्तरं प्रतिवादी लेखयेदित्यर्थः। नारदोपि-

यदा त्वेवंविधः पक्षः कल्पितः पूर्ववादिना।
दद्यात्तत्पक्षसंबन्धं प्रतिवादी तदोत्तरम्॥

एवंविध इत्यस्यार्थो हारीतेन विवृतः—

स्वल्पवर्णोऽर्थवहुलः प्रतिज्ञादोषवर्जितः।
साक्षिमान् कारणोपेतो निरवद्यस्सुनिश्चितः॥
ईदृशः पूर्वपक्षस्तु लिखितो यत्र वादिना।
दद्यात्तत्पक्षसम्बद्धं प्रतिवादी तदोत्तरम्॥

साक्षिमान् प्राड्विवाकादिप्रत्यवेक्षणवान्। यदा त्वनीदृशस्तदा न

द्द्यादित्यर्थसिद्धं स्पष्टयितुं पक्षाभासमेकमुदाहृत्य तस्योत्तरं न देयमित्याह स एव—

साधारणी च या भूमिर्यच्च द्रव्यं गणाश्रितम् ।
एकस्य प्रार्थयानस्य न वदेदुत्तरं बुधः ॥

इति । अतः परीक्षितपूर्वपक्षस्यैव प्रतिवादिना उत्तरं लेख्यमित्याह याज्ञवल्क्यः—

श्रुतार्थस्योत्तरं लेख्यं पूर्वावेदकसन्निधौ ।

इति । श्रुतभाषार्थस्य प्रत्यर्थिन इत्यक्षरार्थः । सङ्ग्रहकारोऽपि—

अनन्यार्थमहीनार्थं न्यायागमसमन्वितम् ।
अन्यूनानाधिकादृष्टमनन्याक्षरसम्भवम् ॥
भाषायामिति पत्रेषु लिखितायामनन्तरम् ।
प्रत्यर्थिनश्श्रुतार्थस्य कालोऽयं दातुमुत्तरम् ॥

इति । अनन्यार्थमित्यादिलक्षणजातं यथा भवति तथा भाषायां लिखितायामित्यर्थः । अयं च कालनियमो गवादिविवादेष्वेव । तथाच नारदः—

गोभूहिरण्यस्त्रीस्तेयपारुष्यात्ययिकेषु च ।
साहसेष्वभिशापे च सद्य एव विवादयेत् ॥

अभिशापः पापाभिशंसनम् । तस्य पारुष्यभेदत्वेऽप्यादरार्थं पुनर्वचनम् । आत्ययिकं कात्यायनेनोक्तं—

व्यपैति गौरवं यत्र विनाशस्त्याग एव वा ।
कालं तत्र न कुर्वीत कार्यमात्ययिकं हि तत् ॥

तथाऽन्येष्वपि कार्येषु सद्य एवोत्तरं कार्यमित्याह स एव—

धेनावनडुहि क्षेत्रे स्त्रीषु प्रजनने तथा ।
न्यासे याचितके दत्ते तथैव क्रयविक्रये ॥
कन्याया दूषणे स्तेये कलहे साहसे निधौ ।
उपधौ कौटसाक्ष्ये च सद्य एव विवादयेत् ॥

उपाधिः भयादिवशादभ्युपगमः । याज्ञवल्क्योपि—

साहसस्तेयपारुष्यगोऽभिशापात्यये स्त्रियाम् ।
विवादयेत्सद्य एव कालोऽन्यत्रेच्छया स्मृतः ॥

अन्यत्र ऋणादानादाविसर्थः । तथाच नारदः—

गहनत्वाद्विवादानामसामर्थ्यात्स्मृतेरपि ।
ऋणादिषु हरेत्कालं कामं तत्त्वबुभुत्सया ॥

ऋणादिषु ऋणादानादिविवादपदेष्वित्यर्थः। अत एव पितामहः—

ऋणोपनिधिनिक्षेपदानसम्भूयकर्मणाम् ।
समये दायभागे च कालः कार्यः प्रयत्नतः ॥

एवमादिष्वपि कालदानं विस्मृत्यादिकारणतः प्रत्यर्थिनः कालार्थित्व एव । तथाच कात्यायनः—

श्रुत्वा लेख्यगतं त्वर्थं प्रत्यर्थी कारणाद्यदि ।
कालं विवादे याचेत तस्य देयो न संशयः ॥

सद्यःकृतेषु कार्येषु स्मृतिसंभवात्सद्य एव विवाद इत्याह स एव—

सद्यः कृतेषु कार्येषु सद्य एव विवादयेत् ।
कालातीतेषु वा कालं दद्यात्प्रत्यर्थिने प्रभुः ॥

प्रत्यर्थिन इत्युपलक्षणार्थम् । अत एव नारदः—

मतिर्नोत्सहते यस्य विवादे वक्तुमिच्छतः ।

दातव्य एव कालस्स्यादर्थिप्रत्यर्थिनोरपि ॥

दातव्यश्च कालः क्रियानित्यपेक्षिते स एवाह—

सद्य एकाहपश्चाहौ त्र्यहं वा गुरुलाघवात् ।

लभेन्मासं त्रिपक्षं वा सप्ताहं वा ऋणादिषु ॥

गौतमोपि 'संवत्सरं प्रतीक्षेत' इति । अत्र व्यवस्थामाह कात्यायनः—

कालं शक्तिं विदित्वा तु कार्याणां च बलाबलम् ।

अल्पं वा बहु वा कालं दद्यात्प्रत्यर्थिने प्रभुः ॥

कालः अर्थसम्बन्धादेः । शक्तिः कार्यिणाम् । कार्याणां साध्यभूतार्थानाम् । श्लोकस्यार्थस्तु तेनैव प्रपञ्चितः—

सद्यः कृते सद्य एव मासातीते दिनं भवेत् ।

षडाब्दिके त्रिरात्रं स्यात् सप्ताहं द्वादशाब्दिके ॥

विंशत्यब्दे दशाहं तु मासार्धं वा लभेत सः ।

मासं त्रिंशत्समातीते त्रिपक्षं परतो भवेत् ।

शक्तितो व्यवस्थां च प्रदर्शयति—

कालं संवत्सरादर्वाक् स्वयमेव यथेप्सितम् ।

संवत्सरं जडोन्मत्तमनस्के व्याधिपीडिते ॥

दिगन्तरप्रपन्ने वा अज्ञातार्थे च वस्तुनि ।

मूलं वा साक्षिणो वाऽथ परदेशे स्थिता यदा ॥

तत्र कालो भवेत्पुंसामा स्वदेशसमागमात् ।

संवत्सरादर्वाग्दिनादिनानापक्षास्त्रिपक्षान्ताः कार्याणां शक्त्यनुसारतः सभापतिना व्यवस्थापनीयाः । मूलं विवादाध्यासितं धनम् । तथा कार्यापेक्षया व्यवस्थां स्पष्टयति—

दिनं मासार्धमासौ वा ऋतुस्संवत्सरोपि वा ।
क्रियास्थित्यनुरूपस्तु देयः कालः परेण तु ॥

क्रियास्थितिः कार्यगुरुलाघवस्थितिः । एवं व्यवस्थापितान्यतमकाले संप्राप्ते पूर्वपक्षाक्षरार्थस्यान्यूनानतिरिक्तमुत्तरं लेख्यमित्याह बृहस्पतिः—

एककाले समानीते प्रत्यर्थी सभ्यसन्निधौ ।
पूर्वपक्षाक्षरसमं लेखयेदुत्तरं ततः ॥

अत्र नृपं प्रत्याह कात्यायनः—

यावान् यस्मिन् समाचारः पारंपर्यक्रमागतः ।
तं प्रतीक्ष्य यथान्यायमुत्तरं दापयेन्नृपः ॥

उत्तरलक्षणं त्वाह प्रजापतिः—

पक्षस्य व्यापकं सारमसन्दिग्धमनाकुलम् ।
अव्याख्यागम्यमित्येतदुत्तरं तद्विदो विदुः ॥

पक्षस्य व्यापकं कृत्स्नपक्षाच्छादकम् । सारं प्रागभियोगोत्तरक्षमम् । असंदिग्धं खण्डश्लेषादिरहितम् । अनाकुलं अन्वितार्थम् । अव्याख्यागम्यं सुबोधम् । हारीतोपि—

पूर्वपक्षार्थसम्बद्धमनेकार्थमनाकुलम् ।

अनल्पमव्यस्तपदं व्यापकं नातिभूरि च ॥

सारभूतमसंदिग्धमपक्षैकांशसम्भवम् ।

अर्थिश्रवमगूढार्थं देयमुत्तरमीदृशम् ॥

पूर्वपक्षार्थसम्बद्धं अभियोगानुगतम् । अनेकार्थं निष्कृष्टार्थजातम् । अव्यस्तपदं निश्चितप्रतिज्ञापूर्वकम् । अपक्षैकांशसंभवं अनवेशेषितस्वपक्षैकदेशम् । अर्थिश्रवं पूर्वावेदकश्रुतम् । अगूढार्थं अवक्रोक्तिप्रसिद्धपदैकवेद्यम् । एवंलक्षणमुत्तरं चतुर्विधं ज्ञेयम्—

चतुर्विधः पूर्वपक्षः प्रतिपक्षस्तथैव च ।

इति बृहस्पतिस्मरणात् । कथं पुनः प्रतिपक्षचातुर्विध्यमित्यपेक्षिते नारदः—

मिथ्या सम्प्रतिपत्त्या वा प्रत्यवस्कन्दनेन वा ।

प्राङ्न्यायविधिसिद्ध्या वाऽप्युत्तरं स्याच्चतुर्विधम् ॥

इत्थंभूतलक्षणा चेयं तृतीया । तत्र मिथ्यासंप्रतिपत्त्योर्लक्षणमाह कात्यायनः —

अभियुक्तोऽभियोगस्य यदि कुर्यात्तु निह्नवम् ।

मिथ्या तत्तु विजानीयात् उत्तरं व्यवहारतः ॥

साध्यस्य तथ्यवचनं प्रतिपत्तिरुदाहृता ।

इति । प्रत्यवस्कन्दनस्य च लक्षणं नारदेनोक्तम्—

अर्थिना लिखितो योऽर्थः प्रत्यर्थी यदि तत्तथा ।

प्रपद्य कारणं ब्रूयात् प्रत्यवस्कन्दनं स्मृतम् ॥

इति । प्राङ्न्यायस्य लक्षणमाह हारीतः—

अस्मिन्नर्थे ममानेन वादः पूर्वमभूत्तदा ।
जितोऽयमिति चेद्ब्रूयात् प्राङ्न्यायं स्यात्तदुत्तरम् ॥

इति । एवमुक्तलक्षणान्युत्तराणि स्पष्टीकर्तुं प्रजापतिनाऽप्युक्तानि –

यावदावेदितं किंचित् मत्सम्बन्धमिहार्थिना ।
तावत्सर्वमसद्भूतमिति मिथ्योत्तरं स्मृतम् ॥
अस्यैव देयमेवैतत्[1] नासद्भावितमर्थिना ।
इति संप्रतिपत्त्याख्यं द्वितीयमिदमुत्तरम् ॥
दत्तमेवं ममानेन किं त्वस्यापि मया पुनः ।
प्रतिदत्तमितीदृक्च प्रत्यवस्कन्दनं स्मृतम् ॥
अस्मिन्नर्थान्तरे पूर्वमारब्धोऽस्मत्यहमर्थिना ।
जितश्चायं मया तत्र प्राङ्न्यायविधिरुच्यते ॥

अयं च प्राङ्न्यायस्त्रिप्रकार इत्याह कात्यायनः—

विभावयामि कुलिकैः साक्षिभिर्लिखितेन वा ।
जितश्चैव मयाऽयं प्राक् प्राङ्न्यायस्त्रिप्रकारकः ॥

कुलिकैरिति प्रकृतव्यवहारद्रष्टॄणामुपलक्षणार्थम् । तथा मिथ्या चतुर्विधेत्याह स एव—

मिथ्यैतन्नाभिजानामि तदा तत्र न संनिधिः ।
अजातश्चास्मि तत्काल इति मिथ्या चतुर्विधा ॥

इति । एवं संप्रतिपत्तेरपि गृहीतं, सत्यं, यथाऽयं वक्ति तथैवेत्येवमादयो भेदा यथासम्भवमूहनीयाः । प्रत्यवस्कन्दनस्यापि गृही-

[1] अस्यैतदेवमेवैतत् ॥ पा ॥

तं प्रतिदत्तं, प्रतिग्रहेण वा लब्धमित्यादयो भेदा द्रष्टव्याः। अत्र बृहस्पतिः—

प्रत्यर्थिविधिराख्यातः सङ्गतार्थप्रपादने।
चतुर्विधस्याप्यधुना यन्न ग्राह्यं तदुच्यते॥
प्रस्तुतादन्यमध्यस्थं न्यूनाधिकमसंगतम्।
अव्याप्यसारं संदिग्धं प्रतिपक्षं न लेखयेत्॥

प्रस्तुतादन्यत् अर्थिलिखिताभियोगापरिहारकम्। मध्यस्थं प्रतिपक्षभावराहितम्। असंगतं अभियोगाननुगतम्। कात्यायनोपि—

अप्रसिद्धं विरुद्धं यदत्यल्पमतिभूरि च।
संदिग्धासम्भवाव्यक्तमन्यार्थं चातिदोषवत्॥
अव्यापकं व्यस्तपदं निगूढार्थं तथाऽऽकुलम्।
व्याख्यागम्यमसारं च नोत्तरं शस्यते बुधैः॥

इति। अत्राद्यान् पञ्चोत्तराभासान् स एव व्याचष्टे—

चिह्नाकारसहस्रं तु समयं चाविजानता।
भाषान्तरेण वा प्रोक्तमप्रसिद्धं तदुत्तरम्॥

लाञ्छनावयवसंस्थानसङ्ख्यासमयानभिज्ञोक्तमदेशभाषयोक्तं चाप्रसिद्धमित्यर्थः।

प्रतिदत्तं मया बाल्ये प्रतिदत्तं मया न हि।
यदेवमाह विज्ञेयं विरुद्धं तदिहोत्तरम्॥

पूर्वापरविरुद्धाभिधानं विरुद्धोत्तरमित्यर्थः।

जितः पुरा मयाऽयं च त्वर्थेऽस्मिन्निति भाषितुम्।

पुरा मयाऽयमिति यत्तदूनं चोत्तरं स्मृतम् ॥

अस्मिन्नर्थे पुराऽयं मया जित इति वक्तव्ये पुरा मयेत्येतावन्मात्रमुत्तरमत्यल्पमित्यर्थः ।

गृहीतमिति वाच्यं तु कार्यं तेन कृतं मया ।
पुरा गृहीतं यद्द्रव्यमिति यच्चातिभूरि तत् ॥

गृहीतमित्येतावन्मात्रेण सत्योत्तरे वक्तव्ये कार्यं तेनेत्यादिकमुत्तरमतिभूरीत्यर्थः ।

देयं मयेति वक्तव्ये मयादेयमितीदृशम् ।
संदिग्धमुत्तरं ज्ञेयं व्यवहारे बुधैस्तथा ॥

मयादेयमित्यत्र त्वकारप्रश्लेषसम्भवाददेयमित्यप्यवगमात् संदिग्धमेवंविधमित्यर्थः । असम्भव अस्माभिर्देयं धनमस्मत्प्रपौत्रपुत्रेण दत्तमित्येवंविधमुत्तरम् । अव्यक्तं एतदुत्तरमिति सुखेनाभिधातुमशक्यम् । एतौ चोत्तराभासौ स्पष्टाविति न तेन व्याख्यातौ । अन्यार्थं व्याचष्टे—

बलाबलेन चैतेन साहसं स्थापितं पुरा ।
अनुक्तमेतन्मन्यन्ते तदन्यार्थमितीरितम् ॥

अर्थिनो यदसद्वृत्तकथन एव पर्यवसितं मिथोविरुद्धपदवच्च तदन्यार्थमित्यर्थः । अतिदोषवत् अत्युक्त्या दोषवत्, शतं देयमित्युक्ते द्विशतं दत्तमित्यादि । अव्यापकादिचतुष्टयं तेनैव व्याख्यातम्—

अस्मै दत्तं मया सार्धं सहस्रमिति भाषिते ।
प्रतिदत्तं तदर्धं यत् तदिहाव्यापकं स्मृतम् ॥
पूर्ववादी क्रियां यावत्सम्यङ्नैव निवेशयेत् ।
मया गृहीतं पूर्वं नो तद्व्यस्तपदमुच्यते ॥

पूर्वपक्षनिश्चयादर्वाक् दीयमानं मिथ्याद्युत्तरं व्यस्तपदमित्यर्थः ।

तत्किं तामरसं कश्चिदगृहीतं प्रदास्यति ।
निगूढार्थं तु तत् ज्ञेयमुत्तरं व्यवहारतः ॥

अगृहीतं पद्ममतो न प्रददामीत्युदाहृतोत्तराभासस्यार्थः । सार्व-भौमप्रयोगासिद्धतामरसादिपदवद्वक्रोक्त्यादिमच्चोत्तरं निगूढार्थं विज्ञेयमिति श्लोकार्थः ।

किं तेनैव सदादेयं मयादेयं भवेदिति ।
एतदाकुलमित्युक्तमुत्तरं तद्विदो विदुः ॥

अनन्वितानेकपदार्थवदाकुलमित्यर्थः । व्याख्यागम्यं स्वतो दुर-वबोधम् । असारं तेनोक्तम्—

काकस्य दन्ता नो सन्ति सन्तीत्यादि यदुत्तरम् ।
असारमिति तत्त्वेन सम्यङ्नोत्तरमिष्यते ॥

काकदन्तसमुद्भवोत्तरवन्निष्प्रयोजनमसारमित्यर्थः । तथैकस्यां भाषायां सत्यमिथ्याद्यनेकोत्तरमनुत्तरमित्याह स एव—

पक्षैकदेशे यत्सत्यमेकदेशे च कारणम् ।
मिथ्या चैवैकदेशे च सङ्करात्तदनुत्तरम् ॥

ननु साङ्कर्येऽपि तेन तेनोत्तरेण तस्य तस्यांशस्य निरसनद्वारो-

त्तरसमुदायस्य कृत्स्नपक्षव्यापकत्वसंभवात् कथमनुत्तरता? सत्यं, अत एवानुत्तरत्वसमर्थनार्थमुक्तं तेनैव—

न चैकस्मिन् विवादे तु क्रिया स्याद्वादिनोर्द्वयोः।
न चार्थसिद्धिरुभयोः न चैकत्र क्रियाद्वयम्॥

इति। अयमर्थः— क्रिया लिखितादिप्रमाणं, तत्प्रत्यवस्कन्दने प्राङ्न्याये च प्रत्यर्थिन एव भवति, मिथ्योत्तरे त्वर्थिन एव। सत्ये तु न कस्यापीति वक्ष्यते। एवंच यत्र सत्येतरेषां त्रयाणां सङ्करः तत्र प्रत्यर्थिनः प्रमाणद्वयमर्थिनश्चैकं प्रमाणं प्राप्नोति। यत्र सत्यमिथ्येतरयोर्द्वयोस्तत्र प्रत्यर्थिन एव प्रमाणद्वयम्। यत्र पुनर्मिथ्याकरणयोर्मिथ्याप्राङ्न्याययोर्वा तत्रार्थिप्रत्यर्थिनोरेकमेकं प्रमाणम्। न च यथा प्राप्तं तथैवास्त्विति वाच्यम्, प्रमाणं हि साध्यसिद्ध्यर्थं क्रियते, एकस्मिन्व्यवहारे चैकमेव साध्यमेकस्यैव वादिनः, तेन तत्र नोभयोः प्रमाणं, एकस्य वा प्रमाणद्वयं भवितुमर्हति, उभयोस्साध्याभावात्। एकस्य साध्यस्य चैकेन प्रमाणेन सिद्धावन्यस्य वैय्यर्थ्यात्। सत्यस्य त्वितरैस्सङ्करे यद्यपि नायं दोषः, तथाऽप्येकस्मिन् व्यवहारे पादचतुष्टये तदर्धे च समाप्तिर्विरुद्धेति तत्राप्यनुत्तरत्वमेव। तस्माद्युक्तमुक्तं 'सङ्करात्तदनुत्तरम्' इति। एवंच सर्वत्र व्यवहारे पक्षव्याप्येकमेवोत्तरं ग्राह्यम्। यत्र पुनः सर्वथा तथाविधमुत्तरं न लभ्यते, किंतु एकैकांशव्यापकमनेकमुत्तरं तत्रागत्योत्तरवशेन नानाप्रतिज्ञाः पक्षदोषपरिहाराय कृत्वा क्रमेणैकैकप्रतिज्ञाया एकै-

कमुत्तरं ग्राह्यम्। अन्यथा तत्र निर्णयाभाव एव स्यात् । अत एवोक्तं 'सङ्करात्तदनुत्तरम्' इति। उक्तविधया सङ्करे निराकृते स्यादेवोत्तरमित्यभिप्रायः। अत एव चास्मिन्नेव विषये हारीतेनोत्तरग्रहणे पौर्वापर्यं प्रश्नपूर्वकमुक्तम्—

मिथ्योत्तरं कारणं च स्यातामेकत्र चेदुभे।
सत्यं वाऽपि सहान्येन तत्र ग्राह्यं किमुत्तरम्॥

पूर्वमिति शेषः। पूर्वं यद्ग्राह्यं तदाह—

यत्प्रभूतार्थविषयं यत्र वा स्यात् क्रियाफलम्।
उत्तरं तत्र तत् ज्ञेयमसङ्कीर्णमतोऽन्यथा॥

अयमर्थः—सत्येतरोत्तरानेकत्वे बह्वर्थविषयमग्रे ग्राह्यम्। सह सत्येनानेकत्वे बह्वर्थमपि सत्यं विहायोत्तरान्तरमेवादावुपादेयम्, सत्येक्रियाफलाभावादिति। न चैवं क्रमवाचिपदाध्याहारापत्तेः यत्रोत्तरकाले पक्षव्यापकानेकोत्तरोपन्यासः, यथा—केनचिन्मानवेन मदीया गौर्नष्टा दृष्टाऽस्य सद्मनीत्यभियुक्तो वक्ति मिथ्यैतदस्मद्भवन एव सा सम्भूतेत्येवमादि। तद्विषयमेवेदं वचनमिति वाच्यम्। यत उक्तं 'असङ्कीर्णमतोऽन्यथा' इति,तस्यायमर्थः—असङ्कीर्णमुत्तरं एवंक्रमे भवति, अतोऽन्यथा यौगपद्ये सङ्कीर्णमेव स्यादिति। पक्षव्यापकानेकोत्तरे तु विकल्पाविषये न जातुचित्सङ्करावसरः। तस्मात्सङ्करोत्तरविषयमेवेदं वचनम्। अत एव पक्षव्यापकानेकोत्तरविषये वचनान्तरमारब्धं तेनैव—

'मिथ्याकरणयोर्वाऽपि ग्राह्यं कारणमुत्तरम्'

इति। कारणोत्तरस्य अनन्यथासिद्धत्वादिना मिथ्यातो गुरुतरत्वादित्यभिप्रायः। अतो मिथ्याकारणयोरुदाहरणमात्रत्वादुत्तरान्तरसन्निपातेऽपि गुरुतरं ग्राह्यमित्यूह्यम्। यत्र पुनः सङ्करोत्तरे तुल्यबलतया न पूर्वोक्तक्रमहेतुरस्ति तत्राप्यैच्छिकक्रमेणोत्तरं ग्राह्यं निर्णयस्यावश्यकत्वात्। एवं निरूपितमुत्तरं प्रतिवादिना स्वयमेव देयम्। तथा च हारीतः—

तत्राभियोगानुगतमुत्तरं प्रतिवादिना।
निष्कृष्टार्थं प्रदेयं स्यात् दोषसंज्ञाविवर्जितम्॥

यदा पुनस्स्वयमेव न ददाति उत्तरं, प्रदानकालश्चातिक्रान्तः तदाऽप्याह स एव—

पूर्वपक्षे यथार्थं तु न दद्यादुत्तरं यदा।
प्रत्यर्थी दापनीयस्स्यात्सामादिभिरुपक्रमैः॥

दापनीयो नृपेणेति शेषः। तथाच नारदः—

यथार्थमुत्तरं दद्याददद्दापयेन्नृपः।
सामभेदादिभिर्मार्गैर्यावत्सोर्थस्समुद्धृतः॥

सामादयो हारीतेन दर्शिताः—

प्रियपूर्वं वचस्साम भेदस्तु भयदर्शनम्।
अर्थापकर्षणं दानं दण्डस्ताडनबन्धनम्॥

तथा वसिष्ठेनापि—

कौटिल्यं सामभेदौ च दण्डश्चेति चतुष्टयम्।

मायोपेक्षेन्द्रजालानि सप्तोपायाः प्रकीर्तिताः ॥

इति । एतैरप्युपायैरसाध्यं प्रत्याह स एव—

उपायैश्चोद्यमानस्तु न दद्यादुत्तरं तु यः ।
अतिक्रान्ते सप्तरात्रे जितोसौ दातुमर्हतीति ॥

इति स्मृतिचन्द्रिकायामुत्तरपादः.

अथ विवादविषयाणि कानिचिद्वचनानि लिख्यन्ते

तत्र याज्ञवल्क्यः—

अभियोगमनिस्तीर्य नैनं प्रत्यभियोजयेत् ।

इति । अनिस्तीर्य अपरिहृत्येत्यर्थः । अत्रापवादमाह स एव—

कुर्यात्प्रत्यभियोगं तु कलहे साहसेषु च ।

इति । प्रत्यपराधसम्भव इति शेषः । कलहे पारुष्यद्वय इत्यर्थः । अभियोक्तारं च प्रत्याह स एव—

अभियुक्तौ न चान्येन नोक्तं विप्रकृतिं नयेत् ।

इति । अन्येनार्थिनाऽभियुक्तं तदभियोगपरिहारादर्वागन्योऽर्थी नाभियुञ्जीत । तथाऽभियोक्तुमुक्तं वक्त्राऽन्यथा न वक्तव्यमित्यर्थः । यः पुनरन्यथा वक्ति सोऽन्यथावादित्वेन हीनो भवति । तथा च नारदः—

अन्यवादी क्रियाद्वेषी नोपस्थाता निरुत्तरः ।
आहूतविपलायी च हीनः पञ्चविधः स्मृतः ॥

इति । तत्रान्यवादितया हीनस्तेन निरूपितः—

पूर्ववादं परित्यज्य योऽन्यमालम्बते पुनः ।
वादसङ्क्रमणात् ज्ञेयो हीनवादी स वै नरः ॥

पूर्ववाद आवेदनम् । तथा च कात्यायनः—

श्रावयित्वा यथाकार्यं त्यजेदन्यद्वदेदसौ ।
अन्यपक्षाश्रयस्तेन कृतो वादी स हीयते ॥

तथा परमभियुज्य नाहमभियुनज्मि इत्येवं विरुद्धं यो वदेत् सोऽप्यन्यवादितया हीन इत्याह स एव—

न मयाऽभिहितं कार्यमभियुज्य परं वदेत् ।
विब्रुवंश्च भवेदेवं हीनं तमपि निर्दिशेत् ॥

तथाच पत्रलिखितं पूर्वपक्षमन्यथा कुर्वन्नप्यन्यथावादितया हीन इत्याह स एव—

लेखयित्वा तु यो वाक्यं हीनं वाऽप्यधिकं पुनः ।
वदेद्वादी स हीयेत नाभियोगं तु सोऽर्हति ॥

लेखयित्वा पत्र इति शेषः, भूम्यादावावापोद्धारस्य तेनैवोक्तत्वात् । अभियोगः पूर्वपक्षः तं कर्तुं नार्हतीत्यर्थः । एतच्चानर्हत्वमुत्तरे निवृत्ते सति वदतो द्रष्टव्यम् । अनिवृत्ते तूत्तरे हीनतैव, नानर्हत्वं, औत्तरनिवृत्तेः पूर्वपक्षशोधनस्य मोहादावगत्याऽभ्यनुज्ञानात् । तथा क्रियाद्वेषितयाऽनुपस्थायितया च हीनस्तेनैव निरूपितः—

सभ्याश्च साक्षिणश्चैव क्रिया ज्ञेया मनीषिभिः ।
तां क्रियां द्वेष्टि यो मोहात् क्रियाद्वेषी स उच्यते ॥

आह्वानादनुपस्थानात् सद्य एव प्रहीयते ।

इति । आह्वानानन्तरमनागमने तदानीमेव हीनो भवतीत्यर्थः ।
तथा निरुत्तरतया हीनं निरूपयितुमाह स एव—

ब्रूहीत्युक्तोऽपि न ब्रूयात् सद्यो बन्धनमर्हति ।

द्वितीयेऽहनि दुर्बुद्धेर्विद्यात्तस्य पराजयम् ॥

पराजयो हीनता । अत एव हारीतः—

सापदेशं हरेत्कालमब्रुवंश्चापि संसदि ।

उक्त्वा वचो विब्रुवंश्च हीयमानस्य लक्षणम् ॥

सापदेशं सव्याजम् । तथाच कात्यायनः—

व्याजेनैव तु यत्रासौ दीर्घकालमभीप्सति ।

सापदेशं तु तं विद्याद्वादहानिकरं स्मृतम् ॥

इति । आहूतविपलायी तु अभियोगपरिहारार्थमाह्वानं बुद्ध्वा प्रच्छन्नचारी । एतेषां तूत्तरोत्तरस्य हीनता गुर्वीति ज्ञापयितुं हीनः पञ्चविध इत्युक्तं, न पुनः पञ्चविध एव हीन इत्यवधारयितुं, विधान्तरतोऽपि हीनानां स्मरणात् । हीनताया गुरुत्वज्ञापनं तूत्तरोत्तरस्य दण्डभूयस्त्वज्ञापनार्थम् । उक्तं च तथा कात्यायनेन—

अन्यवादी पणान् पञ्च क्रियाद्वेषी पणान् दश ।

नोपस्थाता दश द्वौ च षोडशैव निरुत्तरः ॥

आहूतविपलायी च पणान् ग्राह्यस्तु विंशतिम् ।

अत्र तृतीयपञ्चमयोः दण्डप्राप्तौ विशेषमाह स एव—

त्रिराहूतमनायान्तमाहूतविपलायिनम् ।
पञ्चरात्रमतिक्रान्तं विनयेत्तं महीपतिः ॥

तथा प्रकारान्तरेणापि हीनस्तेन दर्शितः—

श्राविंतव्यवहाराणामेकं यत्र प्रभेदयेत् ॥
वादिनं लोभयेच्चैव हीनं तमिति निर्दिशेत् ॥

बृहस्पतिनाऽपि—

भयं करोति भेदं वा भीषणं वा निरोधनम् ।
एतानि वादिनोऽर्थस्य व्यवहारे स हीयते ॥

अर्थव्यवहारे भयादीनि समस्तान्यसमस्तानि वा येन वादिना कृतानि स हीयत इत्यर्थः । भीषणं मुखान्तरेण भीत्युत्पादनम् । मनुनाऽपि—

अदेश्यं यश्च दिशति निर्दिश्यापह्नुते च यः ।
यश्चाधरोत्तरानर्थान्विहीनान्नावबुध्यते ॥
अपदिश्यापदेशं च पुनर्यस्त्वपधावति ।
सम्यक्प्रणिहितं चार्थं पृष्टस्सन्नाभिनन्दति ॥
सन्ति ज्ञातार इत्युक्त्वा दिशेत्युक्तो दिशेन्न यः ।
धर्मस्थः कारणैरेतैर्हीनोऽसाविति निर्दिशेत् ॥

इति । अयमर्थः—

अदेश्यं निर्णयसमयासम्भविनं साक्षिणं यो निर्दिशति, सम्भविनं वा निर्दिश्य योऽपह्नुते न मया निर्दिष्ट इति, यश्चात्मनो वचनगतक्रमविरोधं न जानाति, यः पुनरप-

देशं मम पीडा वर्तत इत्यादिव्याजमपदिश्य अपसरति, सम्यक्प्रणिहितं सुष्ठुक्तमर्थमनूद्यात्र किं ब्रवीषीति पृष्टो यो न किंचिदुत्तरं प्रस्तौति, यश्च साक्षिणः सन्तीत्युक्त्वा कथय तानित्युक्तोपि न कथयति असौ हीन इति धर्माधिकरणस्थः पूर्वोक्तकारणैर्निर्दिशेदिति । एतेष्वपि हीनेषु दोषानुरूपो दण्डो ग्राह्यः । तथा च हीनाधिकारे कात्यायनः—

दोषानुरूपं संग्राह्यः पुनर्वादो न विद्यते ।

इति । प्रकृतार्थसिद्ध्यर्थमिति शेषः । अयं च प्रतिषेधो मन्युकृतविवाद एव, यत आह नारदः—

सर्वेष्वर्थविवादेषु वाक्छले नावसीदति ।

पशुस्त्रीभूम्यृणादाने शास्योप्यर्थान्न हीयते ॥

पश्वादिसर्वार्थविवादेषु वाक्छले प्रमादाभिधाने कृतेऽपि नावसीदति नात्यन्तं हीयते, यतस्तत्र दण्ड्यस्यापि न प्रकृतार्थहानिरित्यर्थः । अत्रापवादमाह कात्यायनः—

उभयोर्लिखिते वाक्ये प्रारब्धे कार्यनिश्चये ।

अनुक्तं तत्र यो ब्रूयात् तस्मादर्थात्स हीयते ॥

याज्ञवल्क्योपि—

संदिग्धार्थं स्वतन्त्रो यः साधयेद्यश्च निष्पतेत् ।

न चाहूतो वदेत् किंचिद्धीनो दण्ड्यश्च स स्मृतः ॥

स्वतन्त्रः परीक्षकनिरपेक्षः । निष्पतेत् देयमदत्वा निष्पत्य तिष्ठेत्, पलायेत वा । दण्डग्रहणेनैव हीनत्वसिद्धेः पुनर्हीनग्रह-

णं प्रकृतादर्थाद्धीन इति ज्ञापनार्थम् । अत एव नारदः—

आनिवेद्य तु यो राज्ञे संदिग्धेऽर्थे प्रवर्तते ।
प्रसह्य स विनेयस्स्यात् स चाप्यर्थो न सिद्ध्यति ॥

इति । बृहस्पतिरपि—

आहूतप्रपलायी च मौनी साक्षिपराजितः ।
स्ववाक्यप्रतिपन्नश्च हीनवादी चतुर्विधः ॥

स्ववाक्यप्रतिपन्नः स्ववाचैव संप्रतिपन्नः । अत्रापि चतुर्विधग्रहणमेतेषामुत्तरोत्तरस्याचिरं प्रकृतादर्थाद्धीनत्वं भवतीति ज्ञापयितुं न पुनः प्रकृतादर्थाद्धीनश्चतुर्विध एवेति नियन्तुं, विधान्तरस्याप्युक्तत्वात् । तत्र कदा कस्य हीनत्वमित्यपेक्षिते आह स एव—

प्रपलायी त्रिपक्षेण मौनकृत्सप्तभिर्दिनैः ।
साक्षिभिन्नस्तत्क्षणेन प्रतिपन्नश्च हीयते ॥

तथा निर्दिष्टान् साक्षिपुरुषानवादयतोऽप्येवंविधहीनत्वं चिरेण भवतीत्याह स एव—

साक्षिणस्तु समुद्दिश्य यस्तु तान्न विवादयेत् ।
त्रिंशद्रात्रात् त्रिपक्षाद्वा तस्य हानिः प्रजायते ॥

न वादयेत्कामत इति शेषः । तथाच कात्यायनः—

साक्षिणो यस्तु निर्दिश्य कामतो न विवादयेत् ।
स वादी हीयते तस्मात् त्रिंशद्रात्रात्परेण तु ॥

इति । अकामतश्चेन्न हीयते । अत एव बृहस्पतिः—

आचारकरणे दिव्ये कृत्वोपस्थाननिश्चयम् ।

नोपस्थितो यदा कश्चिच्छलं तत्र न कारयेत् ॥
दैवराजकृतो दोषस्तस्मिन् काले यदा भवेत् ।
अवधित्यागमात्रेण न भवेत्स पराजितः ॥

इति । 'छलं तत्र न कारयेत्' इति वदन् अन्यत्रार्थहानिप्रतिपादकवचनच्छलानिरसनेनापि व्यवहारनयनं कार्यमिति ज्ञापयति । एवंचार्थविवादेषु यत्र नार्थहानिवचनं तत्रैव हीनस्य वादो ग्राह्यो नान्यत्रेत्यवगन्तव्यम् । अत एव कात्यायनः—

पलायनानुत्तरत्वादन्यपक्षाश्रयेण च ।
हीनस्य गृह्यते वादो न स्ववाक्यजितस्य तु ॥

इति । पलायनादाववधिभूतकालातिक्रमणेनागमनादिकर्तुरर्थहान्यभावाद्वादो ग्राह्य इत्यर्थः । तत्र यदि हीनेनेतरस्य पराजयः तदा विशेषस्तेनैव दर्शितः—

यो हीनवाक्येन जितस्तस्योद्धारं विदुर्बुधाः ।
स्ववाक्यहीनो यस्तु स्यात्तस्योद्धारो न विद्यते ॥

इति । याज्ञवल्क्यस्तु दुष्टवादिपरिज्ञानार्थमाह—

देशाद्देशान्तरं याति सृक्किणी परिलेढि च ।
ललाटं स्विद्यते चास्य मुखं वैवर्ण्यमेति च ॥
परिशुष्यत्स्खलद्वाक्यो विरुद्धं बहु भाषते ।
वाक्चक्षुः पूजयति नो तथोष्ठौ निर्भुजत्यपि ॥
स्वभावाद्विकृतिं गच्छेन्मनोवाक्कायकर्मभिः ।
अभियोगेऽथ साक्ष्ये च दुष्टस्स परिकीर्तितः ॥

इति । सृक्किणी ओष्ठप्रान्तौ । निर्भुजति कुटिलीकरोति । स्वभावाद्विकृतिं गच्छेत् स्वाभाविकधर्माद्वैपरीत्यमेवं गच्छेदित्यर्थः। मनुरपि—

आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च।
नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः॥

इति। दुष्टस्येति शेषः। एवं दुष्टान्तःकरणतया ज्ञातस्यापि न दण्डो न प्रकृतार्थाद्धानिर्वा। तयोर्मुनिभिरनभिधानात्। अदुष्टस्यापि कथंचिदेवंविधचिह्नान्वयसम्भवात्। दुष्टाभिधायकवचनानां च तद्रक्षणादाववधानविधानार्थत्वेनावैयर्थ्यात्। ये पुनरेकान्तपराजयभयादर्वाक् प्रमाणकरणात् स्वतोऽपि वादतो निवर्तन्ते ते दण्ड्या इत्याह बृहस्पतिः—

पूर्वोत्तरे संनिविष्टे विचारे सम्प्रवर्तिते।
प्रशमं ये मिथो यान्ति दाप्यास्ते द्विगुणं दमम्॥

इति। मिथो यान्ति नृपं वञ्चयित्वेति शेषः। अत एव कात्यायनः—

आवेद्य प्रगृहीतार्थाः प्रशमं यान्ति ये मिथः।
सर्वे द्विगुणदण्ड्यास्स्युः विप्रलम्भान्नृपस्य ते॥

इति। एवंचावञ्चनया प्रशान्तानां न दण्डः। अत एव बृहस्पतिः—

पूर्वोत्तरेऽभिलिखिते प्रक्रान्ते कार्यनिर्णये।
द्वयोस्संतप्तयोस्सन्धिस्स्यादयःखण्डयोरिव॥

साक्षिसभ्यविकल्पस्तु भवेत्तत्रोभयोरपि ।
डोळायमाने यौ सन्धिं प्रकुर्यातां विचक्षणौ ॥

प्रमाणसमतो यत्र भेदश्शास्त्रचरित्रयोः ।
तत्र राजाज्ञया सन्धिरुभयोरपि शस्यते ॥

इति । एकस्य वादिनः एकान्तपराजयादर्वाक् यौ सन्धिं प्रकुर्यातां तौ विचक्षणावित्यर्थः ।

इति स्मृतिचन्द्रिकायां विवादविषयाणि.

अथ प्रत्याकलितपादः.

तत्र बृहस्पतिः—

ये तु तिष्ठन्ति करणे तेषां सभ्यैर्विभावना ।
कथयित्वोत्तरं सम्यक् दातव्यैकस्य वादिनः ॥

तेषां धर्माधिकरणस्थानां मध्ये एकस्यार्थिनः प्रत्यर्थिनो वा विभावना क्रिया सभ्यैर्निर्धारयितव्येत्यर्थः । तथाच कात्यायनः—

शोधिते लिखिते सम्यगिति निर्दोष उत्तरे ।
प्रत्यर्थिनोऽर्थिनो वाऽपि क्रियाकरणमिष्यते ॥

अर्थिनः प्रत्यर्थिनो वा यस्य साध्यमस्ति असौ तत्साध्यसिद्धये सदुत्तरानन्तरमेव प्रमाणलेखनं कुर्यादित्यर्थः । तथाच याज्ञवल्क्यः-

ततोऽर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनम् ।

इति । उत्तरसिद्धिसमनन्तरमेव साध्यवान् वादी प्रमाणमुद्भावयेदित्यर्थः । किं तत्प्रमाणमित्यपेक्षिते स एवाह—

प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितम् ।
एषामन्यतमाभावे दिव्यान्यतममुच्यते ॥

दिव्यं धटादिः । तथाच नारदः—

क्रिया तु द्विविधा प्रोक्ता मानुषी दैविकी तथा ।
मानुषी लेख्यसाक्षिभ्यां धटादिर्दैविकी स्मृता ॥

लेख्यसाक्षिभ्यां भुक्त्या च प्रोक्ता मानुषीत्यर्थः । भुक्तेरपि मनुष्यसम्बन्धित्वात् । अत एव बृहस्पतिः—

साक्षिलेख्यानुमानं च मानुषी त्रिविधा स्मृता ।

इति । अनुमानं भुक्तिः, स्वत्वानुरूपकत्वात् । धटादिरपि तेनैव दर्शितः—

धटोऽग्निरुदकं चैव विषं कोशश्च पञ्चमम् ।
षष्ठं च तण्डुलाः प्रोक्तं सप्तमं तप्तमाषकम् ॥
अष्टमं फालमित्युक्तं नवमं धर्मजं भवेत् ।
दिव्यान्येतानि सर्वाणि निर्दिष्टानि स्वयंभुवा ॥

इति । अन्यानि तु दिव्यानि नारदेन निर्दिष्टानि—

सत्यं वाहनशस्त्राणि गोबीजकनकानि च ।
देवतापितृपादाश्च दत्तानि सुकृतानि च ॥

इति । चशब्दोऽन्येषामपि पुत्रशिरस्स्पर्शनादीनां सङ्ग्रहणार्थः । एते च धटादयः सत्यादयश्च दिवि देवैः कृतत्वाद्दिव्यदैविकसंज्ञाद्वयशालिनः । तथाच पितामहः—

यस्माद्देवैः प्रयुक्तानि पुष्करार्थे मनीषिभिः ।

परस्परविशुद्ध्यर्थं तस्माद्दिव्यानि नामतः ॥

अत्रोपक्रमसामर्थ्याद्दैविकानि नामत इति लभ्यते, देवैः प्रयुक्तानीति निमित्तदर्शनात् । उपसंहारसामर्थ्याद्दिवि संभवनिमित्तानीति गम्यते, दिव्यानि नामत इत्युक्तत्वात् । तेन श्रुत्यर्थाभ्यामनेन वचनेन घटादीनामाजिगमनादाज्यमितिवद्यौगिकं नामद्वयमुक्तम् । शपथनाम नारदेनैव तेषामेव दर्शितं—

सप्तर्षयस्तथेन्द्राद्याः पुष्करार्थे तपोधनाः ।
शेपुश्शपथमव्यग्राः परस्परविशुद्धये ॥

इति । व्यासोपि—

अर्थानुरूपाश्शपथाः स्मृतास्सत्यघटादयः ।

इति । यत्तु बृहस्पतिनोक्तं—

घटाद्या धर्मजान्ता च दैवी नवविधा स्मृता ।

इति, तत्र स्वयंभुवेति शेषो द्रष्टव्यः । नारदस्मृतसत्यादिभिस्सह दैव्या वस्तुतो बहुविधत्वात् । या पुनर्नारदीये दिव्यशपथयोः भेदेनोक्तिः—

यदा साक्षी न विद्येत विवादं वदतां नृणाम् ।
तदा दिव्यैः परीक्षेत शपथैर्वा पृथग्विधैः ॥

इति, सा गुरुषु दिव्यशब्दो लघुषु शपथशब्दः प्रायिक इति दर्शयितुं, न पुनस्तयोरर्थभेदकथनाय, लोके तयोः पर्यायशब्दत्वात् । साक्षी न विद्यते इति लिखितादित्रयाभावोपलक्षणार्थः । याज्ञवल्क्येनाशेषमानुषाभावे दिव्यस्मरणात् । अत एव—

सम्भवे साक्षिणां प्राज्ञो दैविकीं वर्जयेत् क्रियाम् ।
संभवे तु प्रयुञ्जानो दैविकीं हीयते ततः ॥

इति । कात्यायनवचनेऽपि साक्षिग्रहणं मानुषोपलक्षणार्थमिति मन्तव्यम् । तथा—

दिवाकृते कार्यविधौ ग्रामेषु नगरेषु च ।
संभवे साक्षिणां चैव दैवी न भवति क्रिया ॥

इति नारदवचनेऽपि दिवाकृतादिसंकीर्तनं मानुषप्रमाणसंभवे दिव्यनिषेधार्थमवगन्तव्यम् । अत एव कात्यायनः—

यद्येकदेशव्याप्ताऽपि क्रिया विद्येत मानुषी ।
सा ग्राह्या न तु पूर्णाऽपि दैविकी वदतां नृणाम् ॥

विशिष्टसाध्ये विशेष्यांशे मानुषसंभवे विशिष्टार्थसाधकमपि न दिव्यं ग्राह्यमित्यर्थः । विशेषणांशसिद्धिस्तु विभावितैकदेशन्यायादल्पशपथेन वा कार्येत्यभिप्रायः । न च वाच्यं एकदेश इत्यविशेषवचनाद्विशेषणांशे विशेष्यांशे वा मानुषसंभवे दिव्यं निषिध्यत इति । यत आह स एव—

सारभूतं पदं मुक्त्वा असाराणि बहून्यपि ।
संसाधयेत् क्रिया या तु तां जह्यात् सारवर्जिताम् ॥

इति । तथा विवादिनोः कथंचिद्दैवमानुषयोरन्यतरत् प्रमाणमन्यतरेण वादिना कृतं निर्णायकमित्यङ्गीकारेऽपि मानुषसंभवे तदेव निर्णायकं न दैविकमित्याह स एव—

यद्येको मानुषीं ब्रूयात् अन्यो ब्रूयात्तु दैविकीम् ।

मानुषीं तत्र गृह्णीयान्न तु दैवीं क्रियां नृपः ॥

एवं च सर्वथा मानुषासम्भवे दिव्यमित्युत्सर्गः। क्वचिदस्याप-वादमाह स एव—

प्रक्रान्ते साहसे वादे पारुष्ये दण्डवाचिके ।
बलोद्भवेषु कार्येषु साक्षिणो दिव्यमेव वा ॥

अयं च विकल्पो गूढसाहसिकेतरविषयः । तत्र मानुषासंभवेन विकल्पासम्भवात् । अत एवोक्तं तेनैव—

गूढसाहासिकानां तु प्राप्तं दिव्यैः परीक्षणम् ।
युक्तिचिह्नेङ्गिताकारवाक्चक्षुश्चेष्टितैर्नृणाम् ॥

गूढसाहासिकानां मुखवेष्टनादिवशादलक्ष्यमूर्तीनामित्यर्थः । यु-क्तिचिह्नादेरप्यभावे तेषां दिव्यं, न पुनः साक्ष्याद्यभावमात्र इति दर्शयितुं पुनर्वचनारम्भः । तथोत्तमसाहासिकानां प्रकटानामपि दिव्येनैव परीक्षणमित्याह स एव—

उत्तमेषु च सर्वेषु साहसेषु विचारयेत् ।
सद्भावं दिव्यदृष्टेन सत्सु साक्षिषु वै भृगुः ॥

ऋणविवादेषु तु विशेषमाह नारदः—

प्रमादाद्धनिनो यत्र न लेख्यं न च साक्षिणः ।
अर्थं चापह्नुते वादी तस्योक्तः त्रिविधो विधिः ॥

वादी गृहीतधनः । विधिः धनसाधनोपायः । सोऽपि तेनैव दर्शितः —

चोदना प्रतिकालं च युक्तिलेशस्तथैव च ।

तृतीयश्शपथः प्रोक्तः तै ऋणं साधयेत् क्रमात् ॥

प्रतिकालं चोदना प्रत्यर्पणकालो यदा यदा प्राप्तस्तदा तदा मदीयं दीयतामिति त्रिश्चतुःपञ्चकृत्वो वा मध्यस्थजन-समक्षं अन्येनाप्रतिहता प्रतिदानप्रेरणा, सा प्रथम उपायः। तदसंभवे युक्तिलेशः अमुष्मिन्देशे अमुष्मिन्कालेऽमुनाऽर्थसंबन्धेन इयत्परिमाणमेतत्कर्मार्थं ऋणं गृहीतं त्वया इत्यादि द्वितीयोपायः। तस्याप्यसंभवे तृतीयोपायः शपथ इत्यर्थः। अयं चार्थः तेनैव दर्शितः—

अभीक्ष्णं चोद्यमानोपि प्रतिहन्यान्न तद्वचः ।
त्रिश्चतुःपञ्चकृत्वो वा परतोऽर्थं समाचरेत् ॥
चोदनाप्रतिघाते तु युक्तिलेशैस्समन्वियात् ।
देशकालार्थसंबन्धपरिमाणक्रियादिभिः ॥
युक्तिष्वप्यसमर्थासु शपथैरेव निर्णयेत् ।
अर्थकालबलापेक्षैरग्न्यम्बुसुकृतादिभिः ॥

कात्यायनोपि—

ऋणे लेख्यं साक्षिणो वा युक्तिलेशादयोपि वा ।
दैविकी वा क्रिया प्रोक्ता प्रजानां हितकाम्यया ॥

तथा विवादमात्रं प्रत्याह स एव—

प्रमाणैर्हेतुना वाऽपि दिव्येनैव तु निश्चयम् ।
सर्वेष्वेव विवादेषु सदा कुर्यान्नराधिपः ॥
सर्वाभावे तु यत्नेन नान्यथैव कदाचन ॥

इति । प्रमाणशब्दहेतुशब्दयोरर्थमाह व्यासः—

लिखितं साक्षिणो भुक्तिः प्रमाणं त्रिविधं स्मृतम्।
अनुमानं विदुर्हेतुस्तर्कश्चेति मनीषिणः ॥

इति । एवं च दृष्टप्रमाणेनासिद्धावदृष्टं प्रमाणमाश्रयणीयं नान्यथेति तात्पर्यार्थः । क्वचित् दृष्टेनासिद्धावप्यदृष्टं नाश्रयणीयमित्याह बृहस्पतिः—

प्रथमे वा तृतीये वा प्रमाणं दैवमानुषम् ।
उत्तरे स्याच्चतुर्थे तुससाक्षिजयपत्रकम् ॥

प्राङ्न्यायोत्तरे साक्षिजयपत्रयोरन्यतरेणासाधयन्वादी न प्राग्विजयीत्यभिप्रायः । अनेनैवाभिप्रायेण व्यासोपि—

प्राङ्न्याये जयपत्रेण प्राड्विवाकादिभिस्तथा ।
सत्यं वादी समाप्नोति यद्यत्तेन निवेदितम् ॥

वादी प्रत्यर्थी, तस्यैव तत्र साध्यवादित्वात् । अत एव बृहस्पतिः-

प्राङ्न्याये प्रत्यवस्कन्दे प्रत्यर्थी साधयेत्स्वयम् ।
उत्तरार्थं प्रतिज्ञार्थं अर्थी मिथ्योत्तरे पुनः ॥

मिथ्योत्तरेऽभ्युपगमाभावेन भाषार्थस्य साध्यताहानात् प्रतिज्ञातार्थमर्थ्येव साधयेदित्यर्थः । कारणोत्तरे तु भाषार्थस्याभ्युपगमादेव साध्यत्वाहानान्न प्रतिज्ञावादिनः प्रतिज्ञातार्थसाधनं, किं तूत्तरार्थे अर्थिना यदनभ्युपगतं कारणं तदेव प्रत्यर्थिना प्रमाणेन साध्यम् । अत एव कात्यायनः—

प्रपद्य कारणं पूर्वमन्यद्गुरुतरं यदि ।

प्रतिवाक्यगतं ब्रूयात्साध्यते तद्धि नेतरत् ॥

पूर्वं प्रतिज्ञावादिनोक्तं प्रपद्य अङ्गीकृत्य अन्यद्गुरुतरमङ्गीकृतप्रतिज्ञातार्थोपमर्दनक्षमं कारणं प्रत्यर्पणादिकं प्रतिवाक्यगतमुत्तरवाक्यस्थं यदि प्रत्यर्थी ब्रूयात् तदा तदेव किल तेन साध्यते, अर्थिनाऽनङ्गीकृतत्वात् । नेतरत् प्रत्यर्थिनाऽङ्गीकृतं प्रतिज्ञातार्थजातं अर्थिना साध्यत इत्यर्थः । प्रपद्येत्युपलक्षणार्थं, तेन प्रप्रतिज्ञावादिनोक्तं मिथ्येत्युक्त्वा कारणाभिधानेऽपि कारणमेव साध्यते ।

मिथ्याकारणयोर्वाऽपि ग्राह्यं कारणमुत्तरम् ।

इति हारीतस्मरणात् । तथा सत्योत्तरे न कस्यापि वादिनः क्रियेत्याह स एव—

प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत्क्रियाम् ।
मिथ्योक्तौ पूर्ववादी तु प्रतिपत्तौ न सा भवेत् ॥

भाषायामुत्तरे च साध्यार्थाभावादित्यभिप्रायः । अतः सम्प्रतिपत्तौ द्विपात्त्वव्यवहारः । तथाच कात्यायनः—

मिथ्योक्तौ स चतुष्पात् स्यात् प्रत्यवस्कन्दने तथा ।
प्राङ्न्याये च स विज्ञेयो द्विपात्सम्प्रतिपत्तिषु ॥

तेन सम्प्रतिपत्तौ क्रियानिर्देशाद्यभावादुत्तरान्त एव व्यवहारः समाप्यते । एवंच मिथ्याकारणयोर्मानुषी दैविकी क्रिया, प्राङ्न्याये तु मानुष्येव सत्ये न काचिदित्यनुसन्धेयम् । मिथ्याकारणयोरपि क्वचिन्न दैविकीत्याह बृहस्पतिः—

वाक्पारुष्ये महीवादे निषिद्धा दैविकी क्रिया ।

इति । तेन तां तत्र न कल्पयेदित्यभिप्रायः । अत एव कात्यायनः—

वाक्पारुष्ये च भूमौ च दिव्यं न परिकल्पयेत् ।

इति । नन्वनेनैव वाक्पारुष्ये दिव्यमुक्तं 'प्रक्रान्ते' इत्यादिना । सत्यमुक्तं तत्तु महापारुष्यविषयं, इदं त्वल्पपारुष्यविषयमिति न किंचिद्विरुद्धम् । भूमाविति स्थावरोपलक्षणार्थम् । अत एव पितामहः—

स्थावरेषु विवादेषु दिव्यानि परिवर्जयेत् ।
साक्षिभिर्लिखितेनाथ भुक्त्या चैतान् प्रसाधयेत् ॥

अत्र मानुषासंभवे हेतुना निर्णयः, तदसम्भवे राजाज्ञयेति मन्तव्यम् । तथा क्वचिद्दिव्यनियमार्थमाह स एव—

महाशापाभिशापेषु निक्षेपहरणे तथा ।
दिव्यैः कार्यं परीक्षेत राजा सत्स्वपि साक्षिषु ॥

कात्यायनोपि—

समत्वं साक्षिणां यत्र दिव्यैस्तत्रापि शोधयेत् ।
प्राणान्तिकविवादे वा विद्यमानेषु साक्षिषु ॥
दिव्यमालम्बते वादी न पृच्छेत्तत्र साक्षिणम् ।

इति । बृहस्पतिरपि—

लिखिते साक्षिवादे च संदेहो जायते यदा ।
अनुमाने च सम्भ्रान्ते तत्र दैवं विशोधनम् ॥

अनुमानं भुक्तिः उल्काहस्तत्वादियुक्तिश्च । व्यासोपि—

मयैतन्न कृतं लेख्यं कूटमन्येन कारितम् ।
अधरीकृत्य तत्पत्रमर्थे दिव्येन निर्णयः ॥

निर्णेतव्येऽर्थे निर्णयं दिव्येन कुर्यादित्यर्थः । कात्यायनोपि—

यत्र स्यात्सोपधं लेख्यं तद्राज्ञश्श्रावितं यदि ।
दिव्येन शोधयेत्तत्र राजा धर्मासनस्थितः ॥

तथा क्वचिल्लेख्यस्य क्वचिद्भुक्तेः क्वचित्साक्षिणश्च सति सम्भवे नियमार्थमाह स एव—

पूगश्रेणीगणादीनां या स्थितिः परिकीर्तिता ।
तस्यास्तु साधनं लेख्यं न दिव्यं न च साक्षिणः ॥
द्वारमार्गक्रियाभोगजलवाहादिके तथा ।
भुक्तिरेव हि गुर्वी स्यात् न लेख्यं न च साक्षिणः ॥
दत्तादत्तेऽथ भृत्यानां स्वामिना निर्णये सति ।
विक्रयादानसम्बन्धे क्रीत्वा धनमयच्छति ॥
द्यूते समाह्वये चैव विवादे समुपस्थिते ।
साक्षिणस्साधनं प्रोक्तं न दिव्यं न च लेख्यकम् ॥

इति । एवमुक्त्वा प्रमाणस्य व्यवस्था परीक्षकैः परिपालनीयेत्याह नारदः—

प्रमाणानि प्रमाणज्ञैः परिपाल्यानि यत्नतः ।
सीदन्ति हि प्रमाणानि प्रमाणैरव्यवस्थितैः ॥

अव्यवस्थितैः प्रमाणैः प्रमाणकर्तारो यतो विनश्यन्ति अतः

कस्यात्र किं प्रमाणं लेख्यमिति प्रत्याकलनकुशलैः प्रत्याकलयितव्यमित्यर्थः। अत्र कैश्चित् पण्डितंमन्यैः—न स्थावरेषु लिखितादिकथनं प्रमाणनियमाय, किंतु प्रायिकत्वप्रदर्शनार्थं, अन्यथा कथंचिल्लेख्यादिनाशे निर्णयाभावः स्यादित्युक्तं, तदयुक्तम्—नियमार्थत्वेऽपि युक्तिभिः पार्थिववचनाद्वा निर्णयसम्भवात्। अत एव पितामहः—

लेख्यं यत्र न विद्येत न भुक्तिर्न च साक्षिणः।
न च दिव्यावतारोस्ति प्रमाणं तत्र पार्थिवः॥
निश्चेतुं ये न शक्यास्स्युर्वादास्संदिग्धरूपिणः।
तेषां नृपः प्रमाणं स्यात् स सर्वस्य प्रभुर्यतः॥

इति। अत एव दृष्टादृष्टप्रमाणमुक्त्वा उक्तं व्यासेन—

एषामभावे राजाज्ञा निर्णयं तु विदुर्बुधाः।

इति। प्रमाणानां स्वरूपतो निषेधवशाद्वा असम्भवे निर्णयो राजाज्ञया भवतीत्यर्थः।

इति स्मृतिचन्द्रिकायां प्रत्याकलितपादः

अथ क्रियापादः

तत्र बृहस्पतिः—

श्रुत्वा पूर्वोत्तरं सभ्यैः निर्दिष्टा यस्य भावना।
विभावयेत्प्रतिज्ञातं सोऽखिलं लिखितादिना॥

भावना क्रिया। नारदोपि—

पूर्ववादेऽभिलिखिते यथाऽक्षरमशेषतः।
अर्थी तृतीयपादे तु क्रियया प्रतिपादयेत्॥

पूर्ववादो भाषा । अभिलिखितं पूर्वपक्षाभिभावकतया लिखितमुत्तरमिति यावत् । तृतीयपादः प्रत्याकलिताख्यः । तस्मिन् सति क्रिया प्रमाणम् । एवं चायमर्थः—भाषोत्तरप्रत्याकलिताख्यपादत्रये सति क्रियया प्रतिपादयेत् स्वकार्यमर्थी प्रमाणेन साधयेदिति । कार्यक्रियाशब्दयोरर्थमाह व्यासः—

कार्यं हि साध्यमित्युक्तं साधनं हि क्रियोच्यते ।
द्विभेदा सा पुनर्ज्ञेया मानुषी दैविकी तथा ॥

साधनं प्रमाणम् । बृहस्पतिरपि क्रियाभेदमाह—

द्विप्रकारा क्रिया प्रोक्ता मानुषी दैविकी तथा ।
एकैकाऽनेकधा भिन्ना मुनिभिस्तत्त्ववेदिभिः ॥

कात्यायनोपि—

पञ्चप्रकारं दैवं स्यान्मानुषं त्रिविधं स्मृतम् ।

इति । पञ्चप्रकारमिति नावधारणार्थम् । तण्डुलतप्तमाषादिविधान्तरस्यापि दैविकस्य स्मृत्यन्तरे दर्शनात् । त्रिविधमिति नियमार्थमेव, स्मृत्युत्तराविसंवादात् । अत एवात्र त्रिविधं स्मृतमित्यर्थः । यत्पुनर्नारदेनोक्तं—

लिखितं साक्षिणश्चात्र द्वौ विधी परिकीर्तितौ ।

इति, न तत्सङ्ख्यानियमार्थम् । तथात्वे—

लिखितं साक्षिणो भुक्तिः प्रमाणं त्रिविधं स्मृतम् ।

इति स्ववचनेन विरोधापत्तिस्स्यादतो भुक्तितो वहुविषयत्वमितरयोरिति वक्तुं ‘द्वौ विधी परिकीर्तितौ’ इत्युक्तमित्यवगन्तव्यम् ।

इति स्मृतिचन्द्रिकायां क्रियाभेदाः.

अथ लेख्यनिरूपणम्

तत्र वसिष्ठः—

लौकिकं राजकीयं च लेख्यं विद्यात् द्विलक्षणम् ।

इति । लौकिकं जानपदम् । तथाच सङ्ग्रहकारः—

राजकीयं जानपदं द्विविधं लिखितं स्मृतम् ।

इति । तत्र राजकीयं शासनादिभेदेन चतुर्विधमित्याह वसिष्ठः—

शासनं प्रथमं ज्ञेयं जयपत्रं तथाऽपरम् ।
आज्ञाप्रज्ञापनापत्रं राजकीयं चतुर्विधम् ॥

तत्र शासनं निरूपयितुमाह याज्ञवल्क्यः—

दत्वा भूमिं निबन्धं वा कृत्वा लेख्यं तु कारयेत् ।
आगामिभद्रनृपतिपरिज्ञानाय पार्थिवः ॥

निबन्धः वाणिज्यादिकारिभिः प्रतिवर्षं प्रतिमासं वा किंचिद्धनमस्मै ब्राह्मणायास्यै देवतायै वा देयमित्यादिप्रभुसमयलभ्योऽर्थः । अत्र यद्यपि धनदातृत्वं वाणिज्यादिकर्तुः, तथाऽपि निबन्धकर्तुरेव पुण्यं, तदुद्देशेनैवेतरस्य प्रवृत्तेः । भूमिमिति ग्रामारामादीनामुपलक्षणार्थम् । अत एव बृहस्पतिः—

दत्वा भूम्यादिकं राजा ताम्रपट्टे तथा पटे ।
शासनं कारयेद्धर्म्यं स्थानवंशादिसंयुतम् ॥

कारयेत् सन्धिविग्रहाद्यधिकारिणेति शेषः । तस्यैवात्र लेखने कर्तृत्वनियमात् । तथाच व्यासः—

राज्ञा तु स्वयमादिष्टः सन्धिविग्रहलेखकः ।

ताम्रपट्टे पटे वाऽपि विलिखेद्राजशासनम् ॥
क्रियाकारकसम्बन्धं समासार्थक्रियान्वितम् ।

इति । क्रियाकारकयोः सम्बन्धो यस्मिन् शासने तत्तथोक्तम् । समासार्थक्रियान्वितं संक्षिप्तार्थोपन्यासक्रियया समन्वितमित्यर्थः । ताम्रपट्टादौ लेखनीयमर्थमाह याज्ञवल्क्यः—

अभिलेख्यात्मनो वंश्यानात्मानं च महीपतिः ।
प्रतिग्रहपरीमाणदानच्छेदोपवर्णनम् ॥

इति । उद्धृतमहीमण्डलस्य श्रीपतेर्वराहवपुषः वरदानप्रतिपादकमाशीर्वादमादावाचारप्राप्तमभिलेख्यानन्तरमात्मनो वंश्यान् प्रपितामहपितामहपित्राख्यान् त्रीनुक्तक्रमेण शौर्यादिगुणवर्णनद्वाराऽऽत्मानं चतुर्थमभिलेख्य प्रतिग्रहपरिमाणादिकं लेखयेदित्यर्थः । प्रतिगृह्यत इति प्रतिग्रहो भूम्यादिः निबन्धश्च । तस्य परिमाणमियत्ता । दानच्छेदो दीयमानभूम्यादेर्मर्यादा । व्यासोपि—

समामासतदर्धाहर्नृपनामोपलक्षितम् ।
प्रतिग्रहीतृजात्यादिसगोत्रब्रह्मचारिकम् ॥

इति । संप्रदानस्यासाधारणत्वावबोधकं जातिकुलशाखादिकमपि लेखनीयमित्युत्तरार्धस्यार्थः । तथाऽन्यदपि लेखनीयं स एवाह—

स्थानं वंशानुपूर्व्यं च देशं ग्राममुपागतम् ।
ब्राह्मणस्य तथा चान्यान् मान्यानधिकृतान् लिखेत् ॥

कुटुम्बिनोऽथ कायस्थदूतवैद्यमहत्तरान् ।
म्लेच्छचण्डालपर्यन्तान् सर्वान् संबोधयन्निति ॥

मातापित्रोरात्मनश्च पुण्यायामुकसूनवे ।
दत्तं मयाऽमुकायाथ दानं सब्रह्मचारिणे ॥

इति । बृहस्पतिरपि—

अनाच्छेद्यमनाहार्यं सर्वभाव्यविवर्जितम् ।
चन्द्रार्कसमकालीनं पुत्रपौत्रान्वयानुगम् ॥

दातुः पालयितुस्स्वर्गं हर्तुर्नरकमेव च ।
षष्टिं वर्षसहस्राणि दानच्छेदफलं लिखेत् ॥

इति । आगामिनृपादिबोधनार्थमिति शेषः । अत एव व्यासः—

षष्टिं वर्षसहस्राणि दानच्छेदफलं तथा ।
आगामिनृपसामन्तबोधनार्थं नृपो लिखेत् ॥

तथा श्लोकान्तरमपि लेखनीयं तेनैव पठितं—

सामान्योऽयं धर्मसेतुर्नृपाणां
काले काले पालनीयो भवद्भिः ।
सर्वानेतान् भाविनः पार्थिवेन्द्रान्
भूयो भूयो याचते रामभद्रः ॥

इति । ततो राजा स्वयं स्वहस्तं लिखेत् । तथाच स एव—

संनिवेशं प्रमाणं च स्वहस्तं च लिखेत्स्वयम् ।

इति । मतं मेऽमुकपुत्रस्य अमुकस्य महीपतेर्यदत्रोपरि लिखितमिति स्वयं लिखेदित्यर्थः । लेखकश्च स्वनाम लिखेत् तथाच स एव—

सन्धिविग्रहकारी च भवेद्यश्चापि लेखकः।
स्वयं राज्ञा समादिष्टः स लिखेद्राजशासनम् ॥
स्वनाम तु लिखेत्पश्चात् मुद्रितं राजमुद्रया।
ग्रामक्षेत्रगृहादीनामीदृक् स्याद्राजशासनम् ॥

इति। एतच्च प्रतिग्रहीतुरर्पणीयं, तस्योपयोगित्वात्। अत एव विष्णुः—

'पटे वा ताम्रपट्टे वा लिखितं समुद्राङ्कं चागामिनृपतिपरिज्ञानार्थं दद्यात्'

इति। सङ्ग्रहकारोपि—

राजस्वहस्तचिह्नेन राजादेशेन संयुतम्।
युक्तं राजाभिधानेन मुद्रितं राजमुद्रया ॥
स्वलिप्यनपशब्दोक्तिसंपूर्णावयवाक्षरम्।
शासनं राजदत्तं स्यात् सन्धिविग्रहलेखकैः ॥

इति। सन्धिविग्रहलेखकैः लिखितमुक्तविधमन्यस्मै राज्ञा दत्तं शासनाख्यं स्यादित्यर्थः। एतच्च शासनं न दानसिद्ध्यर्थं, तस्य प्रतिग्रहेणैव सिद्धेः, किंतु दत्तस्य स्थैर्यकरणार्थं, स्थिरत्वे अक्षयफलश्रुतेः। तथाहि—

रुणद्धि रोदसी चास्य यावत् कीर्तिस्तरस्विनी।
तावत् किलायमध्यास्ते सुकृती वैबुधं पदम् ॥

अनेनैवाभिप्रायेण याज्ञवल्क्येनाप्युक्तम्—

स्वहस्तकालसंपन्नं शासनं कारयेत् स्थिरम् ।

इति । कालसंपन्नं वत्सरादिविशेषितदानादिनोपेतम् ।

तथाच व्यासः—

ज्ञातं मयेति लिखितं दात्राऽध्यक्षाक्षरैर्युतम् ।
अब्दमासतदर्धाहोराजमुद्राङ्कितं तथा ॥
अनेन विधिना लेख्यं राजशासनकं लिखेत् ।

इति । तथाच स एव जयपत्रं निरूपयितुमाह—

व्यवहारान् स्वयं दृष्ट्वा श्रुत्वा वा प्राड्विवाकतः ।
जयपत्रं ततो दद्यात् परिज्ञानाय पार्थिवः ॥

कस्मै दद्यादित्यपेक्षिते स एवाह—

जङ्गमं स्थावरं येन प्रमाणेनात्मसात्कृतम् ।
भागाभिशापसंदिग्धो यस्सम्यग्विजयी भवेत् ॥
तस्मै राज्ञा प्रदातव्यं जयपत्रं सुनिश्चितम् ॥

बृहस्पतिरपि—

पुर्वोत्तरक्रियायुक्तं निर्णयान्तं यदा नृपः ।
प्रदद्याज्जयिने लेख्यं जयपत्रं तदुच्यते ॥

पूर्वोत्तराक्रियायुक्तामिति वृत्तान्तोपलक्षणार्थम् । यत आह स एव–

यद्वृत्तं व्यवहारे तु पूर्वपक्षोत्तरादिकम् ।
क्रियावधारणोपेतं जयपत्रेऽखिलं लिखेत् ॥

व्यासोऽपि—

पूर्वोत्तराक्रियापादं प्रमाणं तत्परीक्षणम् ।

निगदं स्मृतिवाक्यं च यथासभ्यं विनिश्चितम् ॥
एतत्सर्वं समासेन जयपत्रे विलेखयेत् ॥

इति । क्रियापादं क्रियाभिमर्शनपादं प्रत्याकलितपादमिति यावत् । निगदं साक्षिवचनम् । यथासभ्यं सभ्यानतिक्रमेण । समासेन संक्षेपेण । कात्यायनोपि—

अर्थिप्रत्यर्थिवाक्यानि प्रतिज्ञा साक्षिवाक्तथा ।
निर्णयश्च यथा तस्य यथा चावधृतं स्वयम् ॥
एतद्यथाक्षरं लेख्ये यथापूर्वं निवेशयेत् ॥

इति । यथापूर्वमित्येतत्तेनैव प्रपञ्चितम्—

अभियोक्रभियुक्तानां वचनं प्राङ्निवेशयेत् ।
सभ्यानां प्राड्विवाकस्य कुलानां वा ततःपरम् ॥
निश्चयं स्मृतिशास्त्रस्य मतं तत्रैव लेखयेत् ॥

इति । मतं नृपादीनामिति शेषः । मतलेखनं तु स्वहस्तेन, परहस्ततो मतलेखनस्य 'यथा चावधृतं स्वयं' इत्यनेनैव पूर्वमेव विहितत्वात् । अत एवोक्तं तेनैव—

सिद्धेनार्थेन संयोज्यो वादी सत्कारपूर्वकम् ।
लेख्यं स्वहस्तसंयुक्तं तस्मै दद्यात्तु पार्थिवः ॥
सभासदश्च ये तत्र स्मृतिशास्त्रविदः स्थिताः ।
यथा लेख्यविधौ तद्वत् स्वहस्तं तत्र दापयेत् ॥

इति । राजा तान् सभ्यान् जानपदलेख्यवज्जयपत्रे स्वहस्तं दापयेदित्यर्थः । वृद्धवसिष्ठोऽपि—

प्राड्विवाकादिहस्ताङ्कं मुद्रितं राजमुद्रया ।
सिद्धेऽर्थे वादिनो दद्याज्जयिने जयपत्रकम् ॥

एवमुक्तं जयपत्रं पश्चात्काराख्यमित्याह कात्यायनः—

अनेन विधिना लेख्यं पश्चात्कारं विदुर्बुधाः ।

इति । अयं च पश्चात्कारो निर्णयविशेष एव न सर्वत्रेत्याह स एव—

निरस्ता तु क्रिया यत्र प्रमाणेनैव वादिना ।
पश्चात्कारो भवेत्तत्र न सर्वासु विधीयते ॥

क्रिया साध्यम् । प्रमाणेनैवेति वदंश्चतुष्पाद्व्यवहार एव पश्चात्कारो न द्विपाद्व्यवहार इति कथयति । स्पष्टीकृतं चैतत् बृहस्पतिना–

साधयेत् साध्यमर्थं तु चतुष्पादन्वितं जये ।
राजमुद्रान्वितं चैव जयपत्रकमिष्यते ॥

इति । द्विपाद्व्यवहारे तु भाषोत्तरान्वितं जयपत्रमस्त्येव, पश्चात्कारस्यैव तत्रासदनुवादकत्वेन प्रतिषेधात् । अन्यदपि जयपत्रं तेनैवोक्तं—

अन्यवाद्यादिहीनेभ्य इतरेषां प्रदीयते ।
वृत्तानुवादसंसिद्धं तच्च स्याज्जयपत्रकम् ॥

इतरेषां हीनवादिनामित्यर्थः । आज्ञाप्रज्ञापनापत्रे द्वे वसिष्ठेन दर्शिते—

सामन्तेष्वथ भृत्येषु राष्ट्रपालादिकेषु वा ।
कार्यमादिश्यते येन तदाज्ञापत्रमुच्यते ॥

ऋत्विक्पुरोहिताचार्यमान्येष्वभ्यर्हितेषु तु ।
कार्यं निवेद्यते येन पत्रं प्रज्ञापनाय तत् ॥

इति । बृहस्पतिरन्यदपि राजकीयं प्रसादलेख्याख्यं पत्रमाह—

देशादिकं यस्य राजा लिखितेन प्रयच्छति ।
सेवाशौर्यादिना तुष्टः प्रसादलिखितं हि तत् ॥

इति । अतो राजकीयं पञ्चविधं चतुर्विधमित्यनास्थयोक्तमिति मन्तव्यम् । जानपदं पुनर्व्यासेन निरूपितम्—

लिखेज्जानपदं लेख्यं प्रसिद्धस्थानलेखकः ।
राजवंशक्रमयुतं वर्षमासार्धवासरैः ॥

युतमित्यनुषज्यते । वासरः दिनम् । अन्यदपि लेखयितव्यमित्याह स एव—

पितृपूर्व्ये नामजाती धनिकर्णिकयोर्लिखेत् ।
द्रव्यभेदप्रमाणं च वृद्धिं चोभयसम्मताम् ॥

उभयसम्मतिः द्रव्यादेरपि विशेषणम् । अत एव याज्ञवल्क्यः—

यः कश्चिदर्थो निष्णातः स्वरुच्या तु परस्परम् ।
लेख्यं तु साक्षिमत्कार्यं तस्मिन् धनिकपूर्वकम् ॥

साक्षिमत् निष्णातार्थज्ञातृभूतमध्यस्थजननामान्वितम् । तथा कालधनिकऋणिकसाक्ष्यादिलेखनीयस्य यावता विशेषणेन विशेषनिष्ठत्वसिद्धिः तावद्विशेषणान्वितं कार्यमित्याह स एव—

समामासतदर्धाहर्नामजातिस्वगोत्रकैः ।
सब्रह्मचारिकात्मीयपितृनामादिचिह्नितम् ॥

सब्रह्मचारिकं बह्वृचः कठः इत्यादिशाखाप्रयुक्तं गुणनाम, आत्मीयपितृनाम, धनिकऋणिकसाक्षिणां पितृनाम। आदिशब्देन देशाचारावाप्तवारादि गृह्यते। अत एव व्यासः—

देशस्थित्या क्रियाधानप्रतिग्राहविचिह्नितम्।

देशस्थित्या क्रिया देशाचारानुसारेण करणम्। आधानं आधिः। नारदोऽपि—

लेख्यं तु साक्षिमत्कार्यमविलुप्तक्रमाक्षरम्।
देशाचारस्थितियुतं समग्रं सर्ववस्तुषु॥

वसिष्ठोपि—

कालं निवेश्य राजानं स्थानं निवसितं तथा।
दायकं ग्राहकं चैव पितृनाम्ना च संयुतम्॥
जातिं स्वगोत्रं शाखां च द्रव्यमाधिं ससंख्यकम्।
वृद्धिं ग्राहकहस्तं च विदितार्थौ च साक्षिणौ॥

इति। ग्राहकहस्तनिवेशनप्रकारमाह स एव याज्ञवल्क्यः—

समाप्तेऽर्थे ऋणी नाम स्वहस्तेन निवेशयेत्।
मतं मेऽमुकपुत्रस्य यदत्रोपरि लेखितम्॥

उपरीति वदन् पूर्वलिखिताक्षरसंस्थानादधस्तात्स्वहस्ताक्षरसंस्थानमिति दर्शयति। ऋणीति साक्षिणामपि प्रदर्शनार्थम्। तथाच स एव—

साक्षिणं च स्वहस्तेन पितृनामकपूर्वकम्।
अत्राहममुकस्साक्षी लिखेयुरिति ते समाः॥

यत्र लेख्ये विलिखितास्साक्षिणस्तेऽप्यमुकपुत्रोऽमुकोऽत्रार्थे साक्षीति प्रत्येकं लिखेयुः। ते च द्वित्वादिसमसंख्यया विशिष्टा भवेयुः। न त्रित्वादिविषमसंख्ययेत्यर्थः। केनचिदकारप्रश्लेषकल्पनया साक्षिसंख्यानियमो वैपरीत्येन वर्णितः। स यस्मिन् देशे तथैवाचारः तत्रैव ग्राह्यः नान्यत्र स्वरसार्थत्वात्। साक्षिण इति बहुवचनं गुरुतरकार्यलेख्यविषयम्।

उत्तमर्णाधमर्णौ च साक्षिणौ लेखकस्तथा।
समवायेन चैकेषां लेख्यं कुर्वीत नान्यथा॥

इति हारीतेन लेख्यमात्रे साक्षिणावित्युक्तत्वात्। एवंचान्यकृतलेख्यस्योत्तमर्णाधमर्णसाक्षिद्वयलेखकरूपपञ्चपुरुषारूढत्वात् पञ्चारूढं पत्रमिति लोके व्यवहारः। साक्षिसङ्ख्याधिकत्वे त्वयं व्यवहारो गौण इति मन्तव्यम्। लेख्यमात्रं प्रकृत्य व्यासेनाप्युक्तम्—

ऋणिहस्तं नामयुतं साक्षिभ्यां पितृपूर्वकम्।

इति। अतो द्विप्रभृतिभिस्समैर्भवितव्यमिति नियमो देशाचाराविरोधेनानुसंधेयः। यदा तु लिप्यनभिज्ञः साक्षी ऋणी वा तदा नारद आह—

अलिपिज्ञो ऋणी यस्स्याल्लेखयेत्स्वमतं तु सः।
साक्षी वा साक्षिणाऽन्येन सर्वसाक्षिसमीपतः॥

विजातीयलिपिज्ञोपि स्वयमेव लिखेत् लिपिज्ञत्वात्,

सर्वे जानपदान् वर्णान् लेख्ये तु विनिवेशयेत्॥

इति कात्यायनस्मरणाच्च। साक्षिस्वहस्तलेखनानन्तरं याज्ञवल्क्यः—

उभयाभ्यर्थिते चैतन्मया ह्यमुकसूनुना।
लिखितं ह्यमुकेनेति लेखकोऽन्ते ततो लिखेत्॥

व्यासोऽपि—

मयोभयाभ्यर्थितेनामुकेनामुकसूनुना।
स्वहस्तयुक्तं स्वं नाम लेखकस्त्वन्ततो लिखेत्॥
एवं जानपदे लेख्ये व्यासेनाभिहितो विधिः।

इति। अन्ततो लेख्यस्येति शेषः। एवमुक्तलेख्यमष्टविधमित्याह स एव—

चिरकं च स्वहस्तं च तथोपगतसंज्ञितम्।
आधिपत्रं चतुर्थं च पञ्चमं क्रयपत्रकं॥
षष्ठं तु स्थितिपत्राख्यं सप्तमं संधिपत्रकम्।
विशुद्धिपत्रकं चैवमष्टधा लौकिकं स्मृतम्॥

इति। नात्र सङ्ख्या विवक्षिता। विभागपत्रादेरपि लौकिकत्वात्।
तत्र चिरकस्य लक्षणमाह सङ्ग्रहकारः—

चिरकं नाम लिखितं पुराणैः पौरलेखकैः।
अर्थिप्रत्यर्थिनिर्दिष्टैः यथासंभवसंस्तुतैः॥
स्वकीयैः पितृनामाद्यैरर्थिप्रत्यर्थिसाक्षिणाम्।
प्रतिनामभिराक्रान्तमर्थिसाक्षिस्वहस्तवत्॥
स्पष्टावगमसंयुक्तं यथास्मृत्युक्तलक्षणम्।

इति। संस्तुतैः प्रशस्तैरित्यर्थः। कात्यायनस्तु स्वहस्तमाह—

ग्राहकेण स्वहस्तेन लिखितं साक्षिवर्जितम् ।
स्वहस्तलेख्यं विज्ञेयं प्रमाणं तत्स्मृतं बुधैः ॥

एवमेव दायकेन लिखितं ग्राहकेणाभ्युपगतं लेख्यं उपगताख्यं विज्ञेयम् । आधिपत्रमाह नारदः—

आधिं कृत्वा तु यो द्रव्यं प्रयुङ्क्ते स्वधनं धनी ।
यत्तत्र क्रियते लेख्यमाधिपत्रं तदुच्यते ॥

अन्वाधिलेख्ये विशेषमाह प्रजापतिः—

धनी धनेन तेनैव परमाधिं नयेद्यदि ।
कृत्वा तदाधिलिखितं पूर्वं चास्य समर्पयेत् ॥

क्रयपत्रं पितामहेनोक्तम्—

क्रीते क्रयप्रकाशार्थं द्रव्ये यत्क्रियते क्वचित् ।
विक्रेत्राऽनुमतं क्रेत्रा ज्ञेयं तत्क्रयपत्रकम् ॥

स्थितिपत्रादीनि पुनः कात्यायनेनोक्तानि—

चातुर्विद्यपुरश्रेणीगणपौरादिकास्थितिः ।
तत्सिद्ध्यर्थं तु यल्लेख्यं तद्भवेत् स्थितिपत्रकम् ॥
अभिशापे समुत्तीर्णे प्रायश्चित्ते कृते जनैः ।
विशुद्धिपत्रकं ज्ञेयं तेभ्यस्साक्षिसमन्वितम् ॥

इति । बृहस्पतिरपि लेख्यविभागमाह—

भागदानक्रयाधानसंविद्दासऋणादिभिः ।
सप्तधा लौकिकं लेख्यं त्रिविधं राजशासनम् ॥

अत्रापि न सङ्ख्या विवक्षिता, अधिकानामपि लेख्यानामेतेभ्यो

दर्शितत्वात्। अत एवात्रादिग्रहणं कृतं, अन्यथा गणितैरेव सप्तविधत्वसिद्धेरादिग्रहणमपार्थं स्यात्। तेनैतत् ज्ञायते लेख्य-सङ्ख्या नावधारणार्थेति। अतो विविधसङ्ख्यावद्वचनानामविरोधः। भागलेख्यादिकं स्वयमेव व्याचष्टे—

भ्रातरस्संविभक्ता ये स्वरुच्या तु परस्परम्।
विभागपत्रं कुर्वन्ति भागलेख्यं तदुच्यते॥
भूमिं दत्वा तु यत्पत्रं कुर्याच्चन्द्रार्ककालिकम्।
अनाच्छेद्यमनाहार्यं दानलेख्यं तु तद्विदुः॥
गृहक्षेत्रादिकं क्रीत्वा तुल्यमूल्याक्षरान्वितम्।
पत्रं कारयते यत्तु क्रयलेख्यं तदुच्यते॥
जङ्गमं स्थावरं बन्धं दत्वा लेख्यं करोति यः।
गोप्यभोग्यक्रियायुक्तमाधिलेख्यं तदुच्यते॥
ग्रामो देशश्च यत्कुर्यान्मतं लेख्यं परस्परम्।
राजाविरोधि धर्मार्थं संवित्पत्रं वदन्ति तत्॥
वस्त्रान्नहीनः कान्तारे लिखितं कुरुते तु यत्।
कर्माणि ते करिष्यामि दासपत्रं तदुच्यते॥
धनं वृद्ध्या गृहीत्वा तु स्वयं कुर्याच्च कारयेत्।
उद्धारपत्रं तत्प्रोक्तं ऋणलेख्यं मनीषिभिः॥

इति। अन्यदपि लौकिकं लेख्यमाह कात्यायनः—

सीमाविवादे निर्णीते सीमापत्रं विधीयते।

इति । याज्ञवल्क्योपि—

दत्वर्णं पाटयेत्पत्रं शुद्धौ वाऽन्यत्तु कारयेत् ॥

इति । लेख्यप्रयोजनमाह मरीचिः—

स्थावरे विक्रयाधाने विभागे दान एव च ।

लिखितेनाप्नुयात्सिद्धिमविसंवादमेव च ॥

आधानमाधिः । आद्यश्च्शब्दः ऋणादिनिष्णातार्थसङ्ग्रहार्थः । अविसंवादः कालान्तरेऽपि निष्णातार्थस्यानन्यथाभावः । एवंच स्थावरादावप्यविसंवादेन सिद्धिमालोच्य राजवंशवर्षादिलेखनीयानामावापोद्वापौ कार्यौ, तेषां दृष्टार्थत्वात् । अतो न दानादिलेख्ये धनिकऋणिकादि लेखनीयम् । नापि ऋणादिलेख्ये प्रतिग्रहादिकम् । एवमन्यत्रापि लेख्ये लेखनीयमूहनीयं, दृष्टप्रयोजनत्वाल्लेख्यस्य। अत एवाकृतप्रयोजनस्य लेख्यस्य कार्याक्षमत्वे नाशे वा लेख्यान्तरमुत्पाद्यम् । अत एवाह याज्ञवल्क्यः—

देशान्तरस्थे दुर्लेख्ये नष्टोन्मृष्टे हृते तथा ।

भिन्ने दग्धे तथा छिन्ने लेख्यमन्यत्तु कारयेत् ॥

देशान्तरस्थे सर्वथाऽऽनेतुमशक्यस्थानस्थे । दुर्लेख्ये दुरवबोधाक्षरे । भिन्ने द्विधा जाते । छिन्ने शीर्णे । कात्यायनोपि—

मलैर्यत् भेदितं दग्धं छिद्रितं वीतमेव वा ।

तदन्यत्कारयेल्लेख्यं स्वेदेनोल्लिखितं तथा ॥

वीतं विगतम् । उल्लिखितं उन्मृष्टम् । यत्पुनर्नारदेनोक्तम्—

लेख्ये देशान्तरन्यस्ते शीर्णे दुर्लिखिते हृते ।

सतस्तत्कालकरणमसतो दृष्टदर्शनम् ॥

इति, तत्तदैव धनदानोद्यतऋणिकविषयम् । तत्र लेख्यान्तरकरणे प्रयोजनाभावात् । कालकरणं, आनयनार्थं तस्य पत्रस्यानयनयोग्यकालकल्पनम् । दृष्टदर्शनं पत्रलभ्यपत्रार्थज्ञातृज्ञापनं धनप्रतिपादने कार्यमित्यर्थः । एतच्च पत्रपाटनासम्भवेऽपि साक्षिणां साक्षित्वनिवृत्तये कार्यम् । प्रतिपादनप्रकाशार्थं च प्रतिदत्तपत्रं ग्राह्यम् । कालान्तरे तु धने देये लेख्यान्तरं कार्यमेव । अत एवोक्तं तेनापि—

छिन्नभिन्नहृतोन्मृष्टदग्धदुर्लिखितेषु च ।
कर्तव्यमन्यल्लेख्यं स्यादेष लेख्यविधिस्स्मृतः ॥ इति ॥

इति स्मृतिचन्द्रिकायां लेख्यनिरूपणम्.

अथ लेख्यपरीक्षा.

तत्र कात्यायनः—

राजा क्रियां समाहूय यथान्यायं विचारयेत् ।
लेख्याचारेण लिखितं साक्ष्याचारेण साक्षिणः ॥

सुव्यक्तवर्णवाक्यादिको लेख्याचारः । सोपि तेनैव दर्शितः—

वर्णवाक्यक्रियायुक्तमसंदिग्धं स्फुटाक्षरम् ।
अहीनक्रमचिह्नं च लेख्यं तत्सिद्धिमाप्नुयात् ॥

क्रिया साध्यम् । चिह्नं मुद्रा सा राजकीयलेख्य एव । तथाच नारदः—

राज्ञा स्वहस्तसंयुक्तं स्वमुद्राचिह्नितं तथा ।
राजकीयं स्मृतं लेख्यं सर्वेष्वर्थेषु साक्षिमत् ॥

तथा जानपदं प्रकृत्याह स एव—

लेख्यं तु द्विविधं प्रोक्तं स्वहस्तान्यकृतं तथा ।
असाक्षिमत्साक्षिमच्च सिद्धिर्देशस्थितेस्तयोः ॥

देशस्थितेः देशाचारानुसारेण । तयोस्सिद्धिः प्रामाण्यमित्यर्थः । स्वहस्तकृते तु विशेषमाह याज्ञवल्क्यः—

विनाऽपि साक्षिभिर्लेख्यं स्वहस्तलिखितं तु यत् ।
तत्प्रमाणं स्मृतं सर्वं बलोपाधिकृताद‍ृते ॥

विनाऽपीत्यपिशब्दात् ससाक्षिकमपि स्वहस्तलिखितमस्तीति गम्यते। अन्यकृतं तु साक्षिमदेव प्रमाणम् । तथाच पितामहः—

वादिभ्यामभ्यनुज्ञातं लेखकेन ससाक्षिकम् ।
लिखितं सर्वकार्येषु तत्प्रमाणं स्मृतं बुधैः ॥

कात्यायनोपि—

देशाचारयुतं वर्षमासपक्षादिवृद्धिमत् ।
ऋणिसाक्षिलेखकानां हस्ताङ्कं लेख्यमुच्यते ॥

वृद्धिग्रहणमाधेरुपलक्षणार्थम् । अत एव नारदः—

देशाचारविरुद्धं यत् व्यक्ताधिविधिलक्षणम् ।
तत्प्रमाणं स्मृतं लेख्यमविलुप्तक्रमाक्षरम् ॥

व्यक्तं आधिविशेषाधिकरणस्य लक्षणं यस्मिन् लेख्ये तत्तथोक्तम् । यल्लेख्यमविलुप्तक्रमाक्षरादिलक्षणान्वितं तत्प्रमाणं का-

लान्तरेऽपि वस्तुतत्त्वावबोधकमित्यर्थः । अनेवंविधमप्रमाणमित्यर्थादेव सिद्धम् । तथाऽपि स्पष्टार्थमाह कात्यायनः—

स्थानभ्रष्टास्तुपङ्क्तिस्थाः संदिग्धा लक्षणच्युताः ।
यदा तु संस्थिता वर्णाः कूटलेख्यं तदा भवेत् ॥
देशाचारविरुद्धं यत्संदिग्धं क्रमवर्जितम् ।
कृतं च स्वामिना यच्च साध्यहीनं च दुष्यति ॥

इति । हारीतोपि—

यच्च काकपदाकीर्णं तल्लेख्यं कूटतामियात् ।
बिन्दुमात्राविहीनं यत्संहितं चिरितं च यत् ॥

बृहस्पतिरपि—

यदुज्ज्वलं चिरकृतं मलिनं स्वल्पकालिकम् ।
भग्नोन्मृष्टाक्षरयुतं लेख्यं कूटत्वमाप्नुयात् ॥
मुमूर्षुशिशुभीतार्थस्त्रीमत्तव्यसनातुरैः ।
निशोपधिबलात्कारकृतं लेख्यं न सिध्यति ॥

इति । नारदोपि—

मत्ताभियुक्तस्त्रीबालबलात्कारकृतं तु यत् ।
तदप्रमाणं लिखितं भयोपाधिकृतं तथा ॥

कात्यायनोपि—

मत्तेनोपाधिभीतेन तथोन्मत्तेन पीडितैः ।
स्त्रीभिर्बालास्वतन्त्रैश्च कृतं लेख्यं न सिध्यति ॥

मुमूर्ष्वादिकृतं अयथार्थशङ्कया न प्रमाणतां प्रतिपद्यत इति

बार्हस्पत्यादिवचनानां तात्पर्यार्थः। एवं साक्ष्यादिवैगुण्येऽपि न प्रमाणम्। तथाच व्यासः—

दूषितः कर्मदुष्टो वा साक्षी यत्र निवेशितः।
कूटलेख्यं तु तत्प्राहुः लेखको वाऽपि तद्विधः॥

कात्यायनोपि—

साक्षिदोषाद्भवेद्दुष्टं पत्रं वै लेखकस्य वा।
धनिकस्यापि वा दोषात्तथा धारणकस्य वा॥

अत्र ये गूढदोषास्ते विवादिना वक्तव्याः। ये पुनः प्रकटास्ते सभ्यैरित्याह स एव—

प्रमाणस्य हि ये दोषा वक्तव्यास्ते विवादिना।
गूढास्तु प्रकटास्सभ्यैः काले शास्त्रप्रदर्शनात्॥

प्रमाणस्य प्रमाणतया कीर्तितस्य। काले प्रमाणपरीक्षाकाल इत्यर्थः। कालातिक्रमणोक्तास्तु दोषा न प्रामाण्यं विघ्नन्तीत्याह बृहस्पतिः—

लेख्यदोषास्तु ये केचित् साक्षिणां चैव ये स्मृताः।
वादकाले तु वक्तव्याः पश्चादुक्तान्न दूषयेत्॥

पश्चादुक्तात् प्रमाणपरीक्षापर्यवसानात्पश्चान्न दूषयेदित्यर्थः। गूढदोषोद्भावनप्रकारमाह कात्यायनः—

साक्षिलेखककर्तारः कूटतां यान्ति ते तथा।
तथा दोषाः प्रयोक्तव्या दुष्टैर्लेख्यं प्रदुष्यति॥

अथवा-आरूढलेखकेन न लिखितमारूढसाक्षिभिर्वा न दृष्टं दुष्ट-मित्युद्भावनीयमित्याह स एव—

न लेखकेन लिखितं न दृष्टं साक्षिभिस्तथा ।
एवं प्रत्यर्थिनोक्ते तु कूटलेख्यं प्रकीर्तितम् ॥

उक्तेनार्थेनेति शेषः । तथाच स एव—

नातथ्येन प्रमाणं तु दोषेणैव तु दूषयेत् ।
मिथ्याभियोगे दण्ड्यस्स्यात् साध्यार्थाच्चापि हीयते ॥

एवं दूषणवाद्युदितदोषसम्भवे तान् दोषानितरस्य सभापतिः निरूपयेत् । तथाच स एव—

एवं दुष्टं नृपस्थाने यस्मिन् तद्धि विचार्यते ।
विमृश्य ब्राह्मणैस्सार्धं पत्रदोषान्निरूपयेत् ॥

तत्र यदीतरेण ते दोषा न परिहृताः तदा दुष्टं लेख्यं, परिहृताश्चेददुष्टमित्याह स एव—

येन ते कूटतां यान्ति साक्षिलेखककारकाः ।
तेन दुष्टं भवेल्लेख्यं शुद्धेश्शुद्धिं विनिर्दिशेत् ॥

उपगताख्यलेख्यस्य त्वधमर्णसंमत्या शुद्धिर्नो चेन्नेत्याह स एव—

धनिकेन स्वहस्तेन लिखितं साक्षिवर्जितम् ।
भवेत्कूटं न चेत्कर्ता कृतं हीति विभावयेत् ॥

कर्ता धनिकोऽधमर्णानुमत्या कृतमिति यदि न विभावयेत् न साधयेत्तदा न जानामीत्यधमर्णेन दूषितं लेख्यं कूटं भवेदित्यर्थः ।

यदा पुनः स्वहस्तनिह्नवेन लिखितं दूषयति तदा तदारूढसाक्ष्या-
दितो दुष्टमदुष्टं वेति निश्चेतव्यम् । तथाच स एव—

दत्तं लेख्ये स्वहस्तं तु ऋणिको यदि निह्नुते ।
पत्रस्थैस्साक्षिभिर्वाच्यो लेखकस्य मतेन वा ॥

अकृतत्वेन दूषितेऽप्ययमेव निश्चय इत्याह स एव—

कृताकृतविवादेषु साक्षिभिः पत्रानिर्णयः ।

इति । साक्षिग्रहणमुपलक्षणम् ।

दूषिते पत्रके वादी तदारूढांस्तु निर्दिशेत् ।

इति तेनैवोक्तत्वात् । यत्पुनर्नारदेनोक्तम्—

यस्मिंस्तु संशयो लेख्ये भूताभूतकृतः क्वचित् ।
तत्स्वहस्तक्रियाचिह्नयुक्तिप्राप्तिभिरुद्धरेत् ॥

इति, यदपि याज्ञवल्क्येन—

संदिग्धलेख्यशुद्धिस्स्यात् स्वहस्तलिखितादिभिः ।
युक्तिप्राप्तिक्रियाचिह्नसंबन्धागमहेतुभिः ॥

इति तदसाक्षिकस्वहस्तकृतलेख्यविषयम् । तत्र साक्ष्यादिस्पष्ट
निर्णायकाभावात् । अत एव हारीतः—

ऋणिस्वहस्तसंदेहे जीवतो वा मृतस्य वा ।
तत्स्वहस्तकृतैरन्यैः पत्रैस्तल्लेख्यनिर्णयः ॥

स्वहस्तकृतैरिति पूर्वोक्तक्रियाद्युपलक्षणार्थम् । यत्र पुनरस्ति स-
साक्षिकस्वहस्तकृतलेख्यादौ साक्ष्यादि स्पष्टनिर्णायकं न तत्र
लेख्यान्तरसादृश्यात् स्पष्टनिर्णायकेन निर्णयः।तदाह कात्यायनः—

प्रत्यक्षमनुमानेन न कदाचित्प्रबाध्यते ।
तस्माल्लेख्यस्य दुष्टस्य वचोभिस्साक्षिणां भवेत् ॥
निर्णयस्स्वधनार्थं हि पत्रं दूषयति स्वयम् ।

इति । साक्षिणां वचोभिर्न पुनरधमर्णवचनतः, तस्याशयदोषसम्भवादित्यर्थः । अनेनैवाभिप्रायेण नारदेनाप्युक्तम्—

लिखितं लिखितेनैव साक्षिमत्साक्षिभिर्हरेत् ।

इति । अविद्यमानसाक्ष्यादिकं लिखितं तत्सजातीयलिखितादिना शोधयेदित्यर्थः । यत्पुनस्तेनोक्तम्—

साक्षिभ्यो लिखितं ज्ञेयं लिखितान्न तु साक्षिणः ।

इति, तल्लेख्यानारूढसाक्षिविषयम् । अतस्साक्ष्यादिमतो लेख्यारूढसाक्ष्यादिभिर्निर्णयः । असाक्षिमतस्स्वहस्तकृतलेख्यान्तरसादृश्यादिभिरित्यनुसन्धेयम् । कथं तर्हि मृतसाक्ष्यादिमतः निर्णय इत्यपेक्षिते कात्यायनः—

अथ पञ्चत्वमापन्नो लेखकस्सह साक्षिभिः ।
तत्स्वहस्तादिभिस्तेषां विशुध्येत्तु न संशयः ॥

तेषां मृतसाक्ष्यादीनाम् । तत्स्वहस्तादिभिः पत्रान्तरप्रसिद्धहस्तगोत्रवर्णसादृश्यप्रभृतिभिरित्यर्थः । विष्णुरपि—

यत्रर्णी धनिको वाऽपि साक्षी वा लेखकोपि वा ।
म्रियते तत्र तल्लेख्यं तत्स्वहस्तैः प्रसाधयेत् ॥

इति । राजकीयं प्रत्याह कात्यायनः—

पश्चात्कारनिबद्धं यत्तद्यत्नेन विचारयेत् ।

यदि स्याद्युक्तियुक्तं तु प्रमाणं लिखितं तदा ॥
अन्यथा दूरतः कार्यं पुनरेव विनिर्णयेत् ।
अतथ्यं तथ्यभावेन स्थापितं ज्ञानविभ्रमात् ॥
निवर्त्यं तत्प्रमाणं स्यात् यत्नेनापि कृतं नृपैः ।

पश्चात्कारनिबद्धं पश्चात्काराख्यजयपत्रनिवेशितमित्यर्थः । तथा-

समुद्रे तु यथा लेख्ये मृतास्सर्वेऽपि तत्स्थिताः ।
लिखितं तत्प्रमाणं तु मृतेष्वपि हि तेषु वै ॥

प्रमाणं मुद्रादिभिरिति शेषः । अत एव शासनं मुद्रामुदाहृत्याह प्रजापतिः—

कार्यो यत्नेन महता निर्णयो राजशासने ।
राज्ञा स्वहस्ततन्मुद्रालेखकाक्षरदर्शनात् ॥

कात्यायनोपि—

मुद्राशुद्धं क्रियाशुद्धं भुक्तिशुद्धं सचिह्नकम् ।
राज्ञस्स्वहस्तसंशुद्धं शुद्धिमायाति शासनम् ॥

क्रियाशुद्धं अपशब्दानन्वयादिरहितम् । जानपदलेख्यमपि क्वचिद्भुक्त्या शुद्धिमायातीत्याह स एव—

शक्तस्य सन्निधावर्थो येन लेख्येन भुज्यते ।
वर्षाणि विंशतिं यावत्तत्पत्रं दोषवर्जितम् ॥

स्मृत्यन्तरेऽप्युक्तम्—

अथ विंशतिवर्षाणि आधिर्भुक्तिस्सुनिश्चितम् ।
येन लेख्येन तत्सिद्धं लेख्यं दोषविवर्जितम् ॥
सीमाविवादे निर्णीते सीमापत्रं विधीयते ।

तस्य दोषाः प्रयोक्तव्या यावद्वर्षाणि विंशतिम् ॥

आधानसहितं पत्रमृणलेख्यनिवेशितम् ।

मृतसाक्षि प्रमाणं तु स्वल्पभोगेऽपि तद्विदुः ॥

आधानमाधिः। मृतसाक्षि प्रमीतसाक्ष्यादिकम्। तथाच नारदः—

मृतास्स्युस्साक्षिणो यत्र धनिकर्णिकलेखकाः ।

तदप्यनर्थं लिखितं न चेदाधिस्स्थिराश्रयः ॥

आश्रयो भुक्तिः। अथवा लिखितबलायातकिंचिद्वृद्ध्यादिधनलब्ध्याऽधमर्णस्य पुरस्तात्तल्लेख्यख्यापनेन वा शुद्धिरित्याह स एव—

यदि लब्धं भवेत्किंचित् प्रज्ञप्तिर्वा कृता भवेत् ।

प्रमाणमेव लिखितं मृता यद्यपि साक्षिणः ॥

प्रज्ञप्तिमेव प्रपञ्चयति—

दर्शितं प्रतिकालं यच्छ्रावितं स्मारितं तथा ।

लेख्यं सिध्यति सर्वत्र मृतेष्वपि हि साक्षिषु ॥

प्रजापतिरपि—क्वचिद्भुक्त्या शुद्धिमाह—

हेत्वन्तरकृते पत्रे आरूढो यत्र निह्नुते ।

लेख्यं यस्य भवेद्धस्ते तस्य भोगं विनिर्दिशेत् ॥

निर्णायकत्वेनेति शेषः । भोगग्रहणमुपलक्षणार्थम् । अत एव नारदः—

लेख्यं यच्चान्यनामाङ्कं हेत्वन्तरकृतं भवेत् ।

विप्रत्यये परीक्ष्यं तत्संबन्धागमहेतुभिः ॥

हेत्वन्तरकृतं दायादेर्वञ्चनार्थं कृतम् । विप्रत्ययो विप्रतिपत्तिः । संबन्धः प्राचीनो धनदानप्रतिदानादिलक्षणः । आगमः एतावतो धनस्य सम्भवोऽस्यास्ति नेत्येवमात्मकः । हेतुरनुमानम् । एवं धनिनामाङ्कं लेख्यमपि वञ्चनादिहेतुकृतं परीक्ष्यम् । तथाच बृहस्पतिः—

स्त्रीबालार्तान् लिप्यविज्ञान्वञ्चयन्ति स्वबान्धवाः ।
लेख्यं कृत्वा स्वनामाङ्कं ज्ञेयं युक्त्यागमैस्तु तत् ॥
ज्ञात्वा कार्यं देशकालकुशलाः कूटकारकाः ।
कुर्वन्ति सदृशं लेख्यं तद्यत्नेन विचारयेत् ॥

लिप्यविज्ञो लिप्यनभिज्ञः । कात्यायनोपि—

दर्पणस्थं यथा बिम्बमसत्सदिव दृश्यते ।
तथा लेख्यस्य बिम्बानि कुर्वन्ति कुशला जनाः ॥

व्यासोपि—

लेख्यमालेख्यवत्केचित् लिखन्ति कुशला नराः ।
तस्मान्न लेख्यसामर्थ्यात् सिद्धिरैकान्तिकी मता ॥

तेन सम्यक्परीक्षणीयमित्यभिप्रायः । अत एव नारदः—

पुरुषास्सन्ति ते लोभात्कार्यं ये ब्रूयुरन्यथा ।
सन्ति चान्ये दुरात्मानः कूटलेख्यकृतो जनाः ॥
परीक्ष्यमेतदुभयं स्वयं राज्ञा विशेषतः ।
लेख्याचारेण लिखितं साक्ष्याचारेण साक्षिणः ॥

इति । लेख्याचारेण प्रागुदितशुद्धिहेतुजातेनेत्यर्थः । यत्पुनस्त-

द्धेतुजानेन न शुद्धिमायाति लेख्यं तदप्रमाणमेव, तेन तत्परित्यज्य दिव्येन निर्णयं कुर्यात् ।

अलेख्यसाक्षिके दैवीं व्यवहारे विनिर्दिशेत् ।

इति कात्यायनस्मरणात् । तथा हारीतेनाप्यनेनैवाभिप्रायेणोक्तं—

न मयैतत्कृतं लेख्यं कूटमन्येन कारितम् ।

अधरीकृत्य तत्पत्रमर्थे दिव्येन निर्णयः ॥

इति । यत्र लेख्ये सर्वथा कूटशङ्काऽनपगमः तत्र साध्यार्थनिर्णयो दिव्येनेति तात्पर्यार्थः । उदाहरणतयोक्तस्वहस्तलेख्यस्यानादरणीयत्वात् । तेन स्वहस्तगोत्रचिह्नादिसम्भवेऽपि प्रतिवादिनो दृढविप्रतिपत्त्या कूटशङ्काऽनपगमो यत्र भवेत् तत्रापि दिव्येन निर्णयः । तथाच प्रजापतिः —

यन्नामगोत्रैस्तत्तुल्यरूपं लेख्यं क्वचिद्भवेत् ।

अगृहीते धने तत्र कार्यो दिव्येन निर्णयः ॥

तत्तुल्यरूपं अविप्रतिपन्नलेख्यान्तरतुल्यरूपम् । अगृहीते धने प्रतिवादिनि दृढ इत्यर्थः । यत्पुनर्नारदेनोक्तम्—

दुष्टे पत्रे स्फुटं दोषं नोक्तवान् ऋणिको यदि ।

ततो विंशतिवर्षाणि क्रान्तं पत्रं स्थिरं भवेत् ॥

इति, तस्यायमर्थः—दौष्ट्यचिरकालभोगाभ्यां संदिग्धप्रामाण्यकं लेख्यं दिव्येन साधितार्थं स्थिरं भवेदिति चिरकालत्वमात्रेण स्थैर्यासंभवात् । यः पुनः लेख्यदोषान् न परिहरति तस्य दण्डमाह कात्यायनः—

कूटोक्तौ साक्षिणां वाक्यं लेखकस्य च पत्रकम् ।
नयेच्छुद्धिं न यः कूटं स दाप्यो दण्डमुत्तमम् ॥

साक्षिणां वाक्यं लेखकस्य पत्रं च प्रति कूटोक्तावुक्तविधया यो वादी कूटं शुद्धिं न नयेत्, स उत्तमसाहसदण्ड्य इत्यर्थः । स्थावरादौ तु दण्डान्तरमाह स एव—

स्थावरे विक्रयाधाने लेख्यं कूटं करोति यः ।
स सम्यग्भावितः कार्यो जिह्वापाण्यङ्घ्रिवर्जितः ॥

तेनान्यलेख्यधारकेणैतल्लेख्यागमनकारणमुद्भावनीयमित्याह व्यासः—

यच्चान्यस्य कृतं लेख्यमन्यहस्ते प्रदृश्यते ।
अवश्यं तेन वक्तव्यं पत्रं पत्रागमं ततः ॥

ततो लेख्यस्वामिनस्सकाशादित्यर्थः । तथा लेख्यानां मिथो विरोधे बाध्यबाधकनिर्णयार्थमाह स एव—

स्वहस्तकाज्जानपदं तस्मात्तु नृपशासनम् ।
प्रमाणतरमिष्टं हि व्यवहारार्थमागतम् ॥

जानपदपदेनात्र गोबलीवर्दन्यायात् स्वहस्तकृतादन्यदुच्यते । नृपशब्देनापि लक्षणया शासनेतरद्राजकीयं, तेनान्यकृतं स्वहस्तकृतात् बलवत्, तस्मादपि राजकीयं, ततोऽपि शासनमित्यर्थः । बलवत्त्वं चोत्तरोत्तरस्य कूटत्वासम्भवतारतम्यतोऽवबोध्यम् । अत एवोपगताख्यलेख्यादसाक्षिकं स्वहस्तकृतं, तस्माच्च ससाक्षिकं स्वहस्तकृतं बलवदित्यवगन्तव्यम् । अत एव

लेख्यमात्रं साक्षिवचनतो बलवदित्याह संवर्तः—

लेख्यस्योपरि यत्साक्ष्यं कूटं तदभिधीयते ।
अधर्मस्य हि तद्वारमतो राजा विवर्जयेत् ॥

लेख्यविरुद्धं यत् साक्ष्यं ततो दुर्बलमित्यर्थः । बृहस्पतिरपि—

वाचकैर्यत्र सामर्थ्यमक्षराणां विहन्यते ।
क्रियाणां सर्वनाशस्स्यादनवस्था च जायते ॥

क्रियाणां लेख्यक्रियाणाम् । कात्यायनोपि—

न दिव्यैस्साक्षिभिर्वाऽपि हीयते लिखितं क्वचित् ।
लेख्यधर्मस्सदा श्रेष्ठो ह्यतो नान्येन हीयते ॥

लेख्येन तु हीयत इत्याह स एव—

तद्युक्तप्रतिलेख्येन तद्विशिष्टेन वा सदा ।
लेख्यक्रिया निरस्येत निरस्यान्येन न क्वचित् ॥

अन्येन साक्ष्यादिनेत्यर्थः । अत एव बृहस्पतिः—

न जातु हीयते लेख्यं साक्षिभिश्शपथेन वा ।
अदर्शनाश्रविताभ्यां हानिं प्राप्नोत्युपेक्षया ॥

बहुकालव्यापिन्येति शेषः । तथाच व्यासः—

अदृष्टाश्रावितं लेख्यं प्रमीतधनिकर्णिकम् ।
अबद्धलग्नकं चैव बहुकालं न सिध्यति ॥

इति । अबद्धलग्नकं आधिप्रतिभूरहितम् । बहुकालं बहुकालीनं, न सिध्यति स्वत इत्यभिप्रायः । कात्यायनोपि—

लेख्यं त्रिंशत्समातीतमदृष्टाश्रावितं च यत् ।

न तत्सिद्धिमवाप्नोति तिष्ठत्स्वपि हि साक्षिषु ॥

अदर्शनेऽपि विशेषमाह स एव—

प्रयुक्ते शान्तलाभे तु लिखितं यो न दर्शयेत्।
न याचते च ऋणिकं तत्संदिग्धत्वमाप्नुयात् ॥

ऋणिकमासन्नमाढ्यं चेति शेषः । तथाच बृहस्पतिः—

आढ्यस्य निकटस्थस्य यच्छक्तेन न याचितम् ।
शुद्धं न शङ्कया तत्र लेख्यं दुर्बलतामियात् ॥

एवमविशेषेणादर्शनादितो लेख्यहानिप्राप्तावपवादमाह स एव—

उन्मत्तजडबालानां राजभीतप्रवासिनाम् ।
अप्रगल्भभयार्तानां न लेख्यं हानिमाप्नुयात् ॥

संवर्तस्तु लेख्याभासा अपि बहुकालीना विचारविषयतां भजन्त इत्याह—

बलोपाधिकृतं चैव मत्तोन्मत्तकृतं तथा ।
एते चान्ये च बहवः चिरस्था वादहेतवः ॥

तेनैवमादिषूक्तशुद्धिविधिरनुसंधेयो निर्णेतृभिरित्यभिप्रायः । अत एव कात्यायनः—

द्रव्यं गृहीत्वा यल्लेख्यं परस्मै सम्प्रदीयते ।
छन्नमन्येन चारूढं संयतं चान्यवेश्मनि ॥
दत्ते वृत्तेऽथवा द्रव्ये क्वचिल्लिखितपूर्वके ।
एष एव विधिर्ज्ञेयो लेख्यशुद्धिविनिर्णये ॥ इति ॥

इति स्मृतिचन्द्रिकायां लेख्यपरीक्षा

अथ भुक्तिनिरूपणम्.

तत्र नारदः—

श्रुत्वोत्तरं क्रियापादे लेख्यं साधनमुद्दिशेत्।
सामन्तलक्षणोपेता भुक्तिर्वा चिरकालिकी ॥

साधनशब्देनात्र गोबलीवर्दन्यायात् साक्षिण उच्यन्ते, तेनायमर्थः—लिखितं साक्षिणो वा गृहक्षेत्रादिविवादेषु उद्दिशेत् भुक्तिर्वा कीर्तनीयेति। अत एवानेन साक्षिषु विशेषो वर्णितः।

गृहक्षेत्रादिवादेषु सामन्तेभ्यो विनिर्णयः।
नगरग्रामगणिनो ये च वृद्धतमा नराः ॥
यद्वदन्ति नियोगस्थाः तद्ग्राह्यं व्यावहारिकम् ॥

एतदुक्तं भवति—क्षेत्रादिस्थावरविवादे मानुषप्रमाणानामन्यतमं प्रमाणमुद्दिशेत् न जातु दिव्यमिति। तत्रापि लिखितभुक्ती श्रेष्ठे इत्याह कात्यायनः—

लिखितं साक्षिणो भुक्तिः प्रमाणत्रयमिष्यते।
प्रमाणेषु स्मृता भुक्तेस्सल्लेख्यसमता नृणाम् ॥

नृणां प्रमाणेष्विसन्वयः। मानुषप्रमाणेष्वित्यर्थः। सल्लेख्यमनवद्यलेख्यम्। क्वचिद्भुक्तेरेव श्रेष्ठ्यमितराभ्यामाह स एव—

रथ्यानिर्गमनद्वारजलवाहादिसंशये।
भुक्तिरेव तु गुर्वी स्यात् प्रमाणेष्विति निश्चयः ॥

रथ्यादिव्यतिरिक्तविषयेऽपि भुक्त्यनुग्रहमन्तरेण नेतरयोर्गुरुत्वमित्याह नारदः—

विद्यमानेऽपि लिखिते जीवत्स्वपि हि साक्षिषु ।
विशेषतस्स्थावराणां यन्न भुक्तं तदस्थिरम् ॥

याज्ञवल्क्योऽपि—

आगमेऽपि बलं नैव भुक्तिस्स्तोकाऽपि यत्र नो ।

इति । आगमे लिखितसाक्षिपरिज्ञेयक्रयादावित्यर्थः । अनेनागमलेख्यादेर्दोषशङ्काऽपनोदकतया स्तोकभुक्तिरनुग्राहकमात्रमेव न प्रमाणमित्यर्थादुक्तम् । उक्तं च कात्यायनेन—

शक्तस्य सन्निधावर्थो यस्य लेख्येन भुज्यते ।
दश वर्षाण्यतिक्रान्तं तल्लेख्यं दोषवर्जितम् ॥

बृहस्पतिनाऽपि—

यस्यैकशासने ग्रामक्षेत्रारामाश्च लेखिताः ।
एकदेशोपभोगेऽपि सर्वे भुक्ता भवन्ति ते ॥

इति । यत्पुनर्लेख्यमनिवारितप्रतिकूलदानस्य स्वामिनः तद्विफलमेवेत्याह स एव—

पश्यन्नन्यस्य ददतः क्षितिं यो न विचालयेत् ।
स्वामी सताऽपि लेख्येन न पुनस्तां समाप्नुयात् ॥

सताऽपि समीचीनेनापीत्यर्थः । क्षितिमिति देयद्रव्योपलक्षणार्थम् । यदाह स एव—

रिक्थिभिर्वा परैर्द्रव्यं समक्षं यस्य दीयते ।

अन्यस्य भुञ्जतः पश्चात् न स तल्लब्धुमर्हति ॥

समक्षदानेनाप्रतिषिध्यमानेन स्वाम्यनुमतिपूर्वकत्वसूचकेन स्वामिनो यदागमलेख्यं तस्य स्वत्वसाधकत्वे प्रतिहतिर्भवतीत्यर्थः। अनेनार्थलेख्येन स्वार्थसिद्धिमिच्छता स्वामिना समक्षदानं प्रतिषेद्धव्यं यत्नत इत्युक्तं भवति। एवं समक्षभोगाप्रतिषेधेऽपि द्रष्टव्यम्। तथा च व्यासः—

वर्षाणि विंशतिं यस्य भुक्ता पृथ्वीपरैरिह।
सति राज्ञि समर्थस्य तस्य सेह न सिध्यति ॥

सताऽपि लेख्येनेति शेषः। अत एव संवर्तः—

भुज्यमाने गृहक्षेत्रे विद्यमाने तु राजनि।
भुक्तिर्यस्य भवेत्तस्य न लेख्यं तत्र कारणम् ॥

तस्य भोक्तुर्भुज्यमानं भवेत् यतस्तत्रोपेक्षकस्यागमलेख्यं न कारणं न साधनं, भोगोपेक्षया स्वत्वापत्तिसूचिकया लेख्यसाधकत्वस्य प्रतिहतत्वादित्यर्थः। एतच्च लेख्यवैयर्थ्यकथनार्थमुक्तं न पुनर्भोक्तुस्स्वामित्वप्रतिपादनार्थं तस्य भोगमात्रेण स्वामित्वासिद्धेः। अत एव कात्यायनः—

नोपभोगबलं कार्यमाहर्त्रा तत्सुतेन वा।
पशुस्त्रीपुरुषादीनामिति धर्मो व्यवस्थितः ॥

अत एव व्यासेन धेनुदृष्टान्तो दत्तः—

उपेक्षिता यथा धेनुर्विना पालेन नश्यति।
पश्यतोऽन्यैस्तथा भूमिर्भुक्ता तेन तु हीयते ॥

याज्ञवल्क्येनापि एवमुपेक्षकस्याहानिरेवाभिहिता, न पुनर्भो-
क्तुस्स्वत्वापत्तिः—

पश्यतोऽब्रुवतो भूमेः हानिर्विंशतिवार्षिकी ।
परेण भुज्यमानाया धनस्य दशवार्षिकी ॥

इति । हानिश्चात्र लिखितबलेनात्मीयत्वप्रसाधनमात्रस्याभि-
प्रेता, न पुनर्भूम्यादौ तत्फले वा स्वत्वस्य, नोपेक्षामात्रेण
स्वत्वमपैतीत्युक्तत्वात् । तेनात्र न धर्माख्यनिर्णयवशादुपेक्ष
कस्य हानिः, तद्वशेनात्मीयत्वप्रसाधनसम्भवात् । नैवं व्यव
हाराख्यनिर्णयवशेन, लेख्यवैगुण्यस्योक्तत्वात्, किंतु द्विती-
यव्यवहाराख्यनिर्णयात् भोक्तुरनिन्द्यत्वं स्वामिनो निरुत्तर-
त्वेनास्वामिनो जितत्वात् । तदाह मनुः—

अजडश्चेदपौगण्डो विषये चास्य भुज्यते ।
भग्नं तद्व्यवहारेण भोक्ता तद्धनमर्हति ॥

इति । व्यवहारशब्दार्थमाह बृहस्पतिः—

प्रमाणनिश्चितो यस्तु व्यवहारस्स उच्यते ।
वाक्छलानुत्तरत्वेन द्वितीयः परिकीर्तितः ॥

इति । प्रमाणनिश्चितो मानुषप्रमाणानिश्चितः । वाक्छलव्यवहा-
रेण निरुत्तरत्वेन वा भग्नस्यापि वास्तवो व्यवहारो भव
त्येव । प्रमाणराहित्येन भोक्तुर्जयस्य शिथिलत्वात्—

छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः ।

इति याज्ञवल्क्येनाप्युक्तत्वात् । एवं प्रतिकूलदानभोगयोरप्र-

तिषेधे साक्षिणामपि वैयर्थ्यं दण्डापूपन्यायसिद्धं बोद्धव्यम् । अत एव नारदः—

उपेक्षां कुर्वतस्तस्य तूष्णींभूतस्य तिष्ठतः ।
कालेऽतिपन्ने पूर्वोक्ते व्यवहारो न सिध्यति ॥

मानुषप्रमाणात्तस्य स्वार्थो न सिध्यतीत्यर्थः । सङ्ग्रहकारोऽपि—

अभुक्तिरागमो मोघो भुज्यमाने परैरपि ।

इति । आगमशब्देनात्र तत्प्रमाणभूतलिखितसाक्षिणावुक्तौ । अत एव प्रायेण साक्षिसाध्येष्वपि हानिमाह मरीचिः—

धेनुवाह्यालङ्करणं याचितं प्रीतिकर्मणा ।
चतुःपञ्चाब्दिकं देयमन्यथा हानिमाप्नुयात् ॥

अत्रापवादमाह मनुः—

सम्प्रीत्या भुज्यमानानि न नश्यन्ति कदाचन ।
धेनुरुष्ट्रो वहन्नश्वो यश्च दम्यः प्रयुज्यते ॥

दम्यो वत्सतरः । याचितके त्वपवादमाह व्यासः—

याच्ञाधर्मेण यद्भुक्तं श्रोत्रियै राजपूरुषैः ।
सुहृद्भिर्बान्धवैर्वाऽपि न तद्भोगेन हीयते ॥

यत् अलङ्करणादीत्यर्थः । अहानौ कारणमप्याह स एव—

धर्मोक्षयश्श्रोत्रिये स्यात् भयं स्याद्राजपूरुषे ।
स्नेहस्सुहृद्बान्धवेषु भुक्तमेतैर्न हीयते ॥

भुक्तं पञ्चवर्षादूर्ध्वमपीति शेषः । अनेन सकारणोपेक्षायां न कदाचिद्धानिरित्युक्तम् । तेन दशवार्षिकविंशतिवार्षिकहान्यो-

रपि अपवादस्सकारणोपेक्षायां द्रष्टव्यः । अत एव मनुः—

आधिस्सीमा बालधनं निक्षेपोपनिधिस्त्रियः ।
राजस्वं श्रोत्रियद्रव्यं नोपभोगेन नश्यति ॥

सीम्नि तत्रत्यचिह्नैस्सुसाधनत्वमुपेक्षाकारणम् । स्त्रीष्वप्रागल्भ्यम् । राजश्रोत्रिययोर्दृष्टादृष्टकार्यवैयग्रयम् । अवशिष्टेषूपेक्षाकारणं व्यक्तम् । एवं सम्बन्धरूपोपेक्षाकारणसम्भवेऽप्यहानिः । तथाच व्यासः—

सनाभिभिर्बान्धवैर्वा भुक्तं यत्स्वजनैस्तथा ।
भोगे तत्र न सिद्धिस्स्याद्भोगमन्यत्र कल्पयेत् ॥

तत्र सनाभ्यादिभोगे सम्बन्धित्वेनोपेक्षासम्भवात् । भूम्यादिहानेर्न सिद्धिस्स्यादित्यर्थः । पितामहोपि—

भुक्तिर्बलवती तत्र भोक्ता यत्र परो भवेत् ।
स्वगोत्रे भोगिनां भुक्तिर्न शक्ता शाश्वती नृणाम् ॥

बलवती स्वप्रतिकूललेख्यादेर्वैयर्थ्यकर्त्री । स्वगोत्रे स्वमातापितृबन्धुष्वित्यर्थः । तथाच कात्यायनः—

न भोगं कल्पयेत् स्त्रीषु देवराजधनेषु च ।
बालश्रोत्रियवित्ते च मातृतः पितृतः क्रमात् ॥

देवानामनिराकर्तृस्वभावत्वात् तद्धनस्यान्यभोगे न हानिः । श्रोत्रियग्रहणमन्यासक्तोपलक्षणार्थम् । अत एव नारदः—

ब्रह्मचारी चरेत्कश्चित् व्रतं षट्त्रिंशदाब्दिकम् ।
अर्थार्थी वाऽन्यविषये दीर्घकालं वसेन्नरः ॥

समावृत्तो व्रती कुर्यात्स्वधनान्वेषणं ततः ।
पञ्चाशदाब्दिको भोगस्तद्धनस्यापहारकः ॥
प्रतिवेदं द्वादशाब्दः कालो विद्यार्थिनां स्मृतः ।
शिल्पविद्यार्थिनां चैव ग्रहणान्तः प्रकीर्तितः ॥
सुहृद्भिर्बन्धुभिश्चैषां यत्सम्भुक्तमपश्यताम् ।
नृपापराधिनां चैव न तत्कालेन हीयते ॥

इति । एतच्चापवादजातं भोक्तुरागमाभावे वेदितव्यम् । अत एव बृहस्पतिः—

न स्त्रीणामुपभोगस्स्याद्विना लेख्यं कथंचन ।
राजश्रोत्रियवित्ते च जडबालधने न च ॥

स्त्रीणां धन इति शेषः । विना लेख्यं विनाऽऽगमप्रमाणम् । नारदोऽपि—

स्त्रीधनं च नरेन्द्राणां न कथंचन जीर्यते ।
अनागमं भुज्यमानं वर्षाणां तु शतैरपि ॥

नरेन्द्राणां च धनमित्यर्थः । तथाच स एव—

प्रत्यक्षपरिभोगाच्च स्वामिनो द्विशतास्समाः ।
आध्यादीन्यपि जीर्यन्ते स्त्रीनरेन्द्रधनादृते ॥

आध्यादीन्यपीति प्रौढिवादः, तेषामपि भोगोपेक्षाकारणसम्भवेन स्त्रीधननरेन्द्रधनतुल्यत्वात् । अनागममिति वदन्नागमसम्भवे जीर्यत एवेति दर्शयति । दर्शितं च हारीतेन—

भटचाटबलाद्भुक्तं हृतं गुप्तमथापि वा ।

स्नेहप्रणयदत्तं च प्रदत्तं भाटकेन वा ॥
तथा वसनरक्षार्थं याचितं प्रणयेन वा ।
एवं बहुविधे भोगे आगमो निर्णयस्स्मृतः ॥

इति । वसनरक्षार्थं गृहरक्षणार्थम् । एवंचोपेक्षाकारणरहिता प्रतिकूला भुक्तिरागमाभावेऽप्युक्तकाला लिखितसाक्षिणोर्वैयर्थ्यमापादयतीत्यनुसन्धेयम् । अतो लिखितसाक्षिणावनुकूलभुक्तियुक्तौ प्रतिकूलसमक्षदानादिरहितौ गृहक्षेत्रादिविषये प्रमाणतया कीर्तनीयौ । भुक्तिः पुनः कीदृग्विधा कीर्तनीयेत्यपेक्षित उक्तं—

सामन्तलक्षणोपेता भुक्तिर्वा चिरकालिकी ।

इति । साध्यभूतक्षेत्रादेस्समन्ततो यत् क्षेत्रादि तत्स्वामिनस्सामन्ताः, तैर्विज्ञाता सामन्तोपेता । लक्षणोपेता तु पितामहेन दर्शिता—

सागमा दीर्घकाला च विच्छिन्नोपरवोज्झिता ।
प्रत्यर्थिसन्निधाना च भुक्तिः पञ्चविधा स्मृता ॥

सागमा आगममूलिका । तथाच हारीतः—

न मूलेन विना शाखा अन्तरिक्षे प्ररोहति ।
आगमस्तु भवेन्मूलं भुक्तिश्शाखा प्रकीर्तिता ॥

कः पुनरागम इत्यपेक्षिते नारदः—

लब्धं दानक्रयप्राप्तं शौर्यं वैवाहिकं तथा ।
बान्धवादप्रजाज्जातं षड्विधस्तु धनागमः ॥

लब्धं जन्मना लब्धं पैतृकादि, अथवा दर्शनेन लब्धं निध्यादि । बृहस्पतिरपि—

विद्यया क्रयबन्धेन शौर्याप्तं भार्ययाऽन्वितम् ।
सपिण्डस्याप्रजस्यांशः स्थावरं सप्तधाऽऽप्यते ॥

बन्ध आधिः । सोपि क्वचित् स्वत्वनिमित्तं भवतीति वक्ष्यामः । दीर्घकाला त्रिंशद्वर्षादनल्पिका । तथाच स एव—

अध्यासनात्समारभ्य भुक्तिर्यस्याविघातिनी ।
त्रिंशद्वर्षा त्वविच्छिन्ना तस्य तां न विचालयेत् ॥

अध्यासनं परिग्रहः । एवंच दीर्घकाला भुक्तिरागमानुगृहीतप्रमाणं, अदीर्घकाला चेत्तदनुगृहीतागम इत्यनुसन्धेयम् । अत एव पितामहः—

नागमेन विना भुक्तिः नागमो भुक्तिवर्जितः ।
तयोरन्योन्यसम्बन्धात् प्रमाणत्वं व्यवस्थितम् ॥

पूर्वोक्तव्यवस्थयेति शेषः । अनेनैवाभिप्रायेण बृहस्पतिरपि—

भुक्त्या केवलया नैव भुक्तिस्सिद्धिमवाप्नुयात् ।
आगमेनापि शुद्धेन द्वाभ्यां सिद्ध्यति नान्यथा ॥

केवलया अगमरहितयेत्यर्थः । एवं विशेषणान्तररहितयाऽप्यसिद्धिः । अत एव व्यासः—

सागमो दीर्घकालश्च विच्छेदोपरवोज्झितः ।
प्रत्यर्थिसन्निधानश्च पञ्चाङ्गो भोग इष्यते ॥

पश्चाङ्ग इति वदन् एकाङ्गवैकल्येऽप्यप्रामाण्यमेव भोगस्येति दर्श-
यति । दर्शितं च नारदेन—

सम्भोगं केवलं यस्तु कीर्तयेन्नागमं क्वचित् ।
भोगच्छलापदेशेन विज्ञेयस्स तु तस्करः ॥

तेन सभ्यसन्निधावागमाद्यङ्गमपि कीर्तनीयमित्यभिप्रायः । अत
एव कात्यायनः—

प्रणष्टागमलेख्येन भोगारूढेन वादिना ।
कालः प्रमाणं दानं च कीर्तनीयानि संसदि ॥

दानग्रहणमागमोपलक्षणार्थम् । चशब्दः सान्तत्यादिविशेषण-
सङ्ग्रहार्थः । एवं चायमर्थः—भोगप्रमाणवादिना भोगाख्यं प्रमाणं
तद्विशेषणानि आगमदीर्घकालादीनि च कीर्तनीयानि, कीर्तितानि
च तद्विप्रतिपत्तौ साधनीयानि, कीर्तनमात्रे निश्चयाभावात् । तत्र
दीर्घकालादिविशिष्टभुक्तिनिश्चयः साक्ष्यधीन इत्याह सङ्ग्रहकारः—

भुक्तिप्रसाधने मुख्याः प्रथमं तत्कृषीवलाः ।
ग्रामण्यः क्षेत्रसामन्तास्तत्सन्धापयतः क्रमात् ॥

तत्सन्धापयतः दीर्घकालादिविशेषणं भुक्तिं चोद्भावयत इत्यर्थः ।
आगममुद्भावयतस्तु लिखितादित्रयं प्रमाणमित्याह स एव—

लिखितं साक्षिणो भुक्तिः क्रिया क्षेत्रगृहादिषु ।
आगमः क्रयदानादौ प्रत्याख्याते चिरन्तने ॥

उत्सन्नसत्तावादे क्रयाद्यागमे प्रत्याख्याते प्रतिवादिना निराकृते

सति क्षेत्रादिष्वागममुद्भावयतो लिखितसाक्षिभुक्तयः प्रमाणमित्यर्थः। ननु कथमागमे भुक्तिः प्रमाणं, अनागममूलाया अपि भुक्तेरपहारादौ दर्शनात्। मैवं—दीर्घकालादिविशिष्टाया भुक्तेर्मूलान्तरादर्शने सत्यागममूलतैवावसीयते मन्वादिस्मृतेरिव वेदमूलता। ननु तथाऽपि स्मरणयोग्ये काले भुक्तावुपक्रान्तायां योग्यानुपलब्ध्या मूलभूतागमाभावनिश्चयात्कथं तत्र भुक्तिबलेनैवागमसिद्धिः। सत्यं—अत एव तस्मिन् काले उपक्रान्तायां लिखितसाक्षिभ्यामेवागमोऽध्यवसीयते। स्मरणयोग्यकाले तु उपक्रान्तायां स्वबलेनापीति युक्तं आगमे प्रमाणत्रयाभिधानम्। एतदेव कात्यायनेनाप्युक्तं—

> स्मार्ते काले क्रिया भूमेः सागमा भुक्तिरिष्यते।
> अस्मार्तेऽनुगमाभावात्क्रमात्त्रिपुरुषागता॥

इति। अनुगमाभावात् योग्यानुपलब्ध्यात्मकबाधकाभावादित्यर्थः। एतदुक्तं भवति स्मरणयोग्यपञ्चाधिकशतवर्षपर्यन्तातीतकालमध्ये प्रारब्धा भुक्तिः स्वेतरप्रमाणावगताऽऽगममूलैव स्वत्वे प्रमाणमिष्यते। स्वतस्स्वमूलावगते योग्यानुपलब्ध्या बाध्यमानत्वात्। स्मरणायोग्ये पुनः पञ्चाधिकशतवर्षपर्यन्तातीतकालात्प्राचीनकाले प्रारब्धा स्वदार्ढ्यावगतागममूलिका विनाऽपि मानान्तरावगतागममूलतां स्वत्वे प्रमाणम्, इति। क्रमात् त्रिपुरुषागतेत्यस्य तु व्याख्या सङ्ग्रहकारेण कृता—

स्वतन्त्रैः प्रेतपितृकैः भुक्ता या पूर्वजैस्त्रिभिः ।
भुक्तिस्त्रिपुरुषा ज्ञेया यावज्जीवमनुष्ठिता ॥

इयं च प्रायेणास्मार्तकालोपक्रमभुक्तेरुदाहरणार्थमुदिता, तेन भुक्तेरागमप्रमाणत्वे क्रमात्त्रिपुरुषागतत्वमनुपयोगि, अस्मार्तकालोपक्रमत्वमेवोपयुज्यते । अत एव बृहस्पतिना पुरुषत्रयातिक्रमाभावेऽपि कालत एव भुक्तेस्त्रिपुरुषत्वमुक्तम्—

पिता पितामहो यस्य जीवेच्च प्रपितामहः ।
त्रिंशत्समा या तु भुक्ता भूमिरव्याहता परैः ॥
भुक्तिस्सा पौरुषी ज्ञेया द्विगुणा च द्विपौरुषी ।
त्रिपौरुषी च त्रिगुणा परतस्स्याच्चिरन्तनी ॥

त्रिंशत्समा पञ्चोत्तरेति शेषः ।

वर्षाणि पञ्चत्रिंशत्तु पौरुषो भोग उच्यते ।

इति स्मृत्यन्तर उक्तत्वात् । एवं चागमकर्त्राऽऽगमोद्भावनं लेख्यसाक्षिभ्यामेव कार्यं, भोगस्यास्मार्तकालीनोपक्रमवतोऽसम्भवात् । अत एव बृहस्पतिः—

यत्राहर्ताऽभियुक्तस्स्याल्लेख्यं साक्षी तदा गुरुः ।
तदभावे तु पुत्राणां भुक्तिरेका गरीयसी ॥

तदभावे आहर्तृपुरुषाभावे । अनेनैवाभिप्रायेण कात्यायनोऽपि—

आहर्ता भुक्तियुक्तोपि लेख्यदोषान्विशोधयेत् ।
तत्सुतो भुक्तिदोषांस्तु लेख्यदोषांस्तु नाप्नुयात् ॥

सुतग्रहणं पौत्रस्याप्युपलक्षणार्थं अत एव याज्ञवल्क्यः—

अगमस्तु कृतो येन सोऽभियुक्तस्तमुद्धरेत् ।
न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी ॥

कृतागमेनागमोद्धरणं लेख्यसाक्षिभ्यामेव कार्यम् । भुक्तेः स्मार्तकालीनोपक्रमत्वेनागमोद्भावनेऽपि क्षमत्वात्।एतत्कृतागमस्यागमो भोगात्पृथगेव साध्यः । पुत्रपौत्रयोश्चाचिरन्तनभोगे तु भोगसाधननान्तरीयकतयाऽपीत्यवगन्तव्यम् । तेन चिरन्तनोपभोगे तत्साधनेनैवालमित्याह बृहस्पतिः—

आहर्ता साधयेद्भुक्तिमागमं चापि संसदि ।
तत्सुतो भुक्तिमेवैकां पौत्रादिस्तु न किंचन ॥

तत्पुत्रो भुक्तिमेवैकां चिरन्तनीमाद्यपुरुषेण भोक्तुमुपक्रान्तकालादारभ्य विवादात् प्राचीनकालपर्यन्तमुपरवराहित्येन प्रतिपक्षतार्हपुरुषसमक्षमनुवर्तमानं साधयेदित्यर्थः । पुत्रग्रहणं पौत्रस्यापि प्रदर्शनार्थम् । पौत्रादिरित्यतद्गुणो बहुव्रीहिः । तेन पौत्रस्यापि पुत्रवदेव द्रष्टव्यम् । अत एव स्मृत्यन्तरम्—

आगमस्तु कृतो येन स दण्ड्यस्तमनुद्धरन् ।
न तत्सुतस्तत्सुतो वा भोगहानिस्तयोरपि ॥

चिरन्तनभोगेऽपीति शेषः । अनेन चिरन्तनभोगे प्रपौत्रादीनामागमानुद्धरणेऽपि न भोग्यहानिरित्यर्थादुक्तं भवति । उक्तं च विष्णुना—

त्रिभिरेव तु या भुक्ता पुरुषैर्भूर्यथाविधि ।
लेख्याभावेऽपि तां तत्र चतुर्थस्समवाप्नुयात् ॥

लेख्याभावेऽपि क्रियाद्यागमप्रकाशकप्रमाणाभावेऽपीत्यर्थः । अत एव बृहस्पतिः--

राजान्तरैस्त्रिभिर्भुक्तं प्रमाणेन विनाऽपि यत् ।
ब्रह्मदेयं न हर्तव्यं राज्ञा तस्य कदाचन ॥

प्रमाणेन आगमप्रकाशकप्रमाणेनेत्यर्थः । नारदोपि-

यद्विनाऽऽगममत्यन्तं भुक्तं पूर्वैस्त्रिभिर्भवेत् ।
न तच्छक्यमपाहर्तुं क्रमात्त्रिपुरुषागतम् ॥

अत्यन्तं विनाऽऽगमं भुक्त्याप्युपलभ्यमानमागमं विनेत्यर्थः । शङ्खोपि—

पैत्रं विनाऽप्यागमेन पूर्वपूरुषाभ्यां भुक्तं लभेत ।

पूर्ववचनसमानार्थमेतत् । लभेत चतुर्थादिरिति शेषः । तथाच बृहस्पतिः—

भुक्तिस्त्रैपुरुषी यत्र चतुर्थे संप्रवर्तिता ।
तद्भोगस्स्थिरतां याति न पृच्छेदागमं क्वचित् ॥

उक्तविधभोगे तन्मूलभूतागमं प्रति किमपि प्रमाणं क्वचिदपि न पृच्छेदित्यर्थः । सान्तरत्यादिविशिष्टां भुक्तिं प्रति प्रमाणं पृच्छेदेव । तथाच नारदः—

आहर्तैवाभियुक्तस्स्यादर्थानामुद्धरेत्पदम् ।

भुक्तिरेव विशुद्धा स्यात् प्राप्तानां पितृतः क्रमात् ॥

पदं स्थानं आगममिति यावत् । विशुद्धा सान्तत्यादिमत्तया प्रमाणतस्सिद्धा । प्राप्तानां चतुर्थादीनाम् । बृहस्पतिरपि—

अविच्छेदेन यद्भुक्तं पुरुषैस्त्रिभिरेव तु ।
तत्र नैवागमः कार्यो भुक्तिस्तत्र गरीयसी ॥

तत्र चतुर्थादिष्वागमनिश्चयो नावश्यं कार्यः । यतस्तत्र भुक्तिः पूर्वपुरुषत्रयागता सान्तत्यादिविशेषणवत्तया साधिता गरीयसी, विनाऽप्यागमनिश्चयं स्वतन्त्रैव प्रमाणमित्यर्थः । तथा चाह स एव-

स्थावरेषु विवादेषु भुक्तिस्त्रिपुरुषी च या ।
स्वतन्त्रैव हि सा ज्ञेया प्रमाणं साध्यनिर्णये ॥

स्वतन्त्रा स्वमूलभूतागमनिश्चयानपेक्षेत्यर्थः । कात्यायनोऽपि—

भुक्तिस्तु द्विविधा प्रोक्ता सागमाऽनागमा तथा ।
त्रिपूरुषी या स्वतन्त्राऽनागमाऽल्पा तु सागमा ॥

सागमा निश्चितागमेत्यर्थः । ननु स्वतन्त्राऽपि निश्चितागमैव, स्वदार्ढ्येनैवागमनिश्चयात् । मैवम्, चिरन्तन्याः भुक्तेः अस्मार्तकालीनभोगस्य सान्तत्यादिविशेषणवत्तयोद्भावनाभावेन कृत्स्नाया दार्ढ्याभावात् । न च चतुर्थादीनां तद्भोगस्याप्युद्भावनं कार्यमिति वाच्यं, 'पौत्रादिस्तु न किंचन' इत्यस्मार्तकालीनभोगस्योद्भावननिषेधात् ।

भुक्तिरेव विशुद्धा स्यात् प्राप्तानां पितृतः क्रमात् ।

इति स्मार्तकालीनभोगस्यैवोद्भावनविधानाच्च । अतस्स्वतन्त्रा भुक्तिरनिश्चितागमा । कथं तर्हि तस्य स्वत्वे प्रामाण्यं, उच्यते—आगमनिश्चयाभावेऽपि एवं विधायाः प्रामाण्यमिष्यते।सागमपक्षस्यात्यन्तासम्भावितत्वात्, बाधकस्य चानागमनिश्चयस्याभावात्। तथा साहसादौ मिथ्यावादित्वनिश्चयाभावमात्रात् साक्षिणां प्रामाण्यमिष्टम् ।

सर्वस्साक्षी संग्रहणे चौर्यपारुष्यसाहसे ।

इति । तथेहापि सर्वं सुस्थम् । अत एव कात्यायनः—

चिरन्तनमविज्ञातं भोगं लोभान्न चालयेत् ।

इति । अविज्ञातं अनागमतयेत्यर्थः । एतदुक्तं भवति—यथा छलानुसारेण निर्णीतोऽपि विंशतिवार्षिकभोगस्य पुनर्भूतानुसारेण चालनमिष्टं न तथा चिरन्तनस्येति । हारीतोपि—

अन्यायेनापि यद्भुक्तं पित्रा भ्रात्राऽथवाऽपि च ।
न तच्छक्यं पराहर्तुं तृतीयं समुपागतम् ॥

तृतीयमतिक्रम्य समुपागतमित्यर्थः । अत एव नारदः—

अन्यायेनापि यद्भुक्तं पित्रा पूर्वतरैस्त्रिभिः ।
न तच्छक्यं पराहर्तुं क्रमात्त्रिपुरुषागतम् ॥

पित्रा सह पूर्वतरैस्त्रिभिर्यद्भुक्तं तदन्यायेनेति वक्तुमशक्यं, किं पुनरपहर्तुमित्यर्थः । यत्पुनस्तेनोक्तम्—

आगमेन विशुद्धेन भोगो याति प्रमाणताम् ।

अविशुद्धागमो भोगः प्रामाण्यं नैव गच्छति ॥

इति, तदत्रिपुरुषागतभोगविषयं, भोगमात्रविषयत्वे पूर्वोक्तानेकवचनविरोधात्,

आगमोऽभ्यधिको भोगाद्विना पूर्वक्रमागतात् ।

इति याज्ञवल्क्यवचनविरोधाच्च । यत्तु बृहस्पतिनोक्तम्—

यस्य त्रिपुरुषा भुक्तिस्सम्यग्लेख्यसमन्विता ।
एवंविधा ब्रह्मदेया हर्तुं तस्य न शक्यते ॥

इति, तत्स्मार्तकालानतिक्रान्तत्रिपुरुषभोगविषयम् । यत्पुनर्नारदेनोक्तम्—

अनागमं तु यो भुङ्क्ते बहून्यब्दशतान्यपि ।
चोरदण्डेन तं पापं दण्डयेत्पृथिवीपतिः ॥

इति, तद्येनकेनचित् प्रमाणेन निश्चितानागमभोगविषयं, अनागममिति सिद्धवन्निर्देशात् । निश्चितानागमाश्च भोगास्तेनैव दर्शिताः—

अन्वाहितं भृतन्यस्तं बलावष्टब्धयाचिते ।
अप्रत्यक्षं च यद्भुक्तं षडेतान्यागमं विना ॥

अन्वाहितं अन्यस्मै दातुमर्पितम् । याचितं परकीयद्रव्यमलङ्काराद्यर्थमानीतम् । बलावष्टब्धं राजप्रसादादिबलेन भुक्तम् । एवंविधस्य चिरन्तनस्यापि भोगस्य न प्रामाण्यम् । तथाच स एव—

ग्रामक्षेत्रं गृहं चैव भुक्तं यस्य क्रमागतम् ॥
राजप्रसादादन्यत्र न तद्भुक्तं परं नयेत् ॥

राजप्रसादात् अन्यायभूतादिति शेषः। तथाच संवर्तः—

या राज्ञा क्रोधलोभेन छलन्यायेन वा कृता।
प्रदत्ताऽन्यस्य तुष्टेन न सा सिद्धिमवाप्नुयात् ॥

या खल्वन्यस्य भूः क्रोधादिना राज्ञा परभोग्यतया कृता, तुष्ट्या वाऽन्यस्मै दत्ता, सा चिरन्तनभोगेनापि न भोक्तुस्सिध्यतीत्यर्थः। एवं शासनाविरोधेन भुक्तस्याप्यसिद्धिर्द्रष्टव्या। तथा च बृहस्पतिः—

यस्य त्रिपुरुषा भुक्तिः पारम्पर्यक्रमागता।
न सा चालयितुं शक्या पूर्वकाच्छासनादृते ॥

यत्तु पितामहेनोक्तं—

स्वहस्तकाज्जानपदं तस्मात्तु नृपशासनम्।
ततस्त्रैपुरुषो भोगः प्रमाणतरमिष्यते ॥

इति, तत्प्रवादपरम्परायातप्रसिद्धानिश्चितागमभोगविषयं, अन्यथा पूर्वोक्तवचनाविरोधात्। एवं पूर्वपुरुषप्रसाधितागमाया अपि भुक्तेः प्रमाणतरत्वमवगन्तव्यम्। तथाच बृहस्पतिः—

भुक्तिर्बलवती शास्त्रे ह्यविच्छिन्ना चिरन्तनी।
विच्छिन्नाऽपि हि सा ज्ञेया या तु पूर्वं प्रसाधिता ॥

या चिरन्तनी पूर्वपुरुषप्रसाधितागमा सा विच्छिन्नाऽपि बलवती ज्ञेयेत्यर्थः । व्यासोपि—

आहर्त्रा याऽभियुक्तेन प्रमाणेन प्रसाधिता ।
भूमिस्सा तत्सुतात् प्राप्ता न हर्तव्या कदाचन ॥

तत्सुतात् न हर्तव्येत्यन्वयः । यदा त्वभियुक्तेनाहर्त्रा न साधिता तदा तत्सुतेन चिरन्तनभोगारूढेनाप्याहर्तृवदेव साध्या । तथाच बृहस्पतिः—

उद्धरेल्लेख्यमाहर्ता तत्पुत्रो भुक्तिमेव तु ।
अभियुक्तः प्रमीतश्चेत्तत्पुत्रस्तत्समुद्धरेत् ॥

पूर्वाभियोगेन भुक्तेरदार्ढ्यात्तदुद्धरणमात्रेणात्रागमसिद्ध्यभावादागममप्युद्धरेदित्यर्थः । लेख्यग्रहणं साक्षिणोपि प्रदर्शनार्थम् । तस्याप्याहर्तृकर्तृकागमोद्धरणे प्रमाणत्वात् । नारदोपि—

तथाऽऽरूढविवादस्य प्रेतस्य व्यवहारिणः ।
पुत्रेण सोऽर्थस्संसाध्यो न तद्भोगान्निवर्तते ॥

यथाऽऽहर्त्रा लिखितसाक्षिभ्यामेवागमस्संसाध्यो भवति तथेत्यर्थः । पुत्रग्रहणं धनग्राहिण उपलक्षणार्थम् । अत एव याज्ञवल्क्यः—

योऽभियुक्तः परेतस्स्यात्तस्य रिक्थं तमुद्धरेत् ।
न तत्र कारणं भुक्तिरागमेन विनाकृता ॥

तमागमं चतुर्थादिरप्यवश्यं समुद्धरेत् । यस्मात्स्वतन्त्रा

भुक्तिस्तत्राप्रमाणम्, अविगीतत्वाभावादित्यर्थः । एवंच य यदुक्तं नारदेन—

आदौ तु कारणं दानं मध्ये भुक्तिस्तु सागमा ।
कारणं भुक्तिरेवैकं सन्तता या चिरन्तनी ॥

इति, तदाहर्तृनिर्णीताभियोगाभावविषयमिति मन्तव्यम् । अक्षरार्थस्तु सङ्ग्रहकारेण दर्शितः—

कृतागमस्योक्तकाले भुक्ते स्यात्प्रभुरागमः ।
तस्यैवात्मतृतीयस्य प्रभुर्भुक्तिस्स्फुटागमा ॥
भुक्तिर्या सा चतुर्थस्य प्रमाणं सन्ततागता ।
परित्यक्तागमा भुक्तिः केवलैव प्रभुर्मता ॥

इति । कृतागमस्य आगमकर्तुः । उक्तकाले त्रिंशद्वर्षात्मक इत्यर्थः । प्रभुः प्रधानम् । स्फुटागमा प्रमाणपरिच्छिन्नागमा, या सन्ततागता भुक्तिः चिरन्तनी चतुर्थादेः, प्रमाणं सा परित्यक्तागमानिश्चया । प्रभुः स्वत्वनिर्णयक्षमेति द्वितीयश्लोकार्थः । यत्पुनर्व्यासेनोक्तं—

वर्षाणि विंशतिं भुक्ता स्वामिनाऽव्याहता सती ।
भुक्तिस्सा पौरुषी भूमेर्द्विगुणा तु द्विपौरुषी ॥
त्रिपौरुषी च त्रिगुणा न ततोऽन्वेष्य आगमः ।

इति, तच्चतुर्थादिभुक्तेष्षष्ट्याब्दिक्याः प्रारम्भकालीनपुरुषाणां जीवतामभावे चिरन्तनकालीनभोगतुल्यतापत्तौ सत्यां द्रष्टव्यं, अन्यथा—

स्मार्ते काले क्रिया भूमेस्सागमा भुक्तिरिष्यते ।

इत्यादिवचनविरोधापत्तेः । एवंच पञ्चाधिकशतवर्षपर्यन्तस्य स्मार्तकालत्वाभिधानं प्रायिकाभिप्रायेणेति मन्तव्यम् ।

इति स्मृतिचन्द्रिकायां भुक्तिनिरूपणम्.

अथ साक्षिलक्षणानि । तत्र मनुः—

याद्दशा धनिभिः कार्या व्यवहारेषु साक्षिणः ।
ताद्दशांत्सम्प्रवक्ष्यामि यथा वाच्यमृतं च तैः ॥

साक्षिणां लक्षणानि अनुयोजनविधिं च वक्ष्यामीत्यर्थः । तत्रादौ लक्षणानि दर्शयति—

गृहिणः पुत्रिणो मौलाः क्षत्रविट्छूद्रयोनयः ।
अर्थज्ञास्साक्ष्यमर्हन्ति न ये केचिदनापदि ॥

मौलाः प्रतिष्ठिताः । अर्थज्ञाः साध्यमर्थं विदितवन्तः 'समक्षदर्शनात्साक्ष्यं श्रवणाच्चैव सिद्ध्यति' इति तेनैवोक्तत्वात्। गृहिण इत्यादिषु पुल्लिङ्गनिर्देशो विवक्षितः, उपादेयगतत्वात्। अत एव नारदः—

कुलीना ऋजवश्शुद्धाः जन्मतः कर्मतोऽर्थतः ।
साक्षिणश्शुचयोऽनिन्द्याः पुरुषास्स्युस्सुबुद्धयः ॥

एवंविधाः पुरुषाः ऋणादिषु साक्षिणस्स्युरित्यर्थः । तथाच व्यासः—

धर्मज्ञाः पुत्रिणो मौलाः कुलीनास्सत्यवादिनः ।
श्रौतस्मार्तक्रियायुक्ता विगतद्वेषमत्सराः ॥
श्रोत्रिया नपराधीनाः सूरयश्चाप्रवासिनः ।
युवानस्साक्षिणः कार्याः ऋणादिषु विजानता ॥

इति । श्रोत्रियाः श्रुतिपाठकाः । एवमुक्तविधा न जातु कूटतां प्रतिपद्यन्त इत्याह स एव—

ज्ञात्वा कार्यं देशकालकुशलाः कूटकारकाः ।
कुर्वन्ति सदृशं लेख्यं नैते स्युस्साक्षिणो यथा ॥

कात्यायनोपि—

प्रख्यातकुलशीलाश्च लोभमोहविवर्जिताः ।
आप्ताश्शुद्धा विशिष्टा ये तेषां साक्ष्यमसंशयम् ॥

तेषामिति बहुवचनं द्व्येकसङ्ख्यासाक्षिवाक्यमेवं न निश्चायकमिति प्रतिपादनार्थम् । अत एव मनुः—

त्र्यवरैस्साक्षिभिर्भाव्यो नृपब्राह्मणसन्निधौ ।

इति । भाव्यः साधनीयः त्रयः अवरा निकृष्टा येषां ते त्र्यवराः, त्रित्वादूनसङ्ख्या साक्षिष्वप्रशस्तेत्यर्थः । यत्तूक्तं बृहस्पतिना—

नव सप्त पञ्च वा स्युश्चत्वारस्त्रय एव वा ।
उभौ वा श्रोत्रियौ ख्यातौ नैकं पृच्छेत्कदाचन ॥

इति, तत्रोभाविति लिखितगूढसाक्षिविषयम् । यतोऽनन्तरमाह स एव—

लिखितौ द्वौ तथा गूढौ त्रिचतुःपञ्च लेखिताः ।
यदृच्छास्मारिताः कुल्यास्तथा चोत्तरसाक्षिणः ॥

इति । लिखितादीनां भेद उपरिष्टाद्वक्ष्यते । यत्पुनस्ते-
नोक्तं—

दूतको घटिकाग्राही कार्यमध्यगतस्तथा ।
एक एव प्रमाणं स्यान्नृपोऽध्यक्षस्तथैव च ॥

इति, घटिकाग्राही गणकः । अध्यक्षः प्राड्विवाकः । यदपि
व्यासेन—

शुभक्रियश्च धर्मज्ञस्साक्षी यत्रानुभूतवान् ।
प्रमाणमेकोपि भवेत्साहसेषु विशेषतः ॥

इति, यदपि कात्यायनेन—

अभ्यन्तरस्तु निक्षेपे साक्ष्यमेकोपि वाच्यते ।
अर्थिना प्रहितस्साक्षी भवत्येकोपि दूतकः * ॥
संस्तुतं येन संन्यस्तं तत्तेनैव विभावयेत् ।
एक एव प्रमाणं स विवादे तत्र कीर्तितः ॥

इति, तदेतत्सर्वमुभयानुमतसाक्षिविषयम् । बहुत्ववदुभयसंमत-
त्वस्याप्यनाप्तत्वशङ्काव्युदासकत्वात् । अत एव नारदः—

अथवाऽनुमतो यस्य द्वयोर्विवदमानयोः ।
स साक्ष्येकोऽपि साक्षित्वे प्रष्टव्यस्स्यात्तु संसदि ॥

---

* याचते.

इति। एवंच त्र्यवरा इति सङ्ख्यानियमो लिखितगूढोभयानुमतव्यतिरिक्तसाक्षिविषय एवेत्यनुसन्धेयम्। उभयानुमतसाक्षिविषये लिखितगूढसाक्षिविषये च न्यूनसङ्ख्यापक्षस्यापि विहितत्वात्। अत एव सङ्ग्रहकारः—

कर्तव्यास्सर्वकार्येषु त्रिभ्य आरभ्य साक्षिणः।
द्व्येकयोः प्रतिषेधस्स्यादेकोप्युभयसम्मतः॥

इति। साक्षिणो लिखितगूढव्यतिरिक्ताः। त्रिभ्य आरभ्य कर्तव्या इत्यर्थः। साक्षिण इत्यनुवृत्तौ नारदः—

ब्राह्मणः क्षत्रियो वैश्यश्शूद्रा ये चाप्यनिन्दिताः।
प्रतिवर्णं भवेयुस्ते सर्वे सर्वेषु वा पुनः॥

सति सम्भवे व्यवहर्तुस्सवर्णास्साक्षिणः इत्यर्थः। एवं वर्णेतरजातावपि व्यवहर्तृसजातीया भवेयुः।

यथाजाति यथावर्णं सर्वे सर्वेषु वा स्मृताः।

इति याज्ञवल्क्यस्मरणात्। जातिग्रहणं श्रेण्यादेरप्युपलक्षणार्थम्। अत एव नारदः—

श्रेणिषु श्रेणिपुरुषास्स्वेषु वर्गेषु वर्गिणः।
बहिर्वासिषु बाह्यास्स्युः स्त्रियः स्त्रीषु च साक्षिणः॥

इति। अत्रापवादमाह स एव—

श्रेण्यादिषु तु वर्गेषु कश्चिच्चेद्द्वेष्यतामियात्।
तस्य तेभ्यो न साक्ष्यं स्यात् द्वेष्टारस्सर्व एव ते॥

श्रेण्यादिषु ये यस्य द्वेषं कुर्वन्ति ते तस्य न साक्षिण इत्यर्थः। श्रेण्यादिग्रहणं वर्णादिप्रदर्शनार्थं, द्वेषग्रहणं चायथार्थकथनकारणवतामुपलक्षणार्थम्। अत एव मनुः—

आप्ताः सर्वेषु वर्णेषु कार्याः कार्येषु साक्षिणः।
सर्वधर्मविदोऽलुब्धाः विपरीतांस्तु वर्जयेत्॥

आप्ताः विप्रलम्भकव्यतिरिक्ताः। विपरीतान् अयथार्थवादकारणोपेतान्वर्जयेदित्यर्थः। तानेवाह स एव—

नार्थसम्बन्धिनो नाप्ता न सहाया न वैरिणः।
न दृष्टदोषाः कर्तव्या न व्याध्यार्ता न दूषिताः॥
न साक्षी नृपतिः कार्यो न कारुककुशीलवौ।
न श्रोत्रियो न लिङ्गस्थो न संघेभ्यो विनिर्गतः॥
नाध्यधीनो न वक्तव्यो न दस्युर्न विकर्मकृत्।
न वृद्धो न शिशुर्नैको नान्त्यो न विकलेन्द्रियः॥
नार्तो न मत्तो नोन्मत्तो न क्षुत्तृष्णोपपीडितः।
न श्रमार्तो न कामार्तो न क्रुद्धो नापि तस्करः॥

इति। अर्थसम्बन्धिनः विप्रतिपद्यमानार्थस्य सम्बन्धिनः। आप्तास्तु कात्यायनेन दर्शिताः—

तद्वृत्तिजीविनो ये च तत्सेवाहितकारिणः।
तद्बन्धुसुहृदो भृत्या आप्तास्ते तु न साक्षिणः॥

इति। सहायाः प्रतिभूप्रभृतयः। वैरिणः विप्रतिपन्नयोरन्य-

तरस्य दृष्टदोषाः कूटसाक्षित्वेनान्यत्र ज्ञाताः । दूषिताः महापातकादिदोषेण । नृपतिः बहुव्यापारव्याकुलत्वात् प्रतिषिध्यते। कारुकः शिल्पोपजीवी हेमकारादिः । कुशीलव रङ्गावतारी, तयोरर्थप्रवणत्वात् प्रतिषेधः । श्रोत्रियोऽत्र कर्मानुष्ठाननिष्ठो विवक्षितः, न पुनश्श्रुतिपाठकः, तस्य साक्षित्वेनोक्तत्वात् । लिङ्गस्थो ब्रह्मचारी यतिश्च । संघेभ्यो विनिर्गतः वानप्रस्थादिः । एतेषु श्रोत्रियादिष्वयथार्थवादहेत्वभावेऽपि वचनबलेनैव प्रतिषेधोऽध्यवसेयः । आध्यधीनो मानसव्याधिविह्वलः । वक्तव्यः कुष्ठादीना कुत्सितदेहः । दस्युः क्रूरचेष्टः । विकर्मकृत् शास्त्रविरुद्धकर्मकृत् । वृद्धः जरावशेन स्खलितबुद्धिः । शिशुः अपूर्णषोडशवर्षः । एको विवदमानाभ्यामननुमतः । अन्त्यः चण्डालादिः । विकलेन्द्रियो बधिरादिः । आर्तादयो व्यक्ताः । तेषां भेदः पूर्वमुक्तोऽत्राप्यनुसन्धेयः । नारदोपि वर्जनीयानाह—

दासनैकृतिकाश्राद्धवृद्धस्त्रीबालचाक्रिकाः ।
मत्तोन्मत्तप्रमत्तार्तकितवग्रामयाजकाः ॥
महापथिकसामुद्रवणिक्प्रव्रजितातुराः ।
युग्मैकश्रोत्रियाचारहीनक्लीबकुशीलवाः ॥
नास्तिकव्रात्यदाराग्नित्यागिनोऽयाज्ययाजकाः ।
एकस्थालिसहायारिचरज्ञातिसनाभयः ॥
प्राग्दृष्टदोषशैलूषविषजीव्याहितुण्डिकाः ।

गरदाग्निदकीनाशशूद्रापत्युपपातकाः ॥
क्लान्तसाहसिकाशान्तनिर्धूतान्तावसायिनः ।
भिन्नवृत्तासमावृत्तजडतैलिकपौपिकाः ॥
भूताविष्टनृपद्विष्टवर्षनक्षत्रसूचकाः ।
अघशंस्यात्मविक्रेतृहीनाङ्गभगवृत्तयः ॥
कुनखी श्यावदन् श्वित्री मित्रध्रुक्शठशौण्डिकाः ।
ऐन्द्रजालिकलुब्धोग्रश्रेणीगणविरोधिनः ॥
वधकश्चित्रकृन्मूर्खः पतितः कूटकारकः ।
कुहकः प्रत्यवसितस्तस्करो राजपूरुषः ॥
मनुष्यविषमांसास्थिमधुक्षीराम्बुसर्पिषाम् ।
विक्रेता ब्राह्मणश्चैव द्विजो वार्धुषिकश्च यः ॥
च्युतस्स्वधर्मात् कुलिकः सूचको हीनसेवकः ।
पित्रा विवदमानश्च भेदकृच्चेत्यसाक्षिणः ॥

इति । नैकृतिकः पररन्ध्रान्वेषणशीलः । चाक्रिको वैतालिकः। सामुद्रवणिक वहित्रयायी । युग्मौ द्वित्वविशिष्टौ । एकस्थालीत्यस्य द्वेधा विग्रहः, एकपाकसाधनस्थाली यस्य पुरुषस्य, विप्रतिपन्नयोरन्यतरेण पुरुषेण सह यस्य वा एकं भोजनस्थालं स एकस्थाली एकपाकः सहभोजनो वेति यावत्। अरिषु चरतीत्यरिचरः शत्रुसम्बन्धीति यावत् । सनाभयस्तु कात्यायनेन दर्शिताः—

मातृष्वसृसुताश्चैव सोदर्यासुतमातुलाः ।

एते सनाभयस्तूक्तास्साक्ष्यं तेषु न योजयेत् ॥

इति । शैलूपो नटः । विषजीवी विषस्य सङ्ग्रहणरक्षणादिव्यापारे नियुक्तः । आहितुण्डिकः सर्पग्राही । गरदो विषदः । अग्निदो गृहदाहकः । कीनाशः कृपणः । क्लान्तः खिन्नः । निर्धूतो बहिष्कृतः । अन्तावसायी प्रतिलोमजः । भिन्नवृत्तो दुराचारः । असमावृत्तो नैष्ठिकब्रह्मचारी । जडो मन्दबुद्धिः । तैलिकस्तिलघाती, महायन्त्रिक इति यावत् । पौपिकः अपूपादिविक्रयी । वर्षसूचको वृष्टिसूचक, नैमित्तिक इति यावत् । नक्षत्रसूचको ज्यौतिषवृत्तिः । अघशंसी परदोषप्रकाशकः । भगवृत्तिः स्ववृत्तये भार्यावेश्यात्वकारी । शौण्डिको मद्यविक्रयी । मूर्खो देवतां गृहीत्वा याचकः । कुहको दाम्भिकः । प्रव्रवासितः प्रव्रज्यातो निवृत्तः । सूचकः परदोषसूचनार्थं राज्ञा नियुक्तः । भेदकृत् पिशुनः । अन्ये प्रसिद्धाः । कात्यायनोपि कतिपयानसाक्षिजनानाह—

कुल्यास्सम्बन्धिनश्चैव विवाह्यो भगिनीपतिः ।

पिता बन्धुः पितृव्यश्च श्वशुरो गुरवस्तथा ॥

नगरग्रामदेशेषु नियुक्ता ये पदेषु च ।

वल्लभाश्च न पृच्छेयुर्भक्तास्ते राजपूरुषाः ॥

इति । ये कुल्यादयो राजपुरुषान्ताः कीर्तिताः ते साक्ष्यं कर्तुं न पृच्छेयुः न साक्षिणस्स्युरित्यर्थः ।

नन्वयमसाक्षिकथनप्रपञ्चो व्यर्थः। लक्षणोक्त्यैवार्थाद्विल-क्षणानामसाक्षित्वसिद्धेः, सत्यमेवं तथाऽपि यत्र सर्वथा वि-हितसाक्षिणामलाभः तत्र मनुष्यमात्रस्य साक्षित्वं 'न येकेचि-दनापादि' इति मनुवचनतोऽर्थात्प्राप्तं, तत्र केषांचित्प्रतिषेधा-र्थं 'नार्थसम्बन्धिनो नाप्ताः' इत्यादिवचनरचना कृतेत्यर्थवाने-वायं प्रपञ्चः। एवंच लक्षणान्वितसाक्षिणामलाभे प्रतिषेधराहित्य-मात्रशालिनां साक्षित्वं विहितमित्यनुसन्धेयम्। अत एव तेषा-मपि प्रशंसा व्यासेन कृता—

दिव्यमोपधिभिर्मन्त्रैः प्रायेण व्यभिचार्यते।
न खल्वदोषदुष्टानां व्यभिचारोऽस्ति साक्षिणाम्॥

इति। यत्पुनर्मनुनोक्तं—

अनुभावी तु यः कश्चित्कुर्यात् साक्ष्यं विवादिनाम्।
अन्तर्वेश्मन्यरण्ये वा शरीरस्यापि वाऽत्यये॥
स्त्रियाऽप्यसम्भवे कार्यं बालेन स्थविरेण वा।
शिष्येण बन्धुना वाऽपि दासेन भृतकेन वा॥

इति। अनुभावी कार्याभिज्ञः। यदपि नारदेन—

असाक्षिणो ये निर्दिष्टाः दासनैकृतिकादयः।
कार्यगौरवमासाद्य भवेयुस्तेऽपि साक्षिणः॥

इति। कार्यगौरवं कार्यस्य प्रशस्तज्ञातुः राहित्यम्। तदेत-त्सर्वं साहसाद्यास्थिरकर्मविषयं तत्र प्रशस्तानां दुर्लभत्वात्। अत एव संग्रहकारः—

उत्कृष्टमध्यमाभावे निषिद्धा अपि साक्षिणः ।
साहसादिषु मन्तव्याः कालकार्यानिबन्धनाः ॥

इति । अत्र विशेषमाहोशना—

दासोऽन्धो बधिरः कुष्ठी स्त्रीबालस्थविरादयः ।
एतेऽप्यनभिसम्बन्धाः साहसे साक्षिणो मताः ॥

अनभिसम्बन्धाः मित्रारिभावरहिताः । साहसे साहसादिष्वित्यर्थः । अभिसम्बन्धाश्चेत् साहसादिष्वपि ते वर्जनीया एव । अत एव नारदः—

तेषामपि न बालस्स्यान्नैको न स्त्री न कूटकृत् ।
न बान्धवो न चारातिर्ब्रूयुस्ते साक्ष्यमन्यथा ॥

तेषां दासनैकृतिकादीनां मध्येऽपि व्यक्तानृतहेतुशालिनो बालादयो वर्ज्या इत्यर्थः । व्यक्तानृतहेतवोऽपि तेषु तेन दर्शिताः—

बालोऽज्ञानादसत्यात् स्त्री पापाभ्यासाच्च कूटकृत् ।
विब्रूयाद्बान्धवस्स्नेहाद्वैरनिर्यातनादरिः ॥

असत्यात् असत्यशीलत्वादित्यर्थः । अनेनाज्ञत्वासत्यशीलत्वाद्यधर्मनिष्ठत्वात्यन्तोत्कटरागद्वेषशालित्वादीन्येव व्यक्तानृतहेतवो न पुनर्बालत्वादयः इति दर्शितम् । एवमेकस्मिन्नपि नैकत्वं व्यक्तानृतहेतुः अपितु लुब्धत्वमित्याह मनुः—'एको लुब्धस्त्वसाक्षी स्यात्' इति । एवंचाज्ञत्वासत्यशील-

त्वादिदोषाणां सद्भावे दासादयोऽपि हेयाः, तदभावे तु बालादयोऽप्युपादेयाः इति साहसादिविषयेऽनुसन्धेयम् । यत्पुनर्मनुनोक्तं—

साहसेषु तु सर्वेषु स्तेयसङ्ग्रहणेषु च ।
वाग्दण्डयोश्च पारुष्ये न परीक्षेत साक्षिणः ॥

इति, यदपि कात्यायनेन—

व्याघातेषु नृपाज्ञायाः सङ्ग्रहे साहसेषु च ।
स्तेयपारुष्ययोश्चैव न परीक्षेत साक्षिणः ॥

इति, तद्गृहस्थत्वादिगुणगणविषयपरीक्षाया निषेधकं न पुनरज्ञत्वादिदोषविषयपरीक्षाया अपि, पूर्वोक्तवचनविरोधात् । यत्पुनः कात्यायनेनोक्तं—

ऋणादिषु परीक्षेत साक्षिणस्स्थिरकर्मसु ।
साहसात्ययिके चैव परीक्षा कुत्रचित् स्मृता ॥

इति, यद्यत्र साहसादौ पराजये वधादिगुरुतरदण्डप्राप्तिसम्भावना, तत्र परीक्षाविधानार्थं ऋणादिसाहचर्यादज्ञत्वादिदोषपरीक्षायाः सार्वत्रिकत्वेन कुत्रचिद्विधानासम्भवाच्च । यत्तु याज्ञवल्क्येनोक्तं—

सर्वस्साक्षी सङ्ग्रहणे चौर्यपारुष्यसाहसे ।

इति, तदपि गुणपरीक्षामात्रनिवृत्त्यर्थमित्यवगन्तव्यम् ।

इति स्मृतिचन्द्रिकायां साक्षिलक्षणानि.

अथ साक्षिभेदाः । तत्र कात्यायनः—

लेख्यारूढश्चोत्तरश्च साक्षी मार्गद्वयान्वितः ।

इति । प्रजापतिरपि—

साक्षी द्विभेदो विज्ञेयः कृत एकोऽपरोऽकृतः ।
लेख्यारूढः कृतो ज्ञेय उत्तरोऽकृत उच्यते ॥

लेख्यारूढो लिखितादिरित्यर्थः । तथाच नारदः—

लिखितस्स्मारितश्चैव यदृच्छाभिज्ञ एव च ।
गूढश्चोत्तरसाक्षी च साक्षी पञ्चविधस्स्मृतः ॥

तथा अकृतसाक्षिभेदोपि तेनैव दर्शितः—

अकृतष्षड्विधस्साक्षी सूरिभिः परिकीर्तितः ।
ग्रामश्च प्राड्विवाकश्च राजा च व्यवहारिणाम् ॥
कार्येष्वभ्यन्तरो यस्स्यादर्थिना प्रहितश्च यः ।
कुल्याः कुलविवादेषु भवेयुस्तेऽपि साक्षिणः ॥

इति । तत्र तावत्कृतानां लक्षणमाह बृहस्पतिः—

जातिनामादि लिखितं येन स्वं पित्र्यमेव च ।
निवासश्च स विज्ञेयः साक्षी लिखितसंज्ञिकः ॥
आहूय यः कृतस्साक्षी ऋणन्यासक्रियादिके ।
स्मार्यते च मुहुर्यश्च स्मारितस्स उदाहृतः ॥
क्रियमाणे तु कर्तव्ये यः कश्चित्स्वयमागतः ।
अत्र साक्षी त्वमस्माकमुक्तो यादृच्छिकस्तु सः ॥

कुड्यव्यवहितो यस्तु श्राव्यते ऋणिभाषितम् ।
विनिष्कृते तथाभूत * गूढसाक्षी स उच्यते ॥
यत्र साक्षी दिशं गच्छन् मुमूर्षुर्वा यथाश्रुतम् ।
अन्यं संश्रावयेत्तं तु विद्यादुत्तरसाक्षिणम् ॥

इति । लिखिते तु विशेषमाह हारीतः—

सुदीर्घेणापि कालेन लिखितस्सिद्धिमाप्नुयात् ।
आत्मनैव लिखेज्जानन्नज्ञस्त्वन्येन लेखयेत् ॥

यत्पुनस्तेनैवोक्तं—

आष्टमाद्वत्सरात्सिद्धिस्स्मारितस्येह साक्षिणः ।
आपञ्चमात्तथा सिद्धिर्यदृच्छोपगतस्य च ॥
आतृतीयात्तथा वर्षात् सिद्धिर्गूढस्य साक्षिणः ।
आ वत्सरात्तु सिद्धिं च वदन्त्युत्तरसाक्षिणः ॥

इति, तत्पूर्वपक्षत्वेनाभिहितमित्यवगन्तव्यम् । यतोऽनन्तरमाह स एव—

अथवा कालनियमो न दृष्टस्साक्षिणं प्रति ।
स्मृत्यपेक्षं हि साक्षित्वमाहुश्शास्त्रविदो जनाः ॥
यस्य नोपहता बुद्धिः स्मृतिश्श्रोतुश्च साक्षिणः ।
सुदीर्घेणापि कालेन स साक्षी साक्ष्यमर्हति ॥

इति । बृहस्पतिनाऽप्यकृतसाक्षिणो निरूपिताः—

घातितं मुषितं यत्र सीमायाश्च समन्ततः ।

* विनिह्नुते तथा भूतं. पा.

अकृतोपि भवेत्साक्षी ग्रामस्तत्र न संशयः ॥
निर्णीते व्यवहारे तु पुनर्न्यायो यदा भवेत् ।
अध्यक्षस्सभ्यसहितः साक्षी स्यात्तत्र नान्यथा ॥
अर्थिप्रत्यर्थिनोर्वाक्यं यच्छ्रुतं भूभृता स्वयम् ।
स एव तत्र साक्षी स्याद्विसंवादे द्वयोरपि ॥
उभाभ्यां यत्र विश्वस्तं कार्यं चापि निवेदितम् ।
गूढधारी स विज्ञेयः कार्यमध्यगतस्तथा ॥
अर्थिप्रत्यर्थिवचनं शृणुयात्प्रेषितस्तु यः ।
उभयोस्संमतस्साधुर्दूतकस्स उदाहृतः ॥
विभागादावपि ऋणे ज्ञातिर्यत्रोपयुज्यते ।
द्वयोस्समानो धर्मज्ञः कुल्यस्स परिकीर्तितः ॥

इति । यत्पुनस्तेनोक्तं—

लिखितो लेखितो गूढः स्मारितः कुल्यदूतकौ ।
याटच्छिकश्चोत्तरश्च कार्यमध्यगतोऽपरः ॥
नृपोऽध्यक्षस्तथा ग्रामस्साक्षी द्वादशधा स्मृतः ।

इति, तल्लिखितस्यावान्तरभेदं स्वनामादिलिपिकर्तृत्वकारयितृत्वरूपमाश्रित्योक्तम् ।

एकादशविधस्साक्षी शास्त्रे दृष्टो मनीषिभिः ।

इति नारदेनानादृत्योक्तम् ॥

इति स्मृतिचन्द्रिकायां साक्षिभेदाः.

अथासाक्षिभेदाः । तत्र नारदः—

असाक्ष्यपि हि निर्दिष्टः शास्त्रे पञ्चविधो बुधैः ।
वचनाद्दोषतो भेदात् स्वयमुक्तिर्मृतान्तरः ॥

असाक्षित्वहेतूनां पञ्चविधत्वात्तद्वशेनासाक्ष्यपि पञ्चविधो बुधैर्निर्दिष्ट इत्यर्थः । अत एव सङ्ग्रहकारः—

दुष्टत्वात्प्रतिषिद्धत्वादकृतत्वादनिश्चयात् ।
एकाङ्गविकलत्वाच्च स्यादसाक्ष्यपि पञ्चधा ॥
स्तेनादिश्श्रोत्रियादिश्च स्वयंभूर्भिन्नगीर्मिथः ।
मुमूर्षुश्श्रावितादन्यः पञ्चमस्स्यान्मृतान्तरः ॥

इति । दुष्टत्वादसाक्षी स्तेनादिः, प्रतिषिद्धत्वाच्छ्रोत्रियादिः । अकृतत्वात स्वयंभूः, अनिश्चयात् मथोभिन्नगीः, एकाङ्गविकलत्वात् मृतान्तर इत्यर्थः । नारदोपि—

स्तेनास्साहसिकाश्चण्डाः कितवा वधकास्तथा ।
असाक्षिणस्ते दुष्टत्वात्तेषु सत्यं न विद्यते ॥
श्रोत्रियास्तापसा वृद्धा ये च प्रव्रजितादयः ।
असाक्षिणस्ते वचनान्नात्र हेतुरुदाहृतः ॥
स्वयमुक्तिरनिर्दिष्टस्स्वयमेवैत्य यो वदेत् ।
सूचीत्युक्तस्स शास्त्रेषु न स साक्षित्वमर्हति ॥
राज्ञा परिगृहीतेषु साक्षिष्वेकार्थनिश्चये ।
वचनं यत्र भिद्येत ते स्युर्भेदादसाक्षिणः ॥

योऽर्थश्श्रावयितव्यस्स्यात्तस्मिन्नसति चार्थिनि ।
क्व तद्वदतु साक्षित्वमित्यसाक्षी मृतान्तरः ॥

इति । सूची सूचकः । योऽर्थ इत्यस्यायमर्थः—अस्मिन्नर्थे मयाऽसौ साक्षी कृत इति योऽर्थोऽर्थिना स्वस्यास्थिरत्वं मन्वानेन श्रावयितव्यः पुत्रादेर्ज्ञापयितव्यः, तस्मिन्नर्थे असत्यज्ञापितेऽर्थिनि चासति मृते, तत्साक्षित्वमर्थिना कृतं साक्षित्वमर्थी पुत्रादिः क्व कस्मिन्नर्थे कस्य पुरुषस्य प्रमाणोक्तिकाले वदत्वित्यनवधृतेरसाक्षी मृतान्तर इति । अर्थिग्रहणं प्रत्यर्थिनोऽप्युपलक्षणार्थम् । अत एव व्यासः—

अर्थी यत्र न विद्येत तत्र साक्षी मृतान्तरः ।
प्रत्यर्थी वा मृतो यत्र तत्राप्येवं प्रकल्पयेत् ॥

अर्थिनि प्रत्यर्थिनि वा मृते तदीयस्साक्षी मुमूर्षुश्राविताद्न्यो मृतान्तर इत्यर्थः ।

मृतान्तरोऽर्थिनि प्रेते मुमूर्षुश्राविताहते ॥

इति नारदस्मरणात् । मुमूर्षुग्रहणं स्वस्थस्याप्युपलणार्थम् । अत एव स्मृत्यन्तरं—

श्रावितोऽनातुरेणापि यस्त्वर्थो धर्मसंहितः ।
मृतेऽपि तत्र साक्षी स्यात् षट्सु त्वन्वाहितादिषु ॥

एवंच यदुक्तं स्मृत्यन्तरं—

न्यासान्वाहितविक्रीते हृते दत्तेऽथ याचिते ।
मुमूर्षुश्राविततर्णे च पृच्छेत्साक्ष्यं मृतान्तरम् ॥

इति, तच्छ्रावितस्य साक्षित्वं मृतेऽपि श्रावितेऽर्थिनि नापैतीति ज्ञापनार्थं, न पुनर्मृतान्तरस्यापि क्वचित्साक्षित्वविधानार्थमित्यवगन्तव्यम् । मृतान्तरस्य साक्षित्वासम्भवात् । यथा श्रावितस्य साक्षित्वं नापगतं तथा साक्षिद्वैधेऽप्युत्कृष्टकोटेस्साक्षित्वमक्षतमेव । तथाच याज्ञवल्क्यः—

द्वैधे बहूनां वचनं समेषु गुणिनां तथा ।
गुणिद्वैधे तु वचनं ग्राह्यं ये गुणवत्तराः ॥

सङ्ग्रहकारस्त्वस्यार्थमाह—

बहुत्वेन गुणानां वा तारतम्येन निश्चयः ।
साक्षिविप्रतिपत्तौ स्यात् सर्वसाम्ये प्रमाणता ॥

अनिश्चयादसाक्षित्वं कोट्योः विशेषाग्रहण एवेत्यर्थः । यत्तु कात्यायनेनोक्तं—

साक्षिणां लिखितानां तु निर्दिष्टानां च वादिना ।
तेषामेकोऽन्यथावादी भेदात्सर्वे न साक्षिणः ॥

इति, तत्र सर्वशब्देनान्यथावादिसहितानामेव बहूनामसाक्षित्वमुक्तं न पुनः केवलानामित्यवगन्तव्यं, अन्यथा द्वैधे बहूनां वचनमित्यादिवचनविरोधात् । तथा स्वयमुक्तित्वेनासाक्षित्वं मा भूदिति येन केनचित्साक्षिनिर्देशो न कार्य इत्याह स एव—

अन्येन हि कृतस्साक्षी नैवान्यस्तं विवादयेत् ।
तदभावे नियुक्तो वा बान्धवो वा विवादयेत् ॥

अर्थी तदीयो वा साक्षिणं निर्दिशेन्नान्य इत्यर्थः । एवंचान्येन निर्दिष्टोऽनिर्दिष्टवदेवासाक्षीत्यवगन्तव्यम् । अत्र प्रसङ्गादन्यदपि किंचिदुक्तं नारदेन—

> द्वयोर्विवदतोरर्थे द्वयोस्सत्सु च साक्षिषु ।
> पूर्वपक्षो भवेद्यस्य भवेयुस्तस्य साक्षिणः ॥
> आधर्यं पूर्वपक्षस्य यस्मिन्नर्थवशाद्भवेत् ।
> विवादे साक्षिणस्तत्र प्रष्टव्याः प्रतिवादिनः ॥

इति । अत्रोदाहरणं—यत्रैकं क्षेत्रं प्रतिग्रहेण प्राप्य भुक्त्वा त्यक्त्वा देशान्तरं सकुटुम्बो गतः, पुनरन्येन लब्धं भुक्तं च, सोपि देशविभ्रमादिना देशान्तरं सकुटुम्बो गतः । पुनस्तौ द्वावपि चिरंतनकालापगमे स्ववृत्तिलोभेन स्वस्थानमागत्य क्षेत्रविवादे निर्णयार्थं धर्मस्थानं युगपदागतौ, तत्रैकः प्रतिजानीते—जयतिचन्द्राख्येन राज्ञा स्वराज्यकाले मह्यं दत्तमिदमस्मदीयमेवैतत् क्षेत्रमिति । इतरोपि प्रतिजानीते—हरिचन्द्राख्येन राज्ञा जयतिचन्द्राख्यसुतेन राज्यार्थमभिषिक्तेन मह्यं दत्तमस्मदीयमेवैतत् क्षेत्रमिति । अथवा इतरस्यैवं प्रतिज्ञा—सत्यं जयतिचन्द्रेणास्मै दत्तं किंत्वेतस्य हस्ताद्धरिचन्द्रेण तत् क्षेत्रं क्रयेण गृहीत्वा मह्यं दत्तमिदमस्मदीयमेवेति, सन्ति च द्वयोरपि विवादिनोस्साक्षिणः । तत्रेदमुक्तं—'द्वयोर्विवदतोरर्थे' इति । अयमर्थः—यस्य विवदमानस्य पूर्व-

पक्षो भवेत् पूर्वकालिकस्य दानस्य स्वत्वहेतुतयोपन्यासेन पक्षो भवेत् तस्य साक्षिणस्सभ्यैः प्रष्टव्या भवेयुर्नेतरस्य साक्षिणः, तेषामुत्तरकालदानसाक्षित्वेनासाक्षिप्रायत्वात् । यदा पुनरितरप्रतिज्ञातार्थवशेनैतस्य हस्तात् क्रीत्वा मह्यं दत्तमित्यादिना पूर्वदानोपन्यासपक्षस्याधर्यमाकिंचित्करत्वं भवेत् तदा पश्चात् प्रतिजानानस्य साक्षिणः प्रष्टव्याः । न पूर्वं प्रतिजानानस्य, सिद्धसाध्यत्वेन वैयर्थ्यात् । किंत्वसाक्षिवदुपेक्षणीयास्त इति ॥

इति स्मृतिचन्द्रिकायामसाक्षिभेदाः.

अथ साक्ष्युद्भावनम्—तत्र गौतमः—'विप्रतिपत्तै साक्षिनिमित्ता सत्यव्यवस्था' इति । तेनोत्तरानन्तरमार्थिना साक्षिणस्सन्ति चेन्निर्देष्टव्या इत्यभिप्रायः । ते च निर्दिष्टास्सदोषाश्चेद्दूषयितव्याः । तथा च बृहस्पतिः—

साक्षिणोऽर्थिसमुद्दिष्टान् सत्सु दोषेषु दूषयेत् ।
अदुष्टान दूषयन्वादी तत्समं दण्डमर्हति ॥

तत्समो दुष्टसाक्षिदण्डसमः । यैर्द्वेष्यत्वादिहेतुभिरसाक्षित्वमुक्तं ते साक्षिदोषाः । ते यद्यर्थिनिर्दिष्टसाक्षिषु निगूढास्सन्ति तदा प्रत्यर्थिना प्रख्यापनीया इत्यर्थः । यदि पुनः प्रकटास्सन्ति तदा सभ्यैरेव वक्तव्याः । तथा च कात्यायनः—

प्रमाणस्य हि ये दोषा वक्तव्यास्ते विवादिना ।
गूढास्तु प्रकटास्सभ्यैः काले शास्त्रप्रदर्शनात् ॥

प्रमाणस्य प्रमाणतया निर्दिष्टस्य काले निर्णयकाले इत्यर्थः। तथा च बृहस्पतिः—

साक्षिभिर्गदितैस्सभ्यैः प्रक्रान्ते निर्णये तु यः ।
पुनर्विवादं कुरुते तस्य राजा विचारयेत् ॥

गदितैरर्थिनिर्दिष्टैः प्रकटदोषरहितैः साक्षिभिर्निर्णये प्रक्रान्त इत्यर्थः। प्रक्रान्तग्रहणं निर्णयादूर्ध्वं दूषणाभिधानकाल इति प्रतिपादनार्थम्। अत एव कात्यायनः—

लेख्यदोषास्तु ये केचित् साक्षिणां चैव ये स्मृताः ।
वादकाले तु वक्तव्याः पश्चादुक्तान्न दूषयेत् ॥

उक्तात्पश्चाद्दूषयतो दण्डमाह स एव—

उक्तेऽर्थे साक्षिणो यस्तु दूषयेत् प्रागदूषितान् ।
न च तत्कारणं ब्रूयात् प्राप्नुयात् पूर्वसाहसम् ॥

तथा मिथ्यादोषेण गृहस्थत्वादिगुणाभावेन वा न दूषयेदित्याह स एव—

नातथ्येन प्रमाणं तु दोषेणैव तु दूषयेत् ।
मिथ्याभियोगे दण्डस्स्यात् साध्यार्थाच्चापि हीयते ॥

दोषेणैव तु दूषयेत् न तु गुणाभावेन, तस्य वचनप्रामाण्यविघातकारित्वाभावादित्यभिप्रायः। अत एवापदि गुणर-

हितस्यापि निषिद्धेतरस्य ऋणादौ साक्षित्वमुक्तम् । अतो न गुणाभावोद्भावनमात्रेण ऋणादौ निर्दिष्टसाक्षिणामसाक्षित्वसिद्धिः, किन्तु दासत्वादिनिषिद्धनिमित्तोद्भावनेनेत्यवगन्तव्यम् । साहसादौ न तेनापि, किन्त्वज्ञत्वासत्यशीलत्वादिदोषोद्भावनेनैवेत्यनुसन्धेयम् । अत एव व्यासेनापि दोषोद्भावनेनैवासाक्षित्वमुक्तम्—

साक्षिदोषाः प्रयोक्तव्याः संसदि प्रतिवादिना ।
पत्रे विलिख्य तान् सर्वान् वाच्याः प्रत्युत्तरं तु ते ॥
प्रतिपत्तौ न साक्षित्वमर्हन्ति तु कदा चन ।
अतोऽन्यथा भावनीयाः क्रियया प्रतिवादिना ॥

इति । प्रतिपत्तिर्दोषाङ्गीकारः । क्रियया साक्षिव्यतिरिक्तयेति शेषः । तथाच स एव—

अन्यैस्तु साक्षिभिस्साध्ये दूषणे पूर्वसाक्षिणाम् ।
अनवस्था भवेद्दोषः तेषामप्यन्यसम्भवात् ॥

एवं प्रतिवादिना दूषणप्रतिपादनं न प्रकटे दूषणे कार्यं, वैयर्थ्यात् । किन्तु सभ्यैरेव तथाविधदूषणं ग्राह्यमित्याह स एव—

सभासदां प्रसिद्धं यल्लोकसिद्धमथापि वा ।
साक्षिणां दूषणं ग्राह्यमसाध्यं दोषवर्णनात् ॥

ग्राह्यं परीक्षकैरिति शेषः । असाध्यं च प्रतिवादिना तत्र

दूषणं, प्रसिद्धदोषादूर्जनसिद्धेरित्यर्थः । यत्र पुनरप्रसिद्धं दूषणं कीर्तितं तत्र तदसाधयतो दण्डमाह स एव—

असाधयन् दमं दाप्यः प्रत्यर्थी साक्षिणः स्फुटम् ।
भाविताऽस्साक्षिणो वर्ज्यास्साक्षिधर्मनिराकृताः ॥

स्फुटं यथा भवति तथा साक्षिदोषमसाधयन्नित्यर्थः । दोषत्वेन साधिताः साक्षिणो वर्ज्याः, न तु दण्ड्या इत्यभिप्रायः । वर्जितेषु साक्षिषु यद्यर्थी प्रमाणान्तरं प्रति निराकाङ्क्षस्तदाऽसौ जितो दण्ड्य इत्याह स एव—

जितस्य विनयं दाप्यः शास्त्रदृष्टेन कर्मणा ।
यदि वादी निराकाङ्क्षः साक्षिसभ्येष्ववस्थितः ॥

निराकाङ्क्षः प्रमाणान्तरं प्रतीति शेषः । यदा तु साकाङ्क्षः तदा मानुषाभावे दिव्येनापि जयावधारणं कार्यमित्यभिप्रायः । यदा तु निर्दोषिणः साक्षिणो भवेयुस्तदा तैरेव जयावधारणं कार्यम् । तथा च बृहस्पतिः—

साक्षिणां दूषणे कार्यं पूर्वं साक्षिविशोधनम् ।
शुद्धेषु साक्षिषु ततः पश्चात्कार्यं विशोधयेत् ॥

ततः शुद्धसाक्षिभ्य इत्यर्थः । अनेन पूर्वव्यवहारमध्य एव प्रमाणदोषविवादनिर्णयः कार्यः । न पुनर्व्यवहारान्तरनिर्णयवत् पूर्वव्यवहारसमाप्त्यनन्तरकाल इत्युक्तम् । न च व्यवहारमध्ये व्यवहारान्तरनिर्णयस्यानुचितत्वादयुक्तमिति वा-

च्यम् । प्रमाणदोषविवादनिर्णयस्य पूर्वव्यवहारशेषत्वेन तत्रैव कार्यत्वात्, पृथक्फलाभावेन व्यवहारान्तरत्वाभावाच्च । तथा च स एव—

लेख्यं वा साक्षिणो वाऽपि विवादे यस्य दूषिताः ।
तस्य कार्यं न सिध्येत्तु यावत्तन्न विशोधयेत् ॥

व्यासोपि—

अन्तरप्रभवो वादः सर्वसाक्षिसमुद्भवः ।
न याति निर्णयं यावत्तावत्पूर्वं विवर्जयेत् ॥
प्रत्यार्थिनोऽर्थिनो वाऽपि साक्षिदूषणसाधने ।
न तु साक्ष्यभियोगस्स्याद्व्यवहारान्तरं तथा ॥

इति । अतः प्रमाणदोषविवादनिर्णयः पूर्वव्यवहारमध्य एव कर्तव्य इति स्थितम्.

इति स्मृतिचन्द्रिकायां साक्ष्युद्भावनम्.

अथ साक्षिपरीक्षा । तत्र कात्यायनः—

राजा क्रियां समाहूय यथान्यायं विचारयेत् ।
लेख्याचारेण लिखितं साक्ष्याचारेण साक्षिणः ॥

इति । साक्ष्याचारेण साक्षिलक्षणजातेनेत्यर्थः । अत्र बृहस्पतिः—

प्रष्टव्याः साक्षिणो ये तु वर्ज्याश्चैव नराधमाः ।
तानहं कथयिष्यामि सांप्रतं शास्त्रचोदितान् ॥

तत्र तावत् प्रष्टव्यानाह—

श्रौतस्मार्तक्रियायुक्ताः लोभद्वेषविवर्जिताः ।
कुलीनास्साक्षिणोऽनिन्द्यास्तपोदानदयान्विताः ॥

इति । तथा वर्ज्यानप्याह—

मातुः पिता पितृव्यश्च भार्याया भ्रातृमातुलौ ।
भ्राता सखा च जामाता सर्ववादेष्वसाक्षिणः ॥
परस्त्रीपानसक्ताश्च कितवाः पूर्वदूषिताः ।
उन्मत्तार्तास्साहसिका नास्तिकाश्च न साक्षिणः ॥

इति । एतच्च साक्ष्यसाक्ष्यभिधानं मनुनारदादिभिरुक्तानां साक्षिणामसाक्षिणां च प्रदर्शनार्थम् । अत एव शास्त्रचोदितानित्युक्तम् । तथा स्वरादितोऽपि साक्षिणः परीक्ष्या इत्याह स एव—

उपस्थिताः परीक्ष्यास्स्युः स्वरवर्णेङ्गितादिभिः ॥

इति । तत्र ये निर्विकारास्ते वस्तुतः साक्षिणो भवन्ति । ये पुनस्सविकारास्ते कूटसाक्षिण इत्यवगन्तव्यम् । अत एव मनुः—

बालवृद्धातुराणां तु साक्ष्येषु वदतां मृषा ।
जानीयादस्थिरां वाचमुत्सिक्तमनसां तथा ॥

उत्सिक्तमनसामधीराणाम् । विष्णुरपि—'स्वभावाद्विकृतौ मुखवर्णविनाशे चासम्बन्धप्रलापे कूटसाक्षिणं विद्यात्' इति । नारदोऽपि—

यस्त्वात्मदोषदुष्टत्वादस्वस्थ इव लक्ष्यते ।
स्थानात् स्थानान्तरं गच्छेदेकैकं चानुधावति ॥
कासत्यकस्माच्च भृशमभीक्ष्णं निश्वसत्यपि ।
विलिखत्यवनीं पद्भ्यां बाहू वासश्च धूनयेत् ॥
भिद्यते मुखवर्णोऽस्य ललाटं स्विद्यते तथा ।
शोषमागच्छतश्चौष्ठावूर्ध्वं तिर्यक्च वीक्षते ॥
त्वरमाण इवात्यर्थमपृष्टो बहु भाषते ।
कूटसाक्षी स विज्ञेयः तं पापं विनयेद्भृशम् ॥

इति । याज्ञवल्क्योऽपि—

देशाद्देशान्तरं याति सृक्किणी परिलेढि च ।
ललाटं स्विद्यते यस्य मुखं वैवर्ण्यमेति च ॥
परिशुष्यत्स्खलद्वाक्यो विरुद्धं बहु भाषते ।
वाक्चक्षुः पूजयति नो तथौष्ठौ निर्भुजत्यपि ॥
स्वभावाद्विकृतिं गच्छेत् मनोवाक्कायकर्मभिः ।
अभियोगे च साक्ष्ये च दुष्टस्स परिकीर्तितः ॥

इति । एवं च दुष्टचिह्नविहीनाः साक्षिलक्षणलक्षिताश्च साक्षिणो यद्युपस्थितास्तदा तैर्निर्णेतव्यम् । अथ विपरीतास्तदा प्रमाणान्तरेणेत्यनुसन्धेयम् ।

इति स्मृतिचन्द्रिकायां साक्षिपरीक्षा.

अथ साक्ष्यनुयोजनविधिः । तत्र मनुः—

सभान्तस्साक्षिणस्सर्वानर्थिप्रत्यर्थिसंनिधौ ।
प्राड्विवाकोऽनुयुञ्जीत विधिनाऽनेन सान्त्वयन् ॥

अनेन वक्ष्यमाणेन विधिना सर्वान् साक्षिणोऽनुयुञ्जीत यथार्थकथनोन्मुखान् कुर्वीतेत्यर्थः । तमेव विधिं दर्शयति—

यद्द्वयोरनयोर्वेत्थ कार्येऽस्मिन् चेष्टितं मिथः ।
तद्ब्रूत सर्वं सत्येन युष्माकं ह्यत्र साक्षिता ॥
समक्षदर्शनात्साक्ष्यं श्रवणाच्चैव सिध्यति ।
तत्र सत्यं ब्रुवन् साक्षी धर्मार्थाभ्यां न हीयते ॥
सत्यं साक्ष्ये ब्रुवन् साक्षी लोकानाप्नोति पुष्कलान् ।
इह चानुत्तमां कीर्तिं वागेषा ब्रह्मपूजिता ॥
ब्राह्मणो वा मनुष्याणामादित्यस्तेजसामिव ।
शिरो वा सर्वगात्राणां धर्माणां सत्यमुत्तमम् ॥
सत्येन पूयते साक्षी धर्मस्सत्येन वर्धते ।
तस्मात्सत्यं हि वक्तव्यं सर्ववर्णेषु साक्षिभिः ॥
यस्य विद्वान् हि वदतः क्षेत्रज्ञो नातिशङ्कते ।
तस्मान्न देवाः श्रेयांसं लोकेऽस्मिन् पुरुषं विदुः ॥

इति । ब्राह्मणो वा ब्राह्मण इवेत्यर्थः । एवं शिरो वेत्यत्रापि वाशब्द उपमानार्थोऽवगन्तव्यः । यस्य साक्ष्यं वदतः साक्षिणः विद्वान् क्षेत्रज्ञो नातिशङ्कते, तस्मात् श्रेयां-

समस्मिन् लोके देवा न विदुरित्यन्त्यश्लोकस्यार्थः। नारदोपि—

सत्यमेव परं दानं सत्यमेव परं तपः।
सत्यमेव परो धर्मो लोकानामिति नः श्रुतिः ॥
सत्यं देवास्समासेन मनुष्यास्त्वनृतं स्मृतम् ॥
इहैव तस्य देवत्वं यस्य सत्ये स्थिता मतिः ॥
नास्ति सत्यात्परो धर्मो नानृतात्पातकं परम्।
साक्षिधर्मे विशेषेण सत्यमेव वदेदतः ॥

इति। व्यासोपि—

साक्षिभावे नियुक्तानां देवता वियति स्थिताः।
पितरश्चावलम्बन्ते वितथाख्यानशङ्कया।
सत्यवाक्यैर्व्रजन्त्यूर्ध्वमधो यान्त्यन्यथाकृते।
तस्मात्सत्यं प्रवक्तव्यं भवद्भिस्सभ्यसंनिधौ ॥

इति। मनुरपि—

साक्ष्येऽनृतं वदन् पाशैर्बध्यते वारुणैर्नरः।
विवशश्शतमा जातीस्तस्मात्साक्षी वदेदृतम्।
आत्मैव ह्यात्मनस्साक्षी गतिरात्मा तथाऽऽत्मनः।
माऽवमंस्थास्त्वमात्मानं नृणां साक्षिणमुत्तमम्।
मन्यन्ते वै पापकृतो न कश्चित्पश्यतीति नः।
तांस्तु देवाः प्रपश्यन्ति यस्यैवान्तरपूरुषाः।

द्यौर्भूमिरापो हृदयं चन्द्रार्काग्नियमानिलाः ।
रात्रिस्सन्ध्या च धर्मश्च वृत्तज्ञाः सर्वदेहिनाम् ॥

इति । शतमा जातीः शतं यावज्जन्मानि । नारदोपि—

कुबेरादित्यवरुणशक्रवैवस्वतादयः ।
पश्यन्ति लोकपालाश्च नित्यं दिव्येन चक्षुसा ॥

तेन वञ्चनाऽपि न सुकरेत्यभिप्रायः । उचथ्योपि—

यस्साक्षी कौटसाक्ष्यं तु विवदेद्भुवि निर्भयः ।
उभयोस्सप्त गोत्राणामधस्तान्नयति ध्रुवम् ॥
सप्तजन्मकृतं पापं शरीरे यत्तु तिष्ठति ।
गृह्णाति तस्य सर्वस्वं यस्तु साक्ष्यं मृषा वदेत् ॥

इति । बृहस्पतिरपि—

कूटसभ्यः कूटसाक्षी ब्रह्महा च समाः स्मृताः ।
भ्रूणहा वित्तहा चैषां नाधिकस्समुदाहृतः ॥

मनुरपि—

साक्षी दृष्टश्रुतादन्यद्विब्रुवन्नार्यसंसदि ।
अवाङ्नरकमभ्येति प्रेत्य स्वर्गाच्च हीयते ॥

वसिष्ठोपि—

अथ चेदनृतं ब्रूयात् सर्वतोऽमेध्यभक्षणम् ।
मृतो नरकमायाति तिर्यग्गच्छेत्त्वनन्तरम् ॥

अमेध्यभक्षणयुतं नरकं मृतो गच्छतीत्यर्थः । कात्यायनोऽपि—

कालपाशावृतग्रीवं मुद्गराहतिविह्वलम् ।
क्रुद्धः कण्टकिनीं भूमिं तं नयेद्यमकिङ्करः ॥
असिपत्रवनाघातशल्यालिङ्गनातुराः ।
पूयशोणितसंपूर्णां नदीं पास्यन्ति दारुणाम् ॥

इति । कालपाशावृतग्रीवं कृष्णायसपाशबद्धग्रीवम् । नारदोपि—

निरयेषु च ते श्वजिह्वामुत्कृत्य दारुणाः ।
असिभिश्शातयिष्यन्ति बलिनो यमकिङ्कराः ॥
शूले मत्स्यानिवाक्षिप्य क्रोशन्तमपरायणम् ।
अवाक्शिरसमुत्क्षिप्य क्षेप्स्यन्त्यग्नौ ह्रदेषु च ॥
लोहयन्त्रादिपीडाभिः क्षुत्पिपासासुविह्वलः ।
प्रक्षिप्यते तथा घोरे नरके संप्रतापने ॥

इति । उशनाऽपि—

लोहगृध्रमुखोत्खातलोचनार्द्रीकृताननाः ।
पतिष्यन्त्यन्धतामिस्रे नरके पापमोहिताः ॥

पितामहोपि—

गृहान्ततप्तसंदंशजिह्वात्रोटनमूर्छितम् ।
किङ्कराः पातयिष्यन्ति महारौरवरौरवे ॥

व्यासोपि—

बध्यन्ते वारुणैः पाशैः साक्षिणोऽनृतवादिनः ।
षष्टिं वर्षसहस्राणि तिष्ठन्ति नरके ध्रुवम् ॥

तेषां वर्षशते पूर्णे पाश एकः प्रमुच्यते ।
कालेऽतीते मुक्तपाशः तिर्यग्योनिषु जायते ॥

इति । नारदोपि—

अपि चेन्नरके कल्पं वसेयुः कूटसाक्षिणः ।
परवित्तहरा ये च राजानश्चाप्यधार्मिकाः ॥
अनुभूय च दुःखार्ताः चिरं नरकवेदनाम् ।
इहायास्यन्त्यभव्यासु गृध्रकाकादियोनिषु ॥

इति । वसिष्ठोपि—

सूकरो दशवर्षाणि शतवर्षाणि गर्दभः ।
श्वा वै द्वादशवर्षाणि भासो वर्षाणि विंशतिः ॥
क्रिमिकीटपतङ्गेषु चत्वारिंशत्तथैव च ।
मृगस्तु दशवर्षाणि जायते मानवः स्मृतः ॥
मानुष्यं तु यदाप्नोति मूकोऽन्धश्च भवेत्तु सः ।
दारिद्र्यं तु भवेत्तस्य पुनर्जन्मनिजन्मनि ॥

इति । व्यासोपि—

मानवो जायते पश्चात् सम्परित्यक्तबान्धवः ।
पङ्ग्वन्धबधिरो मूकः कुष्ठी नग्नः पिपासितः ॥
बुभुक्षितश्शत्रुगृहे भिक्षते भार्यया सह ।
ज्ञात्वा त्वनृततो दोषान् ज्ञात्वा सत्ये च सद्गुणान् ॥
श्रेयस्करमिहामुत्र सत्यं साक्ष्ये वदेदतः ।

इति। एवं सम्बोधनमेतैरेव वचनैः कार्यं, न पुरुषान्तररचितैः। यत आह नारदः—

पौराणैर्धर्मवचनैः सत्यमाहात्म्यकीर्तनैः।
अनृतस्यापवादैश्च भृशमुत्त्रासयेदपि॥

इति। आर्षैस्सस्तुतिकसत्यवादविधिवचनैः साक्षिणां प्रोत्साहनम्, अनृतप्रतिषेधवचनैः दुरितापूर्वफलसहितैरत्यर्थं भीषणमपि कुर्यादित्यर्थः॥

इति स्मृतिचन्द्रिकायां साक्ष्यनुयोजनविधिः.

अथ साक्ष्यप्रश्नविधिः। तत्र मनुः—

देवब्राह्मणसान्निध्ये साक्ष्यं पृच्छेदृतं द्विजान्।
उदङ्मुखान् प्राङ्मुखान्वा पूर्वाह्णे वै शुचिश्शुचीन्॥

द्विजानिति साक्षिपुरुषोपलक्षणार्थम्, उपात्तविशेषणत्वात्। अत एव नारदः—

आहूय साक्षिणः पृच्छेन्नियम्य शपथैर्भृशम्।
समस्तान्विदिताचारान्विज्ञातार्थान् पृथक्पृथक्॥

भयावहैश्शपथैस्सत्यनिष्ठान् कृत्वा प्रत्येकं पृच्छेदित्यर्थः। ते च शपथास्तेन दर्शिताः—

सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः।
गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः॥

सत्यादीष्टविघातोपदर्शनेन विप्रादीन्, वक्ष्यमाणानिष्टापत्तिदर्शनेन शूद्रं शापयेदित्यर्थः । प्रश्ने तु विशेषो मनुना दर्शितः—

ब्रूहीति ब्राह्मणं पृच्छेत् सत्यं ब्रूहीति पार्थिवम् ।

इति । एवंचान्यथा ब्रुवतस्सत्यं ते नश्यति, अतोऽवधार्य ब्रूहीति ब्राह्मणे । क्षत्रिये तु अन्यथावदतस्तव वाहनायुधानि विफलानि भविष्यन्ति, अतोऽवधार्य सत्यं ब्रूहीति प्रश्नोऽवगन्तव्यः । वैश्ये तु प्रश्ने विशेषास्मृतेः गोबीजकाञ्चनैर्वियोगस्स्यात् यद्यन्यथा ब्रूया इत्येवं शपथेन नियम्य यथाकामं पृच्छेत् । शूद्रे तु प्रश्नवाक्यप्रकारो मनुना प्रपञ्चितः—

ब्रह्मघ्नो ये स्मृता लोकाः ये च स्त्रीबालघातिनः ।
मित्रद्रुहः कृतघ्नस्य ते ते स्युर्वदतो मृषा ॥
जन्मप्रभृति यत्किञ्चित् पुण्यं भद्र त्वया कृतम् ।
तत्ते सर्वं शुनो गच्छेद्यदि ब्रूयास्त्वमन्यथा ॥
एकोऽहमस्मीत्यात्मानं यस्त्वं कल्याण मन्यसे ।
नित्यं स्थितस्ते हृद्येष पुण्यपापेक्षिता मुनिः ॥
यमो वैवस्वतो देवो यस्तवैष हृदि स्थितः ।
तेन चेदविवादस्ते मा गङ्गां मा कुरून् गमः ॥
नग्नो मुण्डः कपालेन भिक्षार्थी क्षुत्पिपासितः ।
आन्धश्शत्रुगृहं गच्छेत् यस्साक्ष्यमनृतं वदेत् ॥
अवाक्छिरास्तमस्यन्धे किल्बिषी नरकं व्रजेत् ।
यत्प्रश्नं वितथं ब्रूयात् पृष्टस्सन् धर्मनिश्चये ॥

अन्धो मत्स्यानिवाश्नाति स नरः कण्टकैस्सह ।
यो भाषतेऽर्थवैकल्यमप्रत्यक्षं सभां गतः ॥
यावतो बान्धवान्यस्मिन् हन्ति साक्ष्येऽनृतं वदन् ।
तावतस्सङ्ख्यया तस्मिन् शृणु सौम्यानुपूर्वशः ॥
पञ्च पश्वनृते हन्ति दश हन्ति गवानृते ।
शतमश्वानृते हन्ति सहस्रं पुरुषानृते ॥
हन्ति जातानजातांश्च हिरण्यार्थेऽनृतं वदन् ।
सर्वं भूम्यनृते हन्ति मा स्म भूम्यनृतं वदीः ॥
अप्सु भूमिवदित्याहुः स्त्रीणां भोगे च मैथुने ।
अब्जेषु चैव रत्नेषु सर्वेष्वश्ममयेषु च ॥
एतान्दोषानवेक्ष्य त्वं सर्वाननृतभाषणे ।
यथाश्रुतं यथादृष्टं सर्वमेवाञ्जसा वद ॥

इति । कुरुः कुरुक्षेत्रम् । अञ्जसा शुद्धेन हृदयेन। अत्र केचित्— 'नग्नो मुण्डः' इत्यादिश्लोकत्रयमपकृष्यानुयोजनविधौ निवेशनीयम्, अन्यथाऽनन्वयस्स्यादिति मन्यन्ते। तदा 'मा कुरून गमः' इत्यभिधानानन्तरं 'यावतो बान्धवान्' इत्याद्यभिधातव्यमित्यगन्तव्यम् । अयं च शूद्रप्रश्नविधिरनापदि हीनवृत्त्युपजीविनां द्विजानामपि भवति, तेषामल्पशपथेन नियन्तुमशक्यत्वात् । अत एव मनुः—

गोरक्षकान्वाणिजकान् तथा कारुकुशीलवान् ।
प्रेष्यान्वार्धुषिकांश्चैव विप्राञ्छूद्रवदाचरेत् ॥

ये व्यपेताः स्वकर्मभ्यः परपिण्डोपजीविनः ।
द्विजत्वमभिकांक्षन्ति तांश्च शूद्रवदाचरेत् ॥

द्विजत्वमभिकाक्षन्तीति वदन्नद्विजातीनामम्बष्ठादीनां शूद्रवदेव प्रश्नविधिं दर्शयति ॥

इति स्मृतिचन्द्रिकायां साक्ष्यप्रश्नविधिः

अथ साक्ष्यवादविधिः । तत्र कात्यायनः—

सभान्तस्थैस्तु वक्तव्यं साक्ष्यं नान्यत्र साक्षिभिः ।
सर्वसाक्ष्येष्वयं धर्मो ह्यन्यत्र स्थावरेषु तु ॥

अन्यत्र स्थावरस्योपरीत्यर्थः । तथा च स एव—

अर्थस्योपरि वक्तव्यं तयोरपि विना क्वचित् ।
चतुष्पदेष्वयं धर्मो द्विपदस्थावरेषु च ॥

तयोः पूर्वोक्तस्थानयोः । ते स्थाने विनाऽपि क्वचिद्द्रव्यरूपविवादे साक्ष्यं वक्तव्यमित्यर्थः । तथा च स एव—

वधे चेत्प्राणिनां साक्ष्यं वादयेच्छिवसान्निधौ ।
तदभावे तु चिह्नस्य नान्यथैव प्रवादयेत् ॥

चिह्नस्य शृङ्गादेः । साक्ष्यवादप्रकारमाह वसिष्ठः—

प्राङ्मुखोऽवस्थितस्साक्षी शपथैश्शापितस्स्वकैः ।
हिरण्यं गोशकृद्दर्भान् तान् संस्पृश्य वदेदृतम् ॥

बृहस्पतिरपि—

विहायोपानदुष्णीषं दक्षिणं पाणिमुद्धरेत् ।
हिरण्यगोशकृद्दर्भान् समादाय ऋतं वदेत् ॥

दक्षिणं पाणिमुद्धरेत् प्रावृतं वस्त्रं यज्ञोपवीतवत् कुर्यादित्यर्थः । ऋतं वदेदित्यस्य क्वचिद्विषयेऽपवादमाह मनुः—

शूद्रविट्क्षत्रविप्राणां यत्रोक्ते तु भवेद्वधः ।
तत्र वक्तव्यमनृतं तद्धि सत्याद्विशिष्यते ॥

बृहस्पतिरपि—

सकृत्प्रमादापराधिविप्रं व्यापादि पीडितम् ।
भटादिभिर्वध्यमानं रक्षेदुक्त्वाऽनृतान्यपि ॥

अपिशब्दादत्राप्यनृतोक्त्या किञ्चित्पापं भवतीति गम्यते । अत एव प्रायश्चित्तमाह याज्ञवल्क्यः—

वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेत् ।
तत्पावनाय निर्वाप्यः चरुस्सारस्वतो द्विजैः ॥

मनुरपि—

वाग्देवत्यैस्तु चरुभिर्यजेरंस्ते सरस्वतीम् ।
अनृतस्यैनसस्तत्र कुर्वाणाः निष्कृतिं पराम् ॥
कूश्माण्डैर्वाऽथ जुहुयात् घृतमग्नौ यथाविधि ।
उदित्यृचा वा वारुण्या तृचेनाब्देवतेन वा ॥

इति । विष्णुरपि—

तत्पावनाय कूश्मण्डीभिर्द्विजोऽग्नौ जुहुयात्,
शूद्रश्चैकाहिकं गोदशकस्य ग्रासं दद्यात् इति ॥

यत्तु गौतमेनोक्तम्—

नानृतवचने दोषो जीवनं चेत्तदधीनम् ।

इति, यदपि व्यासेन—

न नर्मयुक्तं वचनं हिनस्ति न स्त्रीषु नित्यं न विवाहकाले ।
प्राणात्यये सर्वधनापहारे पञ्चानृतान्याहुरपातकानि ॥

इति । तयोरयमर्थः—'साक्षिधर्मे विशेषेण' इत्यादिभिर्वचनै र्यदधिकपातकमुक्तम्, तदत्र नास्तीति । अन्यत्र तु अस्त्येव । तथा च गौतमः—'नासमवेताः पृष्टाः प्रब्रूयुरवचने च दोषिणस्स्युः' इति । चशब्दादनृतवचने चेत्यवगम्यत इत्युक्तं व्याख्यातृभिः । असमवेतप्रतिषेधः समवेतानां साक्षिभाव एव न सर्वत्र । यत आह वसिष्ठः—

समवेतैस्तु यद्दृष्टं वक्तव्यं तु तथैव तत् ।
विभिन्नेनैव यत्कार्यं वक्तव्यं तत्पृथक्पृथक् ॥
भिन्नकाले तु यत्कार्यं ज्ञातं वा यत्र साक्षिभिः ।
एकैकं वादयेत्तत्र विधिरेष प्रकीर्तितः ॥ इति ॥

इति स्मृतिचन्द्रिकायां साक्ष्यवादविधिः.

अथ साक्षिवचोविषयाणि कानिचित् वचनानि लिख्यन्ते । तत्र कात्यायनः—

स्वभावोक्तं वचस्तेषां ग्राह्यं यद्दोषवर्जितम् ।
उक्ते तु साक्षिणो राज्ञा न प्रष्टव्याः पुनःपुनः ॥

स्वभावेनैव यद्ब्रूयुः तद्ग्राह्यं व्यावहारिकम् ।
अतो यदन्यद्विब्रूयुर्धर्मार्थं तदपार्थकम् ॥

नारदोऽप्यपार्थमाह—

निर्दिष्टेष्वर्थजातेषु साक्षी चेत् साक्ष्य आगते ।
न ब्रूयादक्षरसमं न तन्निगदितं भवेत् ॥

साक्ष्य आगते साक्ष्यवादावसरे अक्षरसमं अक्षरानुरूपं पृष्टार्थमिति यावत् । अनेनापृष्टार्थसमर्पकमपार्थमित्युक्तम् । एवं पृष्टार्थन्यूनाधिकार्थं च व्यर्थं, तथा च स एव—

ऊनमभ्यधिकं वाऽर्थं विब्रूयुर्यत्र साक्षिणः ।
तदप्यनुक्तं विज्ञेयमेष साक्षिविधिः स्मृतः ॥

यत्र ऋणादिस्थिरप्रायविवादेष्वित्यर्थः । तथा च कात्यायनः—

ऋणादिषु विवादेषु स्थिरप्रायेषु निश्चितम् ।
ऊने वाऽप्यधिके वाऽर्थे प्रोक्ते साध्यं न सिध्यति ॥

यावत्प्रतिज्ञातार्थसाधनार्थमुद्दिष्टं साक्षिवाक्यमूनाधिकं चेत् संदेहापादकमेव, न पुनः प्रतिज्ञातार्थैकदेशे साधिते वा प्रतिज्ञातार्थे प्रमाणमित्यर्थः । प्रतिज्ञातार्थैकदेशसाधनार्थमुद्दिष्टं साक्षिवाक्यमपि ततो न्यूनाधिकं चेत् एवमेवाप्रमाणमित्येतस्मादेव वचनादवगन्तव्यम्, साध्यं न सिध्यतीति सामान्येनाभिधानात् । अस्थिरकर्मसु पुनः सिध्यत्येव साध्यमित्याह स एव—

साध्यार्थांशेऽपि गदिते साक्षिभिस्सकलं भवेत् ।

स्त्रीसङ्गे साहसे चौर्ये यत्साक्ष्यं परिकल्पितम् ॥

यत्पुनः तेनोक्तम्—

ऊनाधिकं तु यत्र स्यात्तत्साक्ष्यं तत्र वर्जयेत् ।

साक्षी तत्र न दण्ड्यस्स्यादब्रुवन् दण्डमर्हति ॥

इति, तत् स्थिरकर्मविषयम् । एवं निर्दिष्टार्थैकदेशविसंवादेऽपि विफलं साक्षिवचनमित्याह स एव—

देशं कालं धनं संख्यां रूपं जात्याकृती वयः ।

विसंवदेद्यत्र साक्ष्ये तदनुक्तं विदुर्बुधाः ॥

नारदोपि—

देशकालवयोद्रव्यप्रमाणाकृतिजातिषु ।

यत्र विप्रतिपत्तिस्स्यात् साक्ष्यं तदपि विप्लुतम् ॥

एवञ्च—ऋणादौ स्थिरकर्मणि अन्यूनातिरिक्तं पृष्टार्थसमर्पकं साक्षिवचनं प्रमाणं नान्यदित्यनुसन्धेयम् । अत एव व्यासः—

कालाकृतिवयोद्रव्यदेशजातिप्रमाणतः ।

अन्यूनं चेन्निगदितं सिद्धं साक्ष्यं विनिर्दिशेत् ॥

बृहस्पतिरपि—

यत्राशेषः प्रतिज्ञार्थः साक्षिभिः प्रतिवर्णितः ।

स जयी स्यादन्यथा तु साध्यार्थं न समाप्नुयात् ॥

प्रतिवर्णितः सत्यत्वेनेति शेषः । तथा च याज्ञवल्क्यः—

यस्योचुस्साक्षिणस्सत्यां प्रतिज्ञां स जयी भवेत् ।

अन्यथा वादिनो यस्य ध्रुवस्तस्य पराजयः ॥

साक्षिणस्सर्वे यस्य वादिनः प्रतिवादिनो वा प्रतिज्ञां साध्योक्तिं सत्यामूचुरित्यर्थः । यस्य पुनः प्रतिज्ञां केचित् साक्षिणस्सत्यामूचुः, केचित्त्वन्यथा तत्राह मनुः—

बहुत्वं परिगृह्णीयात् साक्षिद्वैधे नराधिपः ।
समेषु च गुणोत्कृष्टान् गुणिद्वैधे द्विजोत्तमान् ॥

नारदोपि—

साक्षिविप्रतिपत्तौ तु प्रमाणं बहवो मताः ।
तत्साम्ये शुचयो ग्राह्याः तत्साम्ये स्मृतिमत्तराः ॥
स्मृतिमत्साक्षिसाम्यं तु विवादे यत्र दृश्यते ।
सूक्ष्मत्वात् साक्षिधर्मस्य साक्ष्यं व्यावर्तयेत्ततः ॥

इति । शुचिग्रहणं गृहस्थत्वादिगुणवतामुपलक्षणार्थम् । अत एव याज्ञवल्क्यः—

द्वैधे बहूनां वचनं समेषु गुणिनां तथा ।
गुणिद्वैधे तु वचनं ग्राह्यं ये गुणवत्तराः ॥

अत्र बृहस्पतिः—

लिखिते साक्षिवादे च सन्देहो जायते यदा ।
अनुमाने च संभ्रान्ते तत्र दैवं विशोधनम् ॥

इति स्मृतिचन्द्रिकायां साक्षिविषयाणि.

अथान्यान्यपि साक्षिविषयाणि कानिचिद्वचनानि लिख्यन्ते.

तत्र याज्ञवल्क्यः—

न ददाति हि यस्साक्ष्यं जानन्नपि नराधमः ।
स कूटसाक्षिणां पापैस्तुल्यो दण्डेन चैव हि ॥

यो विप्रतिपन्नमर्थं परमार्थतो जानन्नपि दौरात्म्यात् साक्ष्यं नाङ्गीकरोति असौ कूटसाक्षिवत्पापी दण्ड्यश्चेत्यर्थः ।

नारदोपि—

श्रावयित्वा ततोऽन्येभ्यः साक्षित्वं यो विनिह्नुते ।
स विनेयो भृशतरं कूटसाक्ष्यधिको हि सः ॥

यदा पूर्वमहं साक्षीति श्रावितः साक्षिणामागमनकाले अहं न साक्षीत्यपलपति असावत्यर्थं दण्ड्य इत्यर्थः । बृहस्पतिरपि—

अहूतो यस्तु नागच्छेत् साक्षी रोगविवर्जितः ।
ऋणं दमं च दाप्यस्स्यात् त्रिपक्षात् परतस्तु सः ॥

वासिष्ठोपि—

यस्साक्षी नैव निर्दिष्टो नाहूतो नैव चोदितः ।
ब्रूयान्मिथ्येति तथ्यं वा दण्ड्यस्सोपि नराधमः ॥

कात्यायनः—

अपृष्टस्सर्वंवचने पृष्टस्याकथने तथा ।
साक्षिणः संनिरोद्धव्याः गर्ह्या दण्ड्याश्च धर्मतः ॥
वाक्पारुष्ये छले वादे दाप्यास्स्युस्त्रिशतं दमम् ।

ऋणादिवादेषु धनं ते स्युर्दाप्या ऋणं तथा ॥

इति । धनं दण्डधनम् । त इति सर्वनाम्ना प्रश्नस्योत्तरमकथयन्त एव प्रत्यवमृश्यन्ते, तेषामसत्यर्थं प्रकृतत्वात् । अत एवाह स एव—

साक्षी साक्ष्यं न चे ब्रूयात् समदण्डं वहेदृणम् ।
अतोऽन्येषु विवादेषु त्रिशतं दण्डमर्हति ॥

अन्येषु ऋणादितोऽन्योष्वित्यर्थः । तथा च मनुः—

त्रिपक्षादब्रुवन् साक्ष्यमृणादिषु नरोऽगदः ।
तदृणं प्राप्नुयात्सर्वं दशबन्धं च सर्वतः ॥

अगदः स्वस्थः, तदृणं साक्षिरूपप्रमाणसाध्यं धनं, सर्वं सवृद्धिकं प्राप्नुयात् दाप्य इत्यर्थः । तथाच याज्ञवल्क्यः—

अब्रुवन् हि नरस्साक्ष्यमृणं सदशबन्धकम् ।
राज्ञा सर्वं प्रदाप्यष्षट्चत्वारिंशत्तमेऽहनि ॥

दशबन्धशब्देन दशमांश उच्यते । स च दण्डत्वाद्राज्ञा ग्राह्यमित्युक्तं व्याख्यातृभिः।अत्राधमर्णेन न किञ्चिद्दातव्यम्, तद्देयमेव अब्रुवन् साक्षी दाप्य इति पूर्ववचनस्य तात्पर्यार्थत्वात्। न चाब्रुवता साक्षिणा स्वेन दत्तमधमर्णतो ग्राह्यं, स्वापराधेन दत्तत्वात् । षट्चत्वारिंशत्तमेऽहनीति ग्रहणात्ततो र्वाग्ब्रुवन्न दाप्य इति गम्यते। अत एव कात्यायनः—

सम्यक्क्रियाऽपरिज्ञाने देयः कालस्तु साक्षिणम् ।
सन्दिग्धं यत्र साक्ष्यं तु सद्यः स्पष्टं विवादयेत् ॥

एवञ्च यदुक्तं तेन—

न कालहरणं कार्यं राज्ञा साक्षिप्रभाषणे ।
महान् दोषो भवेत् कालाद्धर्मव्यावृत्तिलक्षणः ॥

इति, तत्स्पष्टसाक्षिविषयमित्यवगन्तव्यम्, सन्दिग्धसाक्ष्ये कालदानविधानात् । यः पुनस्साक्षी प्रश्नवाक्यं श्रावितस्सन् वादकाले रागद्वेषान्धो नाहमत्र साक्षी भवामीति स्वसाक्षित्वमपलपति तस्य दण्डमाह याज्ञवल्क्यः—

यस्साक्ष्यं श्रावितोऽन्येभ्यो निह्नुते तत्तमोवृतः ।
स दाप्योऽष्टगुणं दण्डं ब्राह्मणं तु विवासयेत् ॥

विवादादित्यनुषज्यते । तेन विवादपराजयो दण्डः, तमष्टगुणं दाप्य इत्यर्थोऽवगन्तव्यः । विवासयेदित्यस्य नग्नीकरणं गृहभङ्गः, स्वराष्ट्रबहिष्कारो वाऽर्थः । अत्र तु दण्डाभिवृद्धिसाहचर्यात् स्वराष्ट्रबहिष्काररूपोऽर्थः प्रत्येतव्यः । कात्यायनस्मृत्या साक्ष्यं पुनरन्यथा ब्रुवाणा अपि साक्षिणो दण्ड्या इत्याह—

उक्त्वाऽन्यथा ब्रुवाणाश्च दण्ड्यास्स्युर्वाक्छलान्विताः ॥

इति । गौतमस्तु प्रथमत एव 'अन्यथा ब्रुवाणो गर्ह्यो दण्ड्यश्च' इत्याह । 'मिथ्यावचने दाप्यो दण्ड्यश्च साक्ष्ये' इति । याज्ञवल्क्यस्त्वेवंविधसाक्षिणो दण्डे विशेषमाह—

पृथक्पृथक् दण्डनीयाः कूटकृत्साक्षिणस्तथा ।
विवादात् द्विगुणं दण्डं विवास्यो ब्राह्मणस्स्मृतः ॥

कूटं साक्ष्यं कुर्वन्तीति कूटकृतः मिथ्यावादिन इति यावत्। ते राज्ञा पृथक्पृथक् दण्डनीयाः। विवादपराजयनिबन्धनदमात् द्विगुणं दममित्यर्थः। विवास्यो ब्राह्मण इत्यविशेषेणोक्तेऽपि यत्र क्षत्रियादीनामल्पधनेन द्विगुणो दमः सम्पद्यते, तत्र ब्राह्मणस्य नग्नीकरणरूपविवासनं दण्डः। यत्र तु बहुधनेन क्षत्रियादीनां, तत्र गृहभङ्गरूपविवासनं ब्राह्मणस्य। यत्र पुनरतिबहुधनेन क्षत्रियादीनां, तत्र स्वराष्ट्रबहिष्कार-रूपविवासनं ब्राह्मणस्येति मन्तव्यम्, दण्डतारतम्यस्य दोषतारतम्यानुविधायित्वात्। अत एव मनुनाऽनृतबीजनिबन्धनदोषतारतम्यानुसारेण दण्डवैचित्र्यमुक्तम्—

लोभान्मोहाद्भयान्मैत्रात् कामात्क्रोधात्तथैव च।
अज्ञानाद्बालभावाच्च साक्ष्यं वितथमुच्यते॥

तेषामन्यतमे स्थाने यस्साक्ष्यमनृतं वदेत्।
तस्य दण्डविशेषांस्तु प्रवक्ष्याम्यनुपूर्वशः॥

लोभात्सहस्रं दण्ड्यस्तु मोहात् पूर्वं तु साहसम्।
भयाद्द्वे मध्यमो दण्डो मैत्रात्पूर्वं चतुर्गुणम्॥

कामाद्दशगुणं पूर्वं क्रोधात्तु त्रिगुणं परम्।
अज्ञानात् द्वे शते पूर्णे बालिश्याच्छतमेव तु॥

एतानाहुः कौटसाक्ष्ये प्रोक्तान् दण्डान्मनीषिणः।

इति। लोभोऽर्थपरत्वम्। मोहस्सम्यक्प्रआर्थानवधारणम्।

भयमनिष्टप्राप्तिशङ्का । मैत्री स्नेहातिशयः । कामो रतिविषयाभिलाषः । क्रोधोऽमर्षः । अज्ञानं समक्षदर्शनश्रवणसमय एवान्यथाज्ञानम् । बालिश्यं अप्राप्तबुद्धिस्थैर्यम् । अत्र लोभभयमैत्रनिमित्तानृते तुल्यदोषे वचोभङ्ग्योत्तमसाहस उक्तः । कामतोऽनृते तु ततो दोषबाहुल्यात् सार्धोत्तमसाहसद्वयमुक्तम् । क्रोधनिमित्ते पुनस्ततोऽपि दोषबाहुल्यादुत्तमसाहसत्रिकमुक्तम् । मोहे त्वल्पदोषत्वात् प्रथमसाहस उक्तः । अज्ञाने तु ततोऽल्पदोषत्वात् कार्षापणशतद्वितयमुक्तम् । बालिश्ये पुनस्ततोऽप्यल्पदोषत्वात्तदर्धमेवोक्तमिति मन्तव्यम् । इदं च दण्डवैचित्र्यं ब्राह्मणस्यापि कूटसाक्षिणो ज्ञेयम् 'एतानाहुः कौटसाक्ष्ये' इत्यविशेषस्मृतेः ।

कौटसाक्ष्यं तु कुर्वाणांस्त्रीन् वर्णान् धार्मिको नृपः ।
प्रवासयेद्दण्डयित्वा ब्राह्मणं तु विवासयेत् ॥

इति । कौटसाक्ष्यावृत्तिविषये ब्राह्मणस्य विशेषस्मरणाच्च । कः पुनरत्र विशेषः? न तावद्दण्डयित्वा प्रवासनं क्षत्रियादेः । ब्राह्मणस्य तु प्रवासनमात्रमिति विशेषो युक्तः, सकृत्कृतेऽपि कौटसाक्ष्ये ब्राह्मणस्य याज्ञवल्क्येन प्रवासनविधानात् अभ्यासेऽधिकदण्डानुक्तिप्रसक्तेः । अतो यत्कैश्चिदुक्तं तुशब्दो ब्राह्मणे धनदण्डनिवृत्त्यर्थ इति, तदपास्तम् । कथं तर्हि ब्राह्मणे दण्डविशेष उक्तः? उच्यते—प्रवासशब्देनात्र दन्तच्छदच्छेदनं

जिह्वाच्छेदो मारणं चोच्यते। विवासशब्देन तु नग्नीकरणादिकम्। तेन दण्डयित्वेत्यस्यानुषङ्गेऽपि विशेषोक्तिर्युक्ता। प्रवासनविवासनावान्तरभेदाङ्गच्छेदच्छेदादयो नग्नीकरणादयश्च कौटसाक्ष्यविषयानुसारेणाभ्याससङ्ख्याविवृद्ध्यनुसारेण चानुसन्धातव्याः। अनवधारितहेतुके कौटसाक्ष्ये सकृत् कृते 'पृथक्पृथक्' इत्यादिवचनोक्तो याज्ञवल्कीयो दण्डः, अन्यत्र मानव इति चानुसन्धेयम्। यत्पुनर्विष्णुनोक्तं 'कूटसाक्षिणां सर्वस्वापहारः कार्यः' इति, तद्भूम्यनृतविषयमिति कैश्चिदुक्तम्, शूद्राद्यधर्मजातिविषयं वा द्रष्टव्यम्। कूटसाक्षिग्रहणं तन्निर्देशकस्यापि प्रदर्शनार्थम्। अत एव कात्यायनः—

येन कार्यस्य लोभेन निर्दिष्टाः कूटसाक्षिणः।
गृहीत्वा तस्य सर्वस्वं कुर्यान्निर्विषयं ततः॥

निर्विषयं स्वदेशान्निर्वासनम्। येन पुनः निर्दिष्टसाक्षिणां कूटत्वायोद्यमः कृतः स हीनो भवतीत्याह नारदः—

न परेण समुद्दिष्टमुपेयात्साक्षिणं रहः।
भेदयेत न चान्येन हीयेतैवं समाचरन्॥

तेन तथा चरन्तं हीनदण्डेन दण्डयेदित्यभिप्रायः। एवं कूटसाक्षिणं तन्निर्देशकं दण्डयित्वा च कूटसाक्षिवचनान्निर्णीतं कार्यं निवर्तनीयम्। तथा च मनुः—

यस्मिन्यस्मिन् विवादे तु कौटसाक्ष्यं कृतं भवेत्।

तत्तत्कार्यं निवर्तेत कृतं चाप्यकृतं भवेत् ॥

कस्मिन् पुनः कार्ये कौटसाक्ष्यं भवतीत्यपेक्षिते याज्ञवल्क्यः—

उक्तेऽपि साक्षिभिस्साक्ष्ये यद्यन्ये गुणवत्तराः ।
द्विगुणा वाऽन्यथा ब्रूयुः कूटास्स्युः पूर्वसाक्षिणः ॥

अस्यार्थः—यत्रार्थिना सन्निहिता असन्निहिताश्च बहवस्साक्षिणो निर्दिष्टाः, तत्रासन्निहितानयने क्लेशमालोच्य यदा संनिहितैरेवालमित्यङ्गीकृत्य तद्वचनान्निर्णीतमर्थिनः पराजय इति तं च पराजयं कौटसाक्ष्यनिबन्धनमिति मन्यमानोऽर्थी पुनः पूर्वमुद्दिष्टानसन्निहितान् संनिहितेभ्यो गुणवत्तरान् द्विगुणान्वाऽऽनीय विजयी भवति, तदा पूर्वसन्निहिताः साक्षिणः कूटास्स्युरिति । कात्यायनोपि—

यत्र वै भावितं कार्यं साक्षिभिर्वादिना भवेत् ।
प्रतिवादी यदा तत्र भावयेत् कार्यमन्यथा ॥
बहुभिश्च कुलीनैर्वा पूर्वास्स्युः कूटसाक्षिणः ।

इति । अस्यार्थः—अर्थिना निर्दिष्टेषु साक्षिष्वर्थिपक्षानुकूलमभिहितवत्सु यदा प्रत्यर्थी सङ्ख्यया गुणैर्वाऽधिकान् साक्षिणः पूर्वोक्तविपरीतं वादयति, तदाऽर्थिसाक्षिणः कूटास्स्युरिति । ननु च एकस्मिन् व्यवहारे कथमर्थिप्रत्यर्थिनोस्साक्षिसम्भवः ?

न चैकस्मिन्विवादे तु क्रिया स्याद्वादिनोर्द्वयोः ।

इति प्रतिषिद्धत्वात् । अत एव 'यत्र वै भावितम्' इत्यादिवच-

नस्य पुनर्बाधविषयत्वमाश्रीयते । तेन न कश्चिद्विरोधः । एकस्य साक्षित्वविषये तु मनुराह—

यस्य दृश्येत सप्ताहादुक्तवाक्यस्य साक्षिणः ।
रोगोऽग्निर्ज्ञातिमरणमृणं दाप्यो दमं च सः ॥

सप्ताहावधिकं दैविकव्यसनोद्भावनेनैकस्य साक्षिणः परीक्षणं कर्तव्यमित्यर्थः । एतच्च परीक्षणं दूतकादेः साक्षिणः कार्यम्, न पुनर्गुणान्वितस्य नृपाध्यक्षयोर्वा, तत्रैकैकस्याप्यनृतसंभावनासम्भवात् । अत एव व्यासः—

मणिमन्त्रौषधिबलात् प्रदत्तं चाविधानतः ।
विसंवदेद्दिव्यमपि न तु साक्षी गुणान्वितः ॥

अत एव बृहस्पतिना दूतकादेः नृपाध्यक्षयोः व्यवधानं कृतम्—

दूतको घटिकाग्राही कार्यमध्यगतस्तथा ।
एक एव प्रमाणं स्यान्नृपोऽध्यक्षस्तथैव च ॥

इति । घटिकाग्राही गणकः । इतरौ कात्यायनेन दर्शितौ—

अभ्यन्तरस्तु निक्षेपे साक्ष्यमेकोपि वाच्यते ।
अर्थिना प्रहितस्साक्षी भवत्येकोपि दूतकः ॥

इति स्मृतिचन्द्रिकायां साक्षिविषयाणि.

साक्षिप्रकरणं समाप्तम् .

अथासाक्षिप्रत्ययाः.

तत्र नारदः—

असाक्षिप्रत्ययास्त्वन्ये षड्विवादाः प्रकीर्तिताः ।
लक्षणान्येव साक्षित्वमेषामाहुर्मनीषिणः ॥

अग्निदत्वादिविवादेषूल्काहस्तत्वादिचिह्नान्येव साक्षिकार्यं कुर्वन्तीत्यर्थः । तथा च स एव—

उल्काहस्तोऽग्निदो ज्ञेयः शस्त्रपाणिश्च घातुकः ।
केशाकेशी गृहीतश्च युगपत्पारदारिकः ॥
कुद्दालपाणिर्विज्ञेयस्सेतुभेत्ता समीपगः ।
तथा कुठारपाणिस्तु वनच्छेत्ता प्रकीर्तितः ॥
प्रत्यग्रचिह्नैर्विज्ञेयो दण्डपारुष्यकृन्नरः ।
असाक्षिप्रत्यया ह्येते पारुष्ये तु परीक्षणम् ॥

इति । प्रत्यग्रचिह्नैः नूतनक्षतादिभिः । असाक्षिप्रत्ययाः विनाऽपि साक्षिभिश्चिह्नैरेव विगतसंशयाः, पारुष्ये तु परीक्षणं दण्डपारुष्ये कृत्रिमचिह्नविवेकाय परीक्षणं कर्तव्यमित्यर्थः । तथाच स एव—

कश्चित्कृत्वाऽऽत्मनश्चिह्नं द्वेषात्परमुपद्रवेत् ।
युक्तिहेत्वर्थसम्बन्धैस्तत्र युक्तं परीक्षणम् ॥

तत्र पारुष्य इत्यर्थः । नन्विदमनर्थकं वचः—

तलवद्दृश्यते व्योम खद्योतो हव्यवाडिव ।

न तलं विद्यते व्योम्नि न खद्योतो हुताशनः ॥
तस्मात्प्रत्यक्षदृष्टेऽपि युक्तमर्थान् परीक्षितुम् ।
परीक्ष्य ज्ञापयन्नर्थान् अधर्मात्परिहीयते ॥

इति। उल्काहस्तादौ सर्वत्र परीक्षणस्य तेनैव विहितत्वात् ।सत्यम् तत्रैवोपायविधानार्थं परीक्षणमनूद्यत इत्यदोषः । एवं चौर्यविवादोपि कश्चिदसाक्षिप्रत्ययोऽवगन्तव्यः । तथाच शङ्खलिखितौ—

'केशाकेशी सङ्ग्रहणात् पारदारिकः उल्काहस्तोऽग्निदः शस्त्रपाणिर्घातुकः लोप्त्रहस्तश्चोरः' इति । लोप्त्रमपहृतैकदेशादिलिङ्गम्, अत्रापि परीक्षणं कार्यम् । तथाच नारदः—

यात्यचोरोपि चोरत्वं चोरश्चायात्यचोरताम् ।
अचोरश्चोरतां प्राप्तो माण्डव्यो व्यवहारतः ॥

इति। अतः परीक्षणमावश्यकमित्यभिप्रायः। अत एव बृहस्पतिः—

लिखिते साक्षिवादे च संदेहो यत्र जायते ।
अनुमाने च संभ्रान्ते तत्र दैवं विशोधनम् ॥

अनुमानं उल्काहस्तत्वादियुक्तिः ।

अनुमानं विदुर्हेतुस्तर्कश्चेति मनीषिणः ॥

इति व्याससमरणात् ॥

इति स्मृतिचन्द्रिकायामसाक्षिप्रत्ययाः.

अथ दिव्यनिरूपणम्.

तत्र पितामहः—

यस्मिन्यस्मिन्विवादे तु साक्षिणां नास्ति सम्भवः ।
साहसेषु विशेषेण तत्र दिव्यानि दापयेत् ॥

साक्षिग्रहणं मानुषप्रमाणोपलक्षणार्थम् । अत एव याज्ञवल्क्यः—

प्रमाणं लिखितं भुक्तिस्साक्षिणश्चेति कीर्तितम् ।
तेषामन्यतमाभावे दिव्यान्यतममुच्यते ॥

एषामन्यतमाभाव इति युक्त्यभावस्याप्युपलक्षणार्थम् । अत एव नारदः—

युक्तिष्वप्यसमर्थासु शपथैरेव निर्णयेत् ।
अर्थकालबलापेक्षमग्न्यम्बुसुकृतादिभिः ॥

अर्थापेक्षं सिषाधयिषितार्थाल्पत्वमहत्त्वरूपमित्यर्थः ।

तथाच व्यासः—

अर्थानुरूपाश्शपथास्स्मृतास्सत्यघटादयः ॥

इति । तत्रार्थाल्पत्वानुरूपास्सत्यादय इत्याह बृहस्पतिः—

सत्यं वाहनशस्त्राणि गोबीजकनकानि च ।
देवब्राह्मणपादाश्च पुत्रदारशिरांसि च ॥
एते तु शपथाः प्रोक्ताः स्वल्पेऽर्थे सुकरास्सदा ।

इति । स्वल्पेऽर्थे इति स्वल्पपीडाया अपि सिषाधयिषितायाः प्रदर्शनार्थम् । अत एव सामान्येनोक्तं नारदेन—

सत्यं वाहनशस्त्राणि गोबीजकनकानि च ।
देवतापितृपादाश्च दत्तानि सुकृतानि च ॥
इत्येते शपथाः प्रोक्ताः मनुना स्वल्पकारणे ।

इति । स्वल्पकारणे स्वल्पापराध इत्यर्थः । सुकृतानि चेति च-शब्देनान्येऽपि लोकप्रसिद्धाः शपथाः सङ्गृह्यन्ते । अत एव शङ्खलिखितौ 'इष्टापूर्तप्रदानमन्यांश्च शपथान् कारयेत्' इति। यत्पुनर्नारदेनोक्तम्—

कारणे महति प्रोक्तं दिव्यं वादार्थिनां नृणाम् ।

इति, यदपि पितामहेन—

महापराधे दिव्यानि दापयेत्पृथिवीपतिः ।

इति, तत्तुलादिदिव्याविषयम् । यदाह याज्ञवल्क्यः—

तुलाग्न्यापो विषं कोशो दिव्यानीह विशुद्धये ।
महाभियोगेष्वेतानि शीर्षकस्थेऽभियोक्तरि ॥

इति । अग्निशब्देन तप्तायःपिण्डस्तप्तमाषस्तप्तफालं च निर्दिश्यते सामान्येनाभिधानात् । तेन तप्तमाषफाले अप्यस्मादेव वचनात् महाभियोगे शीर्षकस्थे चाभियोक्तरि विहिते इति बोद्धव्यम् । शीर्षकं विवादपराजयनिबन्धनो दण्डः, व्यवहारशिरस्थानीयत्वात्, तत्र तिष्ठतीति शीर्षकस्थः । एतदुक्तं भवति 'न महाभियोगमात्रे तुलादीनि भवन्ति, किंतु यत्रैतस्य जयेऽहमित्थं दण्ड्य इति शरीरदण्डमर्थदण्डं वा मिथ्याभियोगिनो विहितमभि

योक्ता स्वकृताभियोगदार्ढ्यख्यापनायाङ्गीकुरुते तत्रैव, इति। अत एव नारदः—

शिरोवर्ती यदा न स्यात्तदा दिव्यं न दीयते।

इति। शिरोवर्ती यदा न स्यादभियोक्तेति शेषः। तथा च पितामहः—

अभियोक्ता शिरस्थाने दिव्येषु परिकल्प्यते।
अभियुक्ताय दातव्यं दिव्यं श्रुतिनिदर्शनात्॥

दिव्यं धटादिपञ्चकेष्वन्यतमम्। एतानीति याज्ञवल्क्येन विशेषितत्वात्। अत एव नारदः—

यथाविधानेन सदा पञ्च दिव्यानि धर्मतः।
दद्द्राजाऽभियुक्तानां प्रेत्य चेह च नन्दति॥

अनेन अभियोक्तृणामेतानि दिव्यानि भवन्तीत्यर्थादुक्तम्। उक्तं च कात्यायनेन—

न कश्चिदभियोक्तारं दिव्येषु विनियोजयेत्।
अभियुक्ताय दातव्यं दिव्यं दिव्यविशारदैः॥

कश्चित् सभापत्यादिः। दिव्यविशारदाः प्राड्विवाकादयः। अनेनार्थिप्रत्यर्थिनोरन्यतरेच्छया दिव्याङ्गीकारे नायं नियम इत्यर्थादुक्तम्। उक्तं च याज्ञवल्क्येन—

रुच्या वाऽन्यतरः कुर्यादितरो वर्तयेच्छिरः।

इति । नारदेनाप्युक्तम्—

आभियोक्ता शिरस्थाने सर्वत्रैव प्रकल्पितः ।
इच्छया त्वितरः कुर्यादितरो वर्तयेच्छिरः ॥

सर्वत्र शिरोवर्ति दिव्यपञ्चक इत्यर्थः । अभियुक्तस्य शिरोवर्तनमनपलापदार्ढ्यख्यापनार्थम् ।अत एव एतस्य जयेऽहमित्थं दण्ड्य इत्यपलापिनो विहितदण्डाङ्गीकारः । तथा क्वचिद्विषये न कोऽपि शिरो वर्तयेदित्याह स एव—

शिरोऽवस्थायिनि नरे अभियोक्तर्युपस्थिते ।
दिव्यप्रदानमुचितमन्यत्र नृपशासनात् ॥

नृपशासनात् नृपाज्ञया त्वशिरांस्यपि घटादीनि भवन्ति । तथाच स एव—

अशिरांसि च दिव्यानि राजा भृत्येषु दापयेत् ।

इति । याज्ञवल्क्यस्त्वपराधविशेषे शिरोवस्थाननियमस्याप्यपवादमाह—

विनाऽपि शीर्षकात् कुर्यात् नृपद्रोहेऽथ पातके ।

शीर्षकात् शीर्षकवर्तनादित्यर्थः । तथा विष्णुः—'राजद्रोहसाहसेषु विना शीर्षकवर्तनात्' इति । तुलादीनि नियोज्यानीति शेषः । तथाच कात्यायनः—

पार्थिवैश्शङ्कितानां तु तुलादीनि नियोजयेत् ।
आत्मशुद्धिविधाने च न शिरस्तत्र कल्पयेत् ॥

लोकापवाददुष्टानां शङ्कितानां च दस्युभिः ।
तुलादीनि नियोज्यानि न शिरस्तत्र वै भृगुः ॥

इति । दस्युभिस्सह वासेन शङ्कितानामित्यर्थः । यत्पुनस्तेनोक्तं—

न शङ्कासु शिरः कोशे कल्पयेत्तु कदाचन ।

इति । तच्छङ्काभियोगे कोशस्य ऋणादावप्यशिरस्त्वनियमार्थम् । कदाचनेत्यभिधानात् । शङ्काभियोगे च कोशो व्यासेनाभिहितः—

धटोऽग्निर्विषतोयं च प्रमाणं तु चतुर्विधम् ।
दैविकस्य प्रभेदोऽयं कोशश्शङ्कासु पञ्चमः ॥

शङ्कास्विति विश्वासादीनां प्रदर्शनार्थम् । अत एव कात्यायनः—

शङ्काविश्वाससंधाने विभागे रिक्थिनां सदा ।
क्रियासमूहकर्तृत्वे कोशमेव प्रदापयेत् ॥

पितामहोपि—

विस्रम्भे सर्वशङ्कासु संधिकार्ये तथैव च ।
एषु कोशः प्रदातव्यो नित्यं चित्तविशुद्धये ॥

कोशः शिरोरहित इति शेषः । तथा च स एव—

शिरस्स्थायिविहीनानि दिव्यानि परिवर्जयेत् ।
धटादीनि विषान्तानि कोश एकोऽशिरास्स्मृतः ॥

शङ्काभियोगादिविषय इति शेषः । महातत्त्वाभियोगे कोशोपि शिरस्स्थायिविहीनो वर्ज्य एव । 'शीर्षकस्थेऽभियोक्तरि' इति पञ्चदिव्यशेषतया याज्ञवल्क्येनोक्तत्वात् । महातत्त्वादियोगेष्वापि राजप्राड्विवाकेतरसभायां तु न धटादिदिव्यपञ्चके शिरःकल्पनमस्ति ।

वाग्दण्डो धिग्दमश्चैव विप्रायत्तावुभौ स्मृतौ ।
अर्थदण्डवधावुक्तौ राजायत्तावुभावपि ॥

इति । राजप्राड्विवाकसभायामेव दण्डस्य व्यवहारशिरस्स्थानीयस्योक्तेः । ततश्च,

शिरस्स्थायिविहीनानि दिव्यानि परिवर्जयेत् ।

इत्यादिवचनं राजप्राड्विवाकसभाविषयमेवेति मन्तव्यम् । एवंच यत्पितामहेन 'मिथ्याक्रिया पूर्ववादे' इत्यस्यान्यथाकरणार्थमुक्तं

अभियुक्ताय दातव्यं दिव्यं श्रुतिनिदर्शनात् ।

इति, तदपि राजप्राड्विवाकसभाविषयमेवेत्यवगन्तव्यं, न तद्व्यतिरिक्तसभायाम् । अत एव 'मिथ्याक्रिया पूर्ववादे' इति वचनोक्तार्थानतिक्रमेण सभ्यैर्दिव्याभिधानं क्रियमाणं युक्तमिति लिखितादिवदेव भवतीति मन्तव्यम् । न च;

तण्डुलाश्चैव कोशश्च शङ्कास्वेतौ नियोजयेत् ।

इति पितामहवचने तण्डुलसाहचर्याच्छङ्कास्वेव कोश इतिशङ्का कार्या । 'शीर्षकस्थे' इत्यादिपूर्वोक्तयाज्ञवल्क्यवचनविरोधापत्तेः । तण्डुलसाहचर्यं स्वल्पाभियोगेऽपि कोशो भवतीति ज्ञापनार्थम् । अत एव नारदः—'कोशमल्पेऽपि दापयेत्' इति। एवंच 'महाभियोगेष्वेतानि' इति याज्ञवल्क्येनोक्तो नियमस्तुलादिविषान्तविषय एवेत्यनुसन्धेयम् । कोशस्यापि नियमे पूर्वोक्तनारदवचनविरोधः स्यात् । अत एव सङ्ग्रहकारः—

घटादीनि विषान्तानि गुर्वर्थेषु दापयेत् ।

इति । यत्पुनस्तेनोक्तम्—

कोशादीनि पुनस्त्रीणि लघ्वर्थेषु यथाक्रमम् ।

इति, तदपहार एव लघ्वर्थनियमकथनार्थम्, न पुनरपह्नवेऽपि; कोशतण्डुलतप्तमाषाणां गुर्वर्थापह्नवे विहितत्वेन लघ्वर्थेष्वेवेति नियमासम्भवात् । लघ्वर्थेष्वपि शङ्कास्वेव तण्डुलाः

तण्डुलाश्चैव कोशश्च शङ्कास्वेतौ नियोजयेत् ।

इति पितामहस्मरणात् । तप्तमाषोपि लघ्वर्थेषु शङ्कायामेव ।

अल्पचौर्यादिशङ्कायां तप्तमाषकमादिशेत् ।

इति तेनैव स्मृतत्वात् । फालमपि क्वचिल्लघ्वर्थे प्रदातव्यम् । तथाच बृहस्पतिः—

गोचरस्य प्रदातव्यं सभ्यैः फालं प्रयत्नतः ।

इति । एवंच

महाभियोगेष्वेतानि शीर्षकस्थेऽभियोक्तरि ।

इति नियमोऽग्नावुच्यमानोऽयःपिण्डाग्निविषयो न तप्तमाषफालाग्निविषय इत्यवगन्तव्यम् । अत एवाग्निदिव्यानां पृथङ्निर्देशो बृहस्पतिना कृतः—

घटोऽग्निरुदकं चैव विषं कोशश्च पञ्चमम् ।
षष्ठं च तण्डुलाः प्रोक्तं सप्तमं तप्तमाषकम् ॥
अष्टमं फालमित्युक्तं नवमं धर्मजं भवेत् ।

दिव्यान्येतानि सर्वाणि निर्दिष्टानि स्वयम्भुवा ॥

इति । धर्मजं तु महाभियोगबहिष्कृतत्वाल्लघ्वर्थेष्वेव नियतमिति मन्तव्यम् । यत्तु पितामहेनोक्तं—

हन्तॄणां याचमानानां प्रायश्चित्तार्थिनां नृणाम् ।
संदिग्धेऽर्थेऽभिशस्तानां धर्माधर्मपरीक्षणम् ॥

तस्यायमर्थः—हिंसाधनघातकाद्यभियोगेष्वल्पेष्वभिशस्तानां धर्मजं दिव्यमिति ।

इति स्मृतिचन्द्रिकायां दिव्यनिरूपणम्.

अथाभियोगाल्पत्वमहत्त्वज्ञानोपयोगीनि कानिचिद्वचनानि लिख्यन्ते । तत्र मनुः—

लोकसंव्यवहारार्थं यास्संज्ञाः प्रथिता भुवि ।
ताम्ररूप्यसुवर्णानां ताः प्रवक्ष्याम्यशेषतः ॥

दण्डदिव्यशास्त्रार्थव्यामोहापनुपत्तये ताम्रादीनां परिमाणानिबन्धनास्संज्ञाः प्रदर्श्यन्त इत्यर्थः । प्रतिज्ञातार्थं दर्शयति—

जालान्तरगते भानौ यत्सूक्ष्मं दृश्यते रजः ।
प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते ॥
त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणतः ।
ता राजसर्षपस्तिस्रस्ते त्रयो गौरसर्षपः ॥
सर्षपाष्षड्यवो मध्यस्त्रियवं त्वेककृष्णलम् ।

पञ्चकृष्णलको माषः ते सुवर्णस्तु षोडश ॥
पलं सुवर्णाश्चत्वारः पलानि धरणं दश ।
द्वे कृष्णले समधृते विज्ञेयो रूप्यमाषकः ॥
ते षोडश स्याद्धरणं पुराणं चैव राजतम् ।
कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः ॥
धरणानि दश ज्ञेयः शतमानस्तु राजतम् ।
चतुस्सुवर्णको निष्को विज्ञेयस्तु प्रमाणतः ॥

इति । एतेषां श्लोकानां तात्पर्यार्थः प्रातिलोम्येनोच्यते— निष्कशतमानशब्दावेकपले रूप्यद्रव्ये वर्तेते । अत एव रुप्यसंज्ञाधिकारे,

शतमानं तु दशभिः धरणैः पलमेव तु ।
निष्कस्सुवर्णा श्चत्वारः,

इति याज्ञवल्क्येनोक्तम् । पणकार्षापणशब्दौ पलचतुर्थांशकर्षस्य ताम्रद्रव्यस्य नामधेयम् । पुराणधरणशब्दौ पलदशमांशस्य रूप्यद्रव्यस्य नामनी । कर्षचत्वारिंशत्तमांशस्य रूप्यद्रव्यस्य मा पसंज्ञा । दशपलस्य धरणसंज्ञा । सा च रजतेतरद्रव्यविषये वेदितव्या । राजतधरणस्याल्पपरिमाणत्वात् पलसंज्ञा सर्वद्रव्यविषयेऽवगन्तव्या, विशेषास्मृतेः । सुवर्णशब्दस्तु काञ्चनकर्षवचनः 'सुवर्णबिस्तौ हेम्नोक्षे' इत्यमरसिंहेन विशेषितत्वात् । अक्षे कर्ष इत्यर्थः 'ते षोडशाक्षः कर्षोऽस्त्री' इति तेनैवोक्तत्वात् । कर्षषोडशभागस्य माषसंज्ञा । सा च रूप्यद्रव्यादन्यत्र विज्ञेया,

रूप्यमाषकस्य कर्षचत्वारिंशत्तमांशत्वात्। कृष्णलशब्दस्तु कार्षाशीतिभागवाची, माषपञ्चमांशत्वात्। एवं सर्षपलिक्षात्रसरेणुपदार्थेष्वपि द्रव्येयत्ता स्वयमूहनीया। 'यवो मध्यः' इत्यत्र मध्यशब्दः श्लोकपूरणार्थ इत्युक्तं तद्भाष्ये। त्रसरेणौ पद्मरजस्संज्ञाऽपि पुराणे दर्शिता—

अष्टानां परमाणूनां समवायो यदा भवेत्।
त्रसरेणुस्समाख्यातस्तत्पद्मरज उच्यते॥

इति। माषशब्दः कार्षापणस्य विंशतितमे भागे वर्तत इत्याह कात्यायनः—

माषो विंशतिभागस्तु ज्ञेयः कार्षापणस्य तु।
काकणी तु चतुर्भागा माषकस्य पणस्य च॥
पञ्चनद्याः प्रदेशे तु संज्ञेयं व्यावहारिकी।

इति। सुवर्णशब्दो द्वादशपलवाचीत्याह बृहस्पतिः—

ताम्रकर्षकृता मुद्रा विज्ञेयः कार्षिकः पणः।
स एव चाण्डिका प्रोक्ता ताश्चतस्रस्तु धानका॥
ता द्वादश सुवर्णास्तु दीनाराख्यस्स एव तु।

इति। कात्यायनोऽपि—

कार्षापणोऽण्डिका ज्ञेया ताश्चतस्रस्तु धानकः।
ते द्वादश सुवर्णास्तु दीनाराश्चित्रकः स्मृतः॥

इति। पले तु विकल्पो याज्ञवल्क्येन दर्शितः—

पलं सुवर्णाश्चत्वारः पञ्च वाऽपि प्रकीर्तितम्।

इति । राजतोपि कार्षापणोऽस्तीत्याह नारदः—

कार्षापणो दक्षिणस्यां दिशि रौप्यः प्रवर्तते ।

इति । व्यासस्तु सौवर्णनिष्कस्य प्रमाणमाह—

पलान्यष्टौ सुवर्णस्य सुवर्णाश्च चतुर्दश ।
एतन्निष्कप्रमाणं तु व्यासेन परिकीर्तितम् ॥

इति । अत्र मनूक्तप्रमाणान्तरमाषादिः दिव्यदण्डविषये देशव्यवहाराविरोधेऽपि ग्राह्य एव । तथा च बृहस्पतिः—

संख्या रश्मिरजोमूला मनुना समुदाहृता ।
कार्षापणान्तो सा दिव्ये नियोज्या विनये तथा ॥

इति । कार्षापणान्तग्रहणं निष्कप्रमाणे तु नायं नियम इति प्रतिपादनार्थम् । तेन निष्कान्तरेण दिव्यं किंचिदुत्तरत्रोच्यमानमविरुद्धम् ।

इति स्मृतिचन्द्रिकायां अभियोगाल्पत्वमहत्त्वज्ञानोपयोगीनि ॥

अथ धनपरिमाणतो दिव्यव्यवस्था.

तत्र कात्यायनः—

दत्तस्यापह्नवो यत्र प्रमाणं तत्र कल्पयेत् ।

इति । अपह्नवोऽपलापः । कथं कल्पयेदित्यपेक्षिते स एवाह—

सर्वं द्रव्यप्रमाणं तु ज्ञात्वा हेम प्रकल्पयेत् ।
हेमप्रमाणयुक्तं तु तदा दिव्यं नियोजयेत् ॥

ज्ञात्वा सङ्ख्यां सुवर्णस्य शतनाशे विषं स्मृतम् ।
अशीतेस्तु विनाशे वै दद्याच्चैव हुताशनम् ॥
षष्ट्या नाशे जलं देयं चत्वारिंशति वै घटम् ।
विंशद्दशविनाशे तु कोशपानं विधीयते ॥
पञ्चाधिकस्य वै नाशे तदर्धार्धस्य तण्डुलाः ।
तदर्धार्धविनाशे तु स्पृशेत्पुत्रादिमस्तकम् ॥
तदर्धार्धविनाशे तु लौकिक्यश्च क्रियास्स्मृताः ।

इति।सर्वत्र विनाशशब्दस्यापह्नवार्थता प्रत्येतव्या । 'दत्तस्यापह्नवो यत्र' इत्युपक्रान्तत्वात् । विंशद्दशविनाशे त्रिंशद्विनाशे विंशद्विनाशे वेत्यर्थः । पञ्चभ्योऽधिकः पञ्चाधिकष्षट्प्रभृतिरिति यावत् । तदर्धार्धस्य सार्धसुवर्णप्रसृतेर्विनाशे तण्डुलाः । तदर्धार्धविनाशे त्वष्टांशोनसुवर्णार्धप्रसृतेर्विनाशे पुत्रदाराशिरस्स्पर्शनम् । तदर्धार्धविनाशे तु सार्धसप्तकृष्णलप्रसृतेर्विनाशे तु द्रव्याष्टगुणवचनादयो लौकिकाश्शपथाः । चशब्दस्स्मार्तशब्दानां सङ्ग्रहार्थः। अत एव विष्णुः—"सर्वेष्वेवार्थजातेषु मूल्यं कनकं कल्पयेत्तत्र कृष्णलोने शूद्रं दूर्वाकरं शापयेत्, द्विकृष्णलोने तिलकरं, त्रिकृष्णलोने रजतकरं, चतुःकृष्णलोने सुवर्णकरं, पञ्चकृष्णलोने सीरोद्धृतमहीकरं, द्विगुणेऽर्थे यथाऽभिहिता समयक्रिया वैश्यस्य, त्रिगुणेऽर्थे राजन्यस्य, चतुर्गुणेऽर्थे ब्राह्मणस्य" इति । सीरोद्धृतमहीकरं लाङ्गलोद्धृतहस्तमित्यर्थः । ऊनग्रहणं अधिके शापविनिवृत्त्यर्थम् । शापे तु विशेषमाह मनुः—

सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः ।
गोवीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः ॥

अस्यार्थः—यद्यहमर्थापह्नवी स्यां तदा सत्याभिधानधर्मो मम निष्फलस्स्यादिति शपथकारिणं ब्राह्मणं वाचयेत् । एवं क्षत्रियादीन्, सत्याभिधानधर्मो मम निष्फलस्स्यादित्यस्य स्थाने वाहनायुधानि मम निष्फलानि स्युरिति क्षत्रिये । गोवीजकाञ्चनानि निष्फलानि स्युरिति वैश्ये । सर्वाणि पातकानि मम स्युरिति शूद्रे विशेष इति । पादस्पर्शादीनां विषयः स्मृत्यन्तरे दर्शितः—

निष्के तु सत्यवचनं द्विनिष्के पादलम्भनम् ।
ऊनत्रिके तु पुष्पं स्यात् कोशपानमतः परम् ॥

निष्कशब्देनात्र काञ्चनकर्षचतुर्थांशो मुद्रामुद्रितः प्रतिपाद्यते। तत्रापि क्वचिद्देशे निष्कस्य व्यवहारात् । ननु मनूक्तो माषादिः दिव्यादिविषये ग्रहीतव्य इति नियमान्न व्यावहारिकनिष्कप्रतिपादनं युक्तम्। मैवम्, निष्के मनूक्तग्रहणनियमो नास्तीत्युक्तत्वात्। किंच तत्र मनूक्तनिष्कस्य राजतपलात्मकस्य मूल्यं काञ्चनकार्षार्धादधिकं भवति । तत्र सत्यवचनदिव्ये 'चतुर्गुणेऽर्थे ब्राह्मणस्य' इति विष्णुवचनविरोधः स्यात् । चतुर्गुणस्य हि कृष्णलपञ्चकस्य कर्षचतुर्थांशत्वात् । तस्माद्व्यावहारिकनिष्काश्रयेण सत्यवचनादिव्यवस्थोक्तेति मन्तव्यम् । पारिशेष्यादिष्टापूर्तादिसुकृतदानं, जातिशपथविषयादधिके धर्मजदिव्यविषयादूने धनेऽवगन्तव्यम्। धर्मजस्य तु विषयमाह बृहस्पतिः—

शते हृतेऽपह्नुते च दातव्यं धर्मशोधनम् ।

इति । कार्षापणशतप्रभृति निकृष्टस्य, द्विशतप्रभृति मध्यमस्य, चतुश्शतप्रभृत्युत्तमस्य, धर्मजं दिव्यं भवतीत्यर्थः ।

एषा सङ्ख्या निकृष्टानां मध्यानां द्विगुणा स्मृता ।
चतुर्गुणोत्तमानां तु,

इति तेनैवाभिधानात् । कार्षापणमूल्यं व्यावहारिकनिष्कस्याशीतितमो भागो भवति । कृष्णलं तु व्यावहारिकनिष्कस्य विंशतितमो भागः। सुवर्णः पुनर्व्यावहारिकनिष्कचतुष्कं भवति । एवं च सर्वदिव्यानां व्यावहारिकनिष्कतो व्यवस्थैवं वेदितव्या। चतुश्शतनिष्कप्रभृति विषं, विंशत्युत्तरत्रिशतनिष्कप्रभृत्यग्निः, चत्वारिंशदुत्तरद्विशतनिष्कप्रभृति जलं, षष्ट्युत्तरशतनिष्कप्रभृति धटः । विंशत्युत्तरशतनिष्कप्रभृति महाभियोगविहितः कोशः । स एव कोशः अशीतिनिष्कप्रभृति वा चत्वारिंशन्निष्कप्रभृति वा चतुर्विंशतिनिष्कप्रभृति वा भवति । षण्णिष्कप्रभृति तण्डुलाः । पञ्चनिष्कप्रभृत्युत्तमस्य धर्मजं दिव्यम्, त्रिनिष्कप्रभृत्यल्पाभियोगविहितः कोशः, किञ्चिदूनत्रिनिष्कप्रभृति पुष्पम् , सार्धद्विनिष्कप्रभृति धर्मजं दिव्यं, मध्यमस्य द्विनिष्कप्रभृति देवताप्रतिमायाः पितुर्ब्राह्मणस्य पादस्पर्शनम् । सार्धनिष्कप्रभृति पुत्रदाराशिरस्स्पर्शनम् । पादाधिकनिष्कप्रभृति निकृष्टस्य मध्यमं दिव्यं, निष्कप्रभृतीष्टापूर्तादिसुकृतदानं, निष्कदशमांशचतुष्टयप्रभृति लौकिकाः शपथाः निष्कविंशतितमांशप्रभृति जातिशपथाः । तेषु

दूर्वाकरत्वादिधर्माः यथाविष्णुवचनं बोद्धव्याः । सैषा व्यवस्था धर्मजेतरेषां धटादीनां न धनापहारविषये कल्पनीया । प्रकारान्तरेण धनापहारविषये तेषां यतो व्यवस्थामाह बृहस्पतिः—

त्रिंषं सहस्रेऽपहृते पादोने च हुताशनः ।
त्रिभागोने च सलिलमर्धे देयो धटस्सदा ॥
चतुश्शताभियोगे तु दातव्यस्तप्तमाषकः ।
त्रिशते तण्डुला देयाः कोशश्चैव तदर्धके ॥
शते हृतेऽपह्नुते च दातव्यं धर्मशोधनम् ।
गोचरस्य प्रदातव्यं सभ्यैः फालं प्रयत्नतः ॥
एषा सङ्ख्या निकृष्टानां मध्यानां द्विगुणा स्मृता ।
चतुर्गुणोत्तमानां तु कल्पनीया परीक्षकैः ॥

इति । अत्र महाभियोगे नियतधटस्य पञ्चशतादिकार्षापणापहारेऽभिधानात्तदादिकार्षापणसम्बन्ध्यभियोगो महाभियोगस्तदादिकोन्यूनकार्षापणसम्बन्धी त्वल्पाभियोग इत्यवगन्तव्यम् । अत एव संग्रहकारः—

ऋणं वा यदि वा दण्डः प्रायश्चित्तमथापि वा ।
यत्र पञ्चशतादिः स्यात्तत्कार्यं गुरु कीर्त्यते ॥
यत्रारभ्य दशभ्यस्त्वैतान्या सैकचतुश्शतात् ।
कार्यं तल्लघु निर्दिष्टं स्मृतितन्त्रविशारदैः ॥

इति । आ सैकचतुश्शतादापञ्चशतादित्यर्थः । ऋणमिति विवादा-

स्पदं धनमनास्थयोक्तम्। अधनाभियोगमहत्त्वाल्पत्वे तत्र विहित-दण्डधनप्रायश्चित्तप्रमाणधनयोरन्यतरसङ्ख्यया प्रत्येतव्ये इति तात्पर्यार्थः। यत्तु याज्ञवल्क्येनोक्तं—

नासहस्राद्धरेत् फालं न विषं न तुलां तथा।

इति, तच्चरित्रादितो मध्यमपुरुषा ये भवन्ति तेषां प्रतिषेधार्थम्। अधमानां सहस्रादर्वागपहारेऽपह्नवे वा महाभियोगाभावात्। एवंचोत्तमानां द्विसहस्रादर्वागल्पाभियोगत्वाद्धटादिप्रतिषेधोऽव-गन्तव्यः। यत्पुनः पितामहेनोक्तम्—

सहस्रे तु धटं दद्यात् सहस्रार्धे तथाऽऽयसम्।
अर्धस्यार्धे तु सलिलं तस्यार्धे तु विषं स्मृतम्॥

इति, तत् प्राग्दृष्टदोषपुरुषविषयम्। यदाह विष्णुः—

'प्राग्दृष्टदोषं स्वल्पेऽप्यर्थे दिव्यानामन्यतममेव कारयेत्' इति। एवं चोत्तमस्यापि प्राग्दृष्टदोषस्य सहस्रे चतुर्गुणात् स्वल्पेऽर्थे धटो भवतीति पितामहवचनस्य तात्पर्यार्थः प्रत्येतव्यः। एवं नृपद्रोहेषु महापातकाभियोगे च स्वल्पेऽप्यर्थे दिव्यानि भवन्तीत्याह याज्ञवल्क्यः—

नृपार्थेष्वभिशापे च वहेयुश्शुचयस्सदा।

इति। विष्णुरपि—

'अथ समयक्रिया राजद्रोहे साहसेषु यथाकामम्' इति। समय-क्रिया धटादिदिव्यकरणम्। तथा च गोबलीवर्दन्यायेन धटादि-कमेवात्राह बृहस्पतिः—

एते तु शपथाः प्रोक्ताः स्वल्पेऽर्थे सुकरास्सदा ।
साहसेष्वभिशापेषु दिव्यान्याहुर्विशोधनम् ॥

इति । एवंच साहसादौ सत्यादयः शपथाः कदाचिदपि न भवन्तीति मन्तव्यम् । अपहारेऽपि व्यावहारिकनिष्कसङ्ख्यया व्यवस्था व्याख्यास्यते—

उत्तमस्य पुरुषस्य पञ्चाशन्निष्कप्रभृति विषम्, निष्कार्धाधिकसप्तत्रिंशन्निष्कप्रभृत्यग्निः, यवोनसप्तकृष्णलाधिकत्रयस्त्रिंशन्निष्कप्रभृति जलम्, पञ्चविंशन्निष्कप्रभृति घटः, विंशतिनिष्कप्रभृति तप्तमाषः, पञ्चदशनिष्कप्रभृति तण्डुलाः, निष्कार्धाधिकसप्तनिष्कप्रभृति कोशः, पञ्चनिष्कप्रभृति धर्मजं दिव्यम्, गोव्यक्तिचतुष्टयप्रभृति फालम् ।

मध्यमस्य तु पुरुषस्य पञ्चविंशतिनिष्कप्रभृति विषम्, सपादनिष्कोनविंशतिनिष्कप्रभृत्यग्निः, यवसहितत्रयोदशकृष्णलाधिकषोडशनिष्कप्रभृति जलम्, निष्कार्धाधिकद्वादशनिष्कप्रभृति घटः, दशनिष्कप्रभृति तप्तमाषः, निष्कार्धाधिकसप्तनिष्कप्रभृति तण्डुलाः,निष्कपादोनचतुर्निष्कप्रभृति कोशः, सार्धद्विनिष्कप्रभृति धर्मजं दिव्यं, गोव्यक्तिद्वयप्रभृति फालम् ।

निकृष्टस्य तु पुरुषस्य सार्धद्वादशनिष्कप्रभृति विषम्, सार्धसप्तकृष्णलाधिकनवतिनिष्कप्रभृत्यग्निः, यवोनसप्तकृष्णलाधिकाष्टनिष्कप्रभृति जलं, सपादषण्णिष्कप्रभृति घटः, पञ्चनिष्क-

प्रभृति तप्तमाषः, पादोनचतुर्निष्कप्रभृति तण्डुलाः, पादार्धोन द्विनिष्कप्रभृति कोशः, सपादनिष्कप्रभृति धर्मजं दिव्यम्, एक गोव्यक्तिप्रभृति फालम्।

प्राग्दृष्टदोषाणामुक्तावधिभ्योऽल्पधनेऽपि तत्तद्दिव्यंदेयम्। नृपद्रोहाभिशापसाहसेषु च तथैव देयम्। सत्यादिपुष्पादिशपथानां तु व्यवस्थाविशेषस्य अत्रादर्शनादपह्नव इव व्यवस्थाऽऽस्थेया,विष्णुवचने स्मृत्यन्तरवचनेचापह्नव इति विशेषस्मरणाच्चेति॥

इति स्मृतिचन्द्रिकायां धनपरिमाणतो दिव्यव्यवस्था.

अथ विवादिजात्यादितो व्यवस्था.

तत्र बृहस्पतिः—

ऋणादिकेषु कार्येषु विसंवादे परस्परम्।
द्रव्यसङ्ख्यान्विता देया पुरुषापेक्षया तथा॥

पुरुषापेक्षया विवादिनोर्जात्याद्यपेक्षयेत्यर्थः। तत्र जात्यपेक्षया व्यवस्थामाह नारदः—

ब्राह्मणस्य धटो देयः क्षत्रियस्य हुताशनः।
वैश्यस्य सलिलं देयं शूद्रस्य विषमेव तु॥
साधारणस्समस्तानां कोशः प्रोक्तो मनीषिभिः॥

इति। अनित्या चेयं व्यवस्था। यदाह कात्यायनः—

सर्वेषु सर्वदिव्यं वा विषवर्जं द्विजोत्तमे।

इति। लिङ्गसामर्थ्याभाववयोभ्योपि व्यवस्थामाह नारदः—

क्लीबातुरान् सत्यहीनान् परितश्चार्दितान्नरान्।

बालवृद्धस्त्र्यन्धकांश्च परीक्षेत धटे सदा ॥

नित्या त्वियं व्यवस्था, सदेत्यभिधानात्। धटग्रहणमग्न्यम्बुविषाणां परिसङ्ख्यानार्थं, न पुनः कोशादेरपि। यदाह स एव—

स्त्रीणां तु न विषं प्रोक्तं न चापि सलिलं स्मृतम्।
धटकोशादिभिस्तासामन्तस्तत्त्वं विचारयेत् ॥

इति। धटकोशादिभिरिति वदन्नग्नेरपि प्रतिषेधं दर्शयति। दर्शितं च साक्षादपि तेन—

न मज्जनीयं स्त्रीबालं धर्मशास्त्रविचक्षणैः।
रोगिणो येच वृद्धाः स्युः पुमांसो ये च दुर्बलाः ॥
साहसेऽप्यागतानेतान्नैव तोये निमज्जयेत्।
न चापि हारयेदग्निं न विषेण विशोधयेत् ॥

इति। यत्पुनः पितामहेनोक्तं—

सव्रतानां कृशाङ्गानां बालवृद्धतपस्विनाम्।
स्त्रीणां तु न भवेद्दिव्यं यदि धर्मस्त्ववेक्ष्यते ॥

इति, तदग्न्यम्बुविषयं, धटकोशादीनामपि प्रतिषेधे पूर्वोक्तवचनविरोधात्। एवंच क्लीबादीनामग्न्यम्बुविषवर्ज्यानि दिव्यानि भवन्तीत्यनुसन्धेयम्। तथा लोहकारादीनामपि न सर्वाणि दिव्यानि भवन्तीत्याह कात्यायनः—

न लोहशिल्पिनामग्निं सलिलं नाम्बुसेविनाम्।
मन्त्रयोगविदां चैव विषं दद्याच्च न क्वचित् ॥
तण्डुलैर्न नियुञ्जीत व्राणिनं मुखरोगिणम् ॥

इति । पितामहोपि—

कुष्ठिनां वर्जयेदग्निं सलिलं श्वासकासिनाम् ।
पित्तश्लेष्मवतां नित्यं विषं तु परिवर्जयेत् ॥
मद्यपस्त्रीव्यसनिनां कितवानां तथैव च ।
कोशः प्राज्ञैर्न दातव्यो ये च नास्तिकवृत्तयः ॥

इति । नारदोपि—

महापराधे निर्धर्मे कृतघ्ने क्लीबकुत्सिते ।
नास्तिके दृष्टदोषे च कोशदानं विवर्जयेत् ॥

महापराधे पूर्वसिद्धमहापराधशालिनीत्यर्थः । एवञ्च क्लीबस्य अग्न्यादिवत् कोशोपि वर्ज्य इत्यनुसन्धेयम् । यत्पुनः कात्यायनेनोक्तं—

मातापितृद्विजगुरुबालस्त्रीराजघातिनाम् ।
महापातकयुक्तानां नास्तिकानां विशेषतः ॥
लिङ्गिनां प्रशठानां तु मन्त्रयोगक्रियाविदाम् ।
वर्णसङ्करजातानां पापाभ्यासप्रवर्तिनाम् ॥
एतेष्वेवाभियोगेषु निन्द्येष्वेव च यत्नतः ।
दिव्यं प्रकल्पयेन्नैव राजा धर्मपरायणः ॥

इति, तत्तेषां साक्षाद्दिव्यकर्तृत्वनिषेधार्थं, न पुनर्दिव्येन परीक्षायाः । यतोऽनन्तरमेवोक्तं तेनैव—

एतैरेव नियुक्तानां साधूनां दिव्यमर्हति ।

नेच्छन्ति साधवो यत्र तत्र शोध्यस्स्वकैर्नरैः ॥

इति । दिव्यमर्हति राजा कल्पयितुमिति शेषः । तथाच स एव—

एषु वादेषु दिव्यानि प्रतिषिद्धानि यत्नतः ।
कारयेत् स्वजनैस्तानि नाभिशप्तं त्यजेन्मनुः ॥

त्यजेत् उक्तप्रकारेण विशोधयेदिति शेषः । यत्पुनस्तेनोक्तं—

अस्पृश्यधनदासानां म्लेच्छानां पापकारिणाम् ।
प्रातिलोम्यप्रसूतानां निश्चयो न तु राजनि ॥
तत्प्रसिद्धानि दिव्यानि संशये तेषु निर्दिशेत् ।

इति, तत्तैर्नियुक्तस्वजनालाभविषयमित्यवगन्तव्यम् ।

इति स्मृतिचन्द्रिकायां विवादिजात्यादितो दिव्यव्यवस्था

अथर्तुतो दिव्यव्यवस्था

तत्र पितामहः—

धटस्सर्वर्तुकः प्रोक्तो वाते वाति विवर्जयेत् ।
अग्निश्शिशिरहेमन्तवर्षासु परिकीर्तितः ॥
शरद्ग्रीष्मे तु सलिलं हेमन्ते शिशिरे विषम् ॥

इति । धटग्रहणं कोशस्यापि प्रदर्शनार्थम् । कोशस्तु सर्वदा देयः 'तुला स्यात्सार्वकालिको' इति नारदस्मरणात् । कोशग्रहणं तण्डुलप्रभृतीनां प्रदर्शनार्थमित्युक्तं तद्व्याख्यातृभिः । तेनाग्न्यम्बु-

विषाणामेवर्तुतो व्यवस्था । अत एव तेषामेव ऋत्वन्तरप्रतिषेधस्तेन दर्शितः—

न शीते तोयसिद्धिस्स्यात् नोष्णकालेऽग्निशोधनम् ।
न प्रावृषि विषं दद्यात्प्रवाते न तुलां नृपः ॥

इति । प्रवाते वातातिशय इत्यर्थः । विष्णुरपि—
'न कुष्ठ्यसमर्थलोहकाराणामग्निर्देयः, शरद्ग्रीष्मयोश्च न कुष्ठिपैत्तिकब्राह्मणानां विषं देयं, प्रावृषि च न श्लेष्मव्याध्यर्दितानां भीरूणां श्वासकासिनामम्बुजीविनां चोदकं, हेमन्तशिशिरयोश्च न नास्तिकेभ्यः कोशो देयः व्याधिमरणोपसृष्टे च' इति । हेमन्तग्रहणं पुष्यमासस्य प्रतिषेधार्थं, न पुनर्मार्गशीर्षस्यापि, तस्य शीतातिशयाभावेनोदकदिव्यविरोधित्वाभावात् । अत्र पितामहः—

चैत्रो मार्गशिराश्चैव वैशाखश्च तथैव च ।
एते साधारणा मासा दिव्यानामविरोधिनः ॥

इति । अत एते मासास्सर्वदिव्यकाला भवन्तीत्यर्थः ।

इति स्मृतिचन्द्रिकायां ऋतुतो दिव्यव्यवस्था.

अथ दिव्यदेशाः.

तत्र पितामहः—

प्राङ्मुखो निश्चलः कार्यः शुचौ देशे धटस्सदा ।
इन्द्रस्थाने सभायां वा राजद्वारे चतुष्पथे ॥

इन्द्रस्थानं प्रख्यातदेवतायतनम्। 'सभा राजकुलद्वारदेवायतन-चत्वरे' इति नारदस्मरणात्। अत्रव्यवस्थामाह कात्यायनः—

इन्द्रस्थानेऽभिशस्तानां महापातकिनां नृणाम्।
नृपद्रोहप्रवृत्तानां राजद्वारे प्रयोजयेत्॥
प्रातिलोम्यप्रसूतानां दिव्यं देयं चतुष्पथे।
अतोऽन्येषु तु कार्येषु सभामध्ये विदुर्बुधाः॥

इति। दिव्यमिति सामान्येनाभिधानात् घटस्यैवेयं देशव्यवस्था, किंत्वनुक्तदेशविशेषाणामन्येषामपीत्यवगन्तव्यम्। विहितदेशाद्य-नादरे दिव्यप्रामाण्यहानिर्भवतीत्याह स एव—

अदेशकालदत्तानि बहिर्वासकृतानि च।
व्यभिचारं सदाऽर्थेषु कुर्वन्तीह न संशयः॥

वासः निवासः जनस्थानं, तस्माद्बहिः निर्जनप्रदेश इति या-वत्। अनेन जनसमक्षमेव दिव्यानि देयानीत्यर्थादुक्तम्। उक्तं च पितामहेन—

प्रत्यक्षं दापयेद्दिव्यं राजा वाऽधिकृतोपि वा।
ब्राह्मणानां श्रुतवतां प्रकृतीनां तथैव च॥

अधिकृतः प्राड्विवाकः।

इति स्मृतिचन्द्रिकायां दिव्यदेशाः.

अथ घटनिर्माणविधिः.

तत्र नारदः—

खादिरं कारयेत्तत्र निर्व्रणं शुक्रवर्जितम् ।
शिंशुपां तदलाभे तु सालं वा कोटरैर्विना ॥
अञ्जनस्तिन्दुकीसारं निमिशो रक्तचन्दनम् ।
एवंविधानि काष्ठानि घटार्थं परिकल्पयेत् ॥

इति । एवंविधानीति वदन् पूर्वोक्तानामलाभे यज्ञियं वृक्षान्तरमपि भवतीति दर्शयति । दर्शितं च पितामहेन—

छित्वा तु यज्ञियं वृक्षं विधिवन्मन्त्रपूर्वकम् ।
प्रणम्य लोकपालेभ्यस्तुला कार्या मनीषिभिः ॥
मन्त्रस्सौम्यो वानस्पत्यश्छेदने जप्य एव तु ।

इति । सौम्यवानस्पत्ययोर्विकल्पः तुल्यकार्यत्वादिति कैश्चिदुक्तम् । तुलाग्रहणं तत्परिकरस्यापि प्रदर्शनार्थं, तेन पादस्तम्भाद्यर्थमपि वृक्षच्छेदनं कार्यम् । अत एव सपरिकरायास्तुलायाः प्रमाणमुक्तं तेनैव—

चतुर्हस्ता तुला कार्या पादौ कार्यौ तथाविधौ ।
अन्तरं तुलयोर्हस्तौ भवेदध्यर्ध एव वा ॥

पादौ तुलाधारकाष्ठाधारार्थौ स्तम्भौ, तथाविधौ चतुर्हस्तप्रमाणावित्यर्थः । एतच्च पादयोः प्रमाणं निखननीयहस्तद्वयादुपरितनभागस्य वेदितव्यम् । अतो निखननीयभागेन सह षड्ढस्तौ भवतः । तथाच व्यासः—

हस्तद्वयं निखेयं तु प्रोक्तं मुण्डकयोर्द्वयोः ।
षड्ढस्तं तु तयोः प्रोक्तं प्रमाणं परिमाणतः ॥

अक्षस्य तु प्रमाणं पादयोरन्तराळाभिधानेनैवार्थसिद्धमिति न पृथगुक्तम् । तेन पादस्तम्भमस्तकदेशात् बहिरनिस्सृतो यथा-भवति तथा हस्तद्वयात् सार्धहस्ताद्वाऽभ्यधिकोक्षः कार्य इत्यवग-न्तव्यम् । हस्तः पुनश्चतुर्विंशत्यङ्गुल इति स्मृत्यन्तरे दर्शितः—

तिर्यग्यवोदराण्यष्टावूर्ध्वा वा व्रीहयस्त्रयः ।
प्रमाणमङ्गुलस्योक्तं वितस्तिर्द्वादशाङ्गुला ॥
हस्तो वितस्तिद्वितयम् .

इति । यावति तु स्थौल्ये कृते दार्ढ्यं भवति तावत् स्थौल्यं तुलादीनां कार्यं, विशेषास्मृतेः । आचाराद्वा विशे-षस्स्थौल्ये वेदितव्यः । तुलायां त्वपरे विशेषाः पितामहेन दर्शिताः—

चतुरश्रा तुला कार्या दृढा ऋज्वी तथैव च ।
कटकानि च देयानि त्रिषु स्थानेषु यत्नतः ॥

कटकानि लोहवलयानि । त्रिषु स्थानेषु उपान्तयोर्मध्ये च । कटकानीत्ययोमयानामन्येषामप्युपलक्षणार्थं, तेनोपान्तयोराय-सकीलकौ शिक्यपाशधारणार्थाविषुवद्वक्राग्रौ कर्कटकशृङ्गसंनिभौ देयौ । मध्ये त्वायसपाशोऽक्षकाष्ठे तुलायोजनार्थो देयः । तथाच नारदः—

चतुरश्रा स्थितिस्थानैर्घटकर्कटकादिभिः ।

इति । घटशब्देनात्र तुलामध्यसम्बन्धी पाशो लक्ष्यते । कर्कटक-शब्देनात्र उपान्त्यकीलकौ सादृश्यादुच्येते । तेनायमर्थः—अयोमयैः पाशप्रभृतिभिः स्थितिहेतुभिस्तुलायां भवितव्यमिति । आदिशब्देनाक्षमध्येऽप्येकेन कर्कटकेन भवितव्यमिति दर्शयति । तथा स्तम्भादिस्थापनप्रकारोपि तेन दर्शितः—

दक्षिणोत्तरसंस्थानावुभावेकाग्र (कत्र) संयतौ ।
अन्तौ कृत्वा समे देशे तयोस्संस्थापयेत्तुलाम् ॥

अस्यार्थः—
समायां भूमौ दक्षिणोत्तरभावेन स्थितयोः पादस्तम्भयोरुभावन्तौ एकत्र अक्षकाष्ठे संघटितौ कृत्वा तयोः घटकाक्षकाष्ठमध्ये तुलां स्थापयेदिति । स्थापनं च तत्र कथं कार्यमित्यपेक्षिते स एवाह—

आयसेन तु पाशेन मध्ये संगृह्य धर्मवित् ।
योजयेत्तु सुसंयुक्तां तुलां प्रागपरायताम् ॥

प्रागपरायतां पूर्वपश्चिमदीर्घामित्यर्थः । प्रागग्रता च कार्येत्याह पितामहः—

प्राङ्मुखो निश्चलः कार्यश्शुचौ देशे घटस्सदा ।

इति । निश्चलत्वसिध्यर्थमाह नारदः—

हस्तद्वयं निखेयं तु पादयोरुभयोस्तथा ।

इति । तथेति वदन् अन्यदपि किंचिद्धटाङ्गभूतं तोरणादिकं कार्यमिति दर्शयति । दर्शितं च पितामहेन—

तोरणे तु तथा कार्ये पार्श्वयोरुभयोरपि ।
घटादुच्चतरे स्यातां नित्यं दशभिरङ्गुलैः ॥
अवलम्बौ च कर्तव्यौ तोरणाभ्यामधोमुखौ ।
मृन्मयौ सूत्रसम्बद्धौ घटमस्तकचुम्बकौ ॥
घटं तु कारयेन्नित्यं पताकाध्वजशोभितम् ।
विशालामुच्छ्रितां शुभ्रां घटशालां तु कारयेत् ॥
यत्रस्थो नोपहन्येत बहिश्चण्डालवायसैः ।
तत्रैव लोकपालादीन् सर्वदिक्षु निवेशयेत् ॥
त्रिसन्ध्यं पूजयेच्चैनान् गन्धमाल्यानुलेपनैः ।
कवाटवीजसंयुक्तां परिचारकरक्षिताम् ॥
मृत्पानीयाग्निसंयुक्तामशून्यां कारयेन्नृपः ॥

इति । अत्र शालारचनादिकं घटधारणप्रयुक्तमेव नोत्पत्तिप्रयुक्तमिति, धारणानिच्छायामननुष्ठेयमेवेति कैश्चिदुक्तम् ॥

इति स्मृतिचन्द्रिकायां घटनिर्माणविधिः.

अथ सर्वदिव्यसाधारणविधिः.

तत्र बृहस्पतिः—

स्नेहात्क्रोधाल्लोभतो वा भेदमायान्ति साक्षिणः ।
विधिदत्तस्य दिव्यस्य न भेदो जायते क्वचित् ॥

अतो दिव्यं विधिवद्देयमित्यभिप्रायः । विधिश्च पितामहेन दर्शितः—

दिव्येषु सर्वकार्याणि प्राड्विवाकस्समाचरेत् ।
अध्वरेषु यथाऽध्वर्युस्सोपवासो नृपाज्ञया ॥

सर्वकार्याणि साधारणान्यसाधारणानि चेत्यर्थः । तत्र साधारणानि तेनैव दर्शितानि—

तत आवाहयेद्देवान्विधिनाऽनेन धर्मवित् ।

इति । अनेन वक्ष्यमाणेनेत्यर्थः । तमेव विधिं दर्शयति—

प्राङ्मुखः प्राञ्जलिर्भूत्वा प्राड्विवाकस्ततो वदेत् ।
एह्येहि भगवन् धर्म अस्मिन् दिव्ये समाविश ।
सहितो लोकपालैश्च वस्वादिसमरुद्गणैः ॥

इति । ततः दिव्योपकल्पनानन्तरमित्यर्थः । अस्मिन् दिव्य इति मन्त्रलिङ्गात्,

आवाह्य तु घटे धर्मं पश्चादङ्गानि विन्यसेत् ।

इति तेनैवाभिधानाच्च । घटग्रहणमुपकल्पितदिव्योपलक्षणार्थं, सर्वदिव्येषु धर्मावाहनस्याङ्गविन्यासस्य च वक्ष्यमाणत्वात् । अङ्गानि विन्यसेदित्यस्यार्थः तेनैव दर्शितः—

इन्द्रं पूर्वे तु संस्थाप्य प्रेतेशं दक्षिणे तथा ।
वरुणं पश्चिमे भागे कुवेरं चोत्तरे तथा ॥
अग्न्यादिलोकपालांश्च कोणभागेषु विन्यसेत् ।
इन्द्रः पीतो यमश्श्यामो वरुणः स्फटिकप्रभः ॥
कुवेरस्तु सुवर्णाभः ह्यग्निश्चापि सुवर्णभः ।
तथैव निरृतिश्श्यामो वायुर्धूम्रः प्रशस्यते ॥

ईशानस्तु भवेद्रक्त एवं ध्यायेत्क्रमादिमान् ।
इन्द्रस्य दक्षिणे पार्श्वे वसूनावाहयेद्बुधः ॥

धरो ध्रुवस्तथा सोम आपश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः ॥

देवेशेशानयोर्मध्य आदित्यानां तथाऽयनम् ।
धाताऽर्यमा च मित्रश्च वरुणोंऽशुर्भगस्तथा ॥

इन्द्रो विवस्वान् पूषा च पर्जन्यो दशमः स्मृतः ।
ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः ॥

इत्येते द्वादशादित्या नामभिः परिकीर्तिताः ।
अग्नेः पश्चिमभागे तु रुद्राणामयनं विदुः ॥

वीरभद्रश्च शम्भुश्च गिरिशश्च महायशाः ।
अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः ॥
भुवनाधीश्वरश्चैव कपाली च विशांपतिः ।
स्थाणुर्भगश्च भगवान् रुद्रास्त्वेकादश स्मृताः ॥
प्रेतेशरक्षोमध्ये च मातृस्थानं प्रकल्पयेत् ।
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ॥
वाराही चैव माहेन्द्री चामुण्डा गणसंयुता ।
निर्ऋतेरुत्तरे भागे गणेशायतनं विदुः ॥
वरुणस्योत्तरे भागे मरुतां स्थानमुच्यते ।
गगनस्पर्शनो वायुरनिलो मारुतस्तथा ॥

प्राणः प्राणेशजीवौ च मरुतोऽष्टौ प्रकीर्तिताः ।
घटस्योत्तरभागे तु दुर्गामावाहयेद्बुधः ॥

इति । अत्रापि पूर्ववद्घटग्रहणमुपकल्पितदिव्योपलक्षणार्थम् । एवं यथास्थानमावाहितानां देवानां पूजनं कुर्यात् । तथाच स एव—

एतासां देवतानां तु स्वनाम्ना पूजनं विदुः ।

इति । तत्र च क्रममाह स एव—

भूषावसानं धर्माय दत्वा चार्घ्यादिकं क्रमात् ।
अर्घ्यादि पश्चादङ्गानां भूषान्तमुपकल्पयेत् ॥

अङ्गीनां इन्द्रादिदुर्गान्तानामित्यर्थः । तेषामर्घ्याद्युपकल्पनं पदार्थानुसमयेन कार्यं, न काण्डानुसमयेन, तथात्वे प्रयोगवचनावगतसहत्वबाधापत्तेः । दुर्गायै भूषणं दत्वा धर्मस्येन्द्रादिदुर्गान्तानां च गन्धादिपरिचर्यां पूर्ववत्कुर्यात् । तथाच स एव—

गन्धादिकां निवेद्यान्तां परिचर्यां प्रकल्पयेत् ।

इति । ततश्चतसृषु दिक्षु चतुर्भिर्होमः कर्तव्यः । तथाच स एव—

चतुर्दिक्षु तथा होमः कर्तव्यो वेदपारगैः ।
आज्येन हविषा चैव समिद्भिर्होमसाधनैः ॥
सावित्र्या प्रणवेनाथ स्वाहान्तेनैव होमयेत् ।

इति । लौकिकमग्निं चतुर्दिक्षु प्रतिष्ठाप्यैकैकस्यां दिश्येकैकः ऋत्विक् समिदाज्यचरून् प्रत्येकमष्टोत्तरशतं तत्सवितुरिति

मन्त्रेणोभयतः प्रणवेन स्वाहाकारान्तेन जुहुयादित्यर्थः। यद्य प्यत्र सङ्ख्या नोक्ता, तथाऽपि,—

अनुक्तसङ्ख्या यत्र स्याच्छतमष्टोत्तरं स्मृतम्।

इति स्मृत्यन्तरात् सिद्धेत्यवधेयम्। एतत्सर्वं पूर्वाह्णे कर्तव्यं तस्य प्रधानकालत्वात्। तथाच नारदः—

अहोरात्रोषिते स्नाते आर्द्रवाससि मानवे।
पूर्वाह्णे सर्वदिव्यानां प्रदानमनुकीर्तितम्॥

यत्तु याज्ञवल्क्येनोक्तं—

सचेलस्नातमाहूय सूर्योदय उपोषितम्।
कारयेत्सर्वदिव्यानि नृपब्राह्मणसंनिधौ॥

इति। तत्र सूर्योदयपदेन पूर्वाह्ण एव वचोभङ्ग्या विहित इत्यवगन्तव्यम्। पूर्वाह्णश्चादित्यवारान्वित एव ग्राह्यः, शिष्टाचारबलात्। होमादनन्तरं पितामहः—

यं चार्थमभियुक्तस्स्याल्लिखित्वा तं तु पत्रके।
मन्त्रेणानेन सहितं तत्कार्यं तु शिरोगतम्॥

अनेन वक्ष्यमाणेनेत्यर्थः। तमेव मन्त्रं दर्शयति—

आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्मश्च जानाति नरस्य वृत्तम्॥

इति। अयं च विधिः सर्वदिव्यसाधारण इत्याह स एव—

इमं मन्त्रविधिं कृत्स्नं सर्वदिव्येषु योजयेत्।
आवाहनं च देवानां तथैव परिकीर्तितम्॥

धर्मावाहनादि शोध्यशिरसि पत्रारोपणान्तं सर्वदिव्येषु कर्तव्यमित्यर्थः। तथा सर्वदिव्येषु प्रयोगावसाने ऋत्विगादिभ्यो दक्षिणां तुष्टिकरीं दद्यात्॥ तथाच स एव—

ऋत्विक्पुरोहिताचार्यान् दक्षिणाभिश्च तोषयेत्॥ इति॥

इति स्मृतिचन्द्रिकायां सर्वदिव्यसाधारणविधिः.

अथ धटारोपणविधिः.

तत्र नारदः—

शिक्यद्वयं समासज्य धटकर्कटयोर्दृढम्।
एकत्र शिक्ये पुरुषमन्यत्र तुलयेच्छिलाम्॥

विधिवन्निर्मितधटकर्कटकद्वये शिक्यद्वयपाशौ समासज्येत्यर्थः। शिलाग्रहणं मृदादेरुपलक्षणार्थम्। अत एव पितामहः—

शिक्यद्वयं समासज्य पार्श्वयोरुभयोरपि।
प्रागग्रान् कल्पयेद्दर्भान् शिक्ययोरुभयोरपि॥
पश्चिमे तोलयेत्कर्तृनन्यस्मिन्मृत्तिकां शुभाम्।
इष्टकाभस्मपाषाणकपालास्थिविवर्जिताम्॥

इति। इष्टकापाषाणयोर्मृदा सह समुच्चयो निवार्यते, न तु विकल्पः, तयोरपि विहितत्वात्। तथाच नारदः—

पिटकं पूरयेत्तस्मिन्निष्टकाग्रावपांसुभिः ।

इति । इष्टकाभिः ग्रावभिः पांसुभिर्वेत्यर्थः । मापैर्वा पिटकं पूरयेत्, 'मापराशिमथापि वा' इति स्मृत्यन्तरवचनात् । एवंच शिलामृत्तिकेष्टकाग्रावपांसुमापाणां प्रतिमानत्वे विकल्पो वेदितव्यः । अत एव नारदेनोक्तं—

मृत्पिण्डमभिशस्तं च तुलायां धारयेत्समम् ।
धारयेदुत्तरे पार्श्वे पुरुषं दक्षिणे शिलाम् ॥

इति । उत्तरे पार्श्व इत्येतद्दक्षिणोदगायतत्वेन निर्मिततुलाविषयम् । यद्यपि तथा निर्माणं पूर्वमनुपदिष्टं, तथाऽप्यस्मादेव वचनात् पूर्वापरसंस्थानौ पादस्तम्भौ कृत्वोदगग्रा तुला कदाचित् कार्येत्यर्थात्सिद्धमिति न कश्चिद्विरोधः । तुलां धारयेद्वणिगादीनामन्यतम इति शेषः । तथाच विष्णुः—"तां च वणिक्सुवर्णकारकांस्यकाराणामन्यतमो बिभृयात्" इति । तां तुलामित्यर्थः । अन्यतमेन धृतायाः समतानिरीक्षणार्थं राज्ञा ते सर्वे नियोक्तव्याः । तथाच पितामहः—

परीक्षका नियोक्तव्याः तुलामानविशारदाः ।
वणिजो हेमकाराश्च कांस्यकारास्तथैव च ॥

नियुक्ताश्च समतां निरीक्षेरन् । तथाच नारदः—

सुवर्णकारा वणिजः कुशलाः कांस्यकारकाः ।
तां तुलामन्ववेक्षेरन् तुलाधारणकोविदाः ॥

निरीक्षकान् प्रत्याह पितामहः —

कार्यः परीक्षकैर्नित्यमवलम्बसमो घटः ।
उदकं च प्रदातव्यं घटस्योपरि पण्डितैः ॥
यस्मिन्न प्लवते तोयं स विज्ञेयः समो घटः ॥

इति । तोरणयोर्लम्बमानौ मृण्मयाववलम्बौ तयोस्सम्बन्धः कटकद्वयोपरिभागेन समो यस्य सोऽवलम्बसमो घटः । तथाच नारदः —

प्रथमारोहणे ग्राह्यं प्रमाणं निपुणैस्सह ।
तुलाशिरोभ्यां तुल्यं तु तोरणन्यस्तलक्षणम् ॥

समताऽवधारणानन्तरं विष्णुः—“ प्रतिमानपुरुषौ समधृतौ सुचिह्नितौ कृत्वा पुरुषमवतारयेत् ” इति । सुचिह्नितौ समतादशायां येष्ववयवेषु शिक्यरज्जवस्संयुक्तास्तत्र तत्र पाण्डुरेखाङ्कितावित्यर्थः । अवतारणानन्तरं पितामहः—

तोलयित्वा नरं पूर्वं पश्चात्तमवतार्य तु ।
घटं तु कारयेन्नित्यं पताकाध्वजशोभितम् ॥

इति । एवमुपकल्पनानन्तरं धर्मावाहनादि शोध्यशिरसि पत्रारोपणान्तं सर्वदिव्यसाधारणविधिं कुर्यात् । तथाच स एव—

इमं मन्त्रविधिं कृत्स्नं सर्वदिव्येषु योजयेत् ।
आवाहनं च देवानां तथैव परिकल्पयेत् ॥

इति । तत्र धर्माराधनसाधनेषु विशेषमाह नारदः—

रक्तैर्गन्धैश्च माल्यैश्च दध्यपूपाक्षतादिभिः ।
अर्चयेत्तु घटं पूर्वं ततश्शिष्टांस्तु पूजयेत् ॥

इति । घटं घटाधिष्ठितं धर्मं, शिष्टान् इन्द्रादीन् । शोध्यशिरसि पत्रारोपणानन्तरं पितामहः—

घटमामन्त्रयेच्चैवं विधिनाऽनेन शास्त्रवित् ।
त्वं घट ब्रह्मणा सृष्टः परीक्षार्थं दुरात्मनाम् ॥
धकाराद्धर्ममूर्तिस्त्वं टकारात्कुटिलं नरम् ।
धृतो भावयसे यस्माद्धटस्तेनाभिधीयसे ॥

इति । शास्त्रवित् प्राड्विवाकः,

दिव्येषु सर्वकार्याणि प्राड्विवाकस्समाचरेत् ।

इति तेनैवोक्तत्वात् । ततः शोध्योपि तं घटमामन्त्रयेत् । तथाच याज्ञवल्क्यः—

तुलाधारणविद्वद्भिरभियुक्तस्तुलाश्रितः ।
प्रतिमानसमीभूतो रेखां कृत्वाऽवतारितः ॥
त्वं तुले सत्यधामाऽसि पुरा देवैर्विनिर्मिता ।
तत्सत्यं वद कल्याणि संशयान्मां विमोचय ॥
यद्यस्मि पापकृन्मातः ततो मां त्वमधो नय ।
शुद्धश्चेद्गमयोर्ध्वं मां तुलामित्यभिमन्त्रयेत् ॥

इति । त्वं तुले इत्यादिना ऊर्ध्वं मामित्यन्तेन मन्त्रेण पुनरारोपणात् प्राक्तुलामभिमन्त्रयेत् शोध्य इत्यर्थः । ततस्तं प्राड्विवाकः पुनरारोपयेत् ।

तथाच नारदः—

समयैः परिगृह्याथ पुनरारोपयेन्नरम् ।
निवाते वृष्टिरहिते शिरस्यारोप्य पत्रकम् ॥

समयैः परिगृह्य तुलाधारकं शपथैर्नियम्येत्यर्थः । शपथाश्च तेनैव दर्शिताः—

ब्रह्मघ्नो ये स्मृता लोका ये लोकाः कूटसाक्षिणः ।
तुलाधारस्य ये लोकास्तुलां धारयतो मृषा ॥

इति । पुनरारोपणानन्तरं नारदः—

तस्मिन्नेव कृते लक्ष्ये लक्ष्यं कृत्वा द्विजोत्तमः ।
धर्मपर्यायशब्देन धट इत्यभिधीयसे ॥
त्वं वेत्सि सर्वभूतानां पापानि सुकृतानि च ।
त्वमेव देव जानीषे न विदुर्यानि मानवाः ॥
व्यवहाराभिशस्तोऽयं मानवस्तोल्यते त्वया ।
तदेनं संशयारूढं धर्मतस्त्रातुमर्हसि ॥
देवासुरमनुष्याणां सत्ये त्वमतिरिच्यसे ।
सत्यसन्धोसि भगवञ्छुभाशुभविभावनैः ॥

आदित्यचन्द्रावनिलोऽनलश्च ।
द्यौर्भूमिरापो हृदयं यमश्च ॥
अहश्च रात्रिश्च उभे च सन्ध्ये ।
धर्मश्च जानाति नरस्य वृत्तम् ॥

इति। शोध्यं शिक्ये यथासंनिवेशं निधाय धर्मेत्यादि वृत्तमित्यन्तं प्राड्विवाको वदेदित्यर्थः । मन्त्रोच्चारणानन्तरं पितामहः—

ज्योतिर्वित् ब्राह्मणश्रेष्ठः कुर्यात्कालपरीक्षणम् ।
विनाड्यः पञ्च विज्ञेयाः परीक्ष्याः कालकोविदैः ॥
साक्षिणो ब्राह्मणश्रेष्ठाः यथादृष्टार्थवादिनः ।
ज्ञानिनः शुचयोऽलुब्धाः नियोक्तव्याः नृपेण तु ॥
तेषां वचनतो गम्यश्शुद्ध्यशुद्धिविनिर्णयः ॥

इति । त्रिशतगुर्वक्षरोच्चारणकालः पञ्चविनाड्यात्मको भवति । तथाच स्मृत्यन्तरं—

दशगुर्वक्षरः प्राणः षट्प्राणस्स्याद्विनाडिका ।

इति । एवंच ज्योतिर्विद्ब्राह्मणो गुर्वक्षरोच्चारणेन पञ्चविनाड्यात्मककालमानं कुर्यात् । शोध्यस्तावत्कालं तुलामारुह्यासीत । तस्मिन् काले जयपराजयलक्षणैश्शुद्ध्यशुद्धिविनिर्णयं नियुक्तास्साक्षिणः कुर्युरिति पूर्वोक्तवचनानामर्थः प्रत्येतव्यः । कानि पुनर्जयपराजयलक्षणानीत्यपेक्षिते नारदः—

तुलितो यदि वर्धेत विशुद्धस्स्यान्न संशयः ।
समो वा हीयमानो वा न विशुद्धो भवेन्नरः ॥

यत्पुनः पितामहेनोक्तं—

हीयमानो न शुद्धः स्यादेकेषां तु समोऽशुचिः ।
अल्पपापस्समो ज्ञेयो बहुपापस्तु हीयते ॥

इति । तत्रैकेषामिति पूजनार्थं, न तु स्वमते समस्थशुद्धित्वद्योतनार्थम् । अल्पपापिनोप्यशुचित्वात् । तेन हीयमानसमयोः पराजये न कश्चिद्विशेषः । दण्डे प्रायश्चित्ते च परं विशेषः, दण्डप्रायश्चित्तयोर्दोषानुसारित्वात् । यत्तूक्तं बृहस्पतिना—

धटेऽभियुक्तस्तुलितो हीनश्चेद्धानिमाप्नुयात् ।
तत्समस्तु पुनस्तोल्यो वर्धितो विजयी भवेत् ॥

इति । तस्यायमर्थः—समस्याशुचित्वनिश्चयो न प्रथमतोलनपर्याये कार्यः, किंतु पुनस्तोल्यमानस्य तु यदि समतैव भवति तदानीमशुद्धिरवधारणीयेति । एवं शिक्यच्छेदादावपि पुनस्तोल्यमानस्य शुद्धिरशुद्धिर्वाऽवधारणीया । तथाच कात्यायनः—

शिक्यच्छेदे तुलाभङ्गे तथाऽपि तु गुणस्य वा ।
शुद्धेस्तु संशये चैव परीक्षेत पुनर्नरम् ॥

शुद्धेस्तु संशयो नारदेन प्रपञ्चितः—

तुलाशिरोभ्यामुक्रान्तं विचलं न्यस्तलक्षणम् ।
यदा वायुप्रपन्नोऽसौ गच्छत्यूर्ध्वमधोपि वा ॥
निर्मुक्तस्सहसा वाऽपि तदा नैकतरं व्रजेत् ॥

इति । अयमर्थः— यदा तुलान्तौ तिर्यक् प्रचलितौ, यदा च समताज्ञानार्थंन्यस्तमुदकादि चलितं, यदा च वायुनाप्रेरिता तुला ऊर्ध्वमधश्च कम्पते, यदा च तुला धारकेण

हस्तात्प्रमुच्यते तदा जयं पराजयं वा न निश्चिनुयादिति। यत्पुनस्तेनोक्तं—

कक्ष्यच्छेदे तुलाभङ्गे धटकर्कटयोस्तथा।
रज्जुच्छेदेऽक्षभङ्गे च मूर्छितः शुद्धिमाप्नुयात्॥

इति, तदपरिदृश्यमानकारणकशिक्यच्छेदादिविषयं, दैविकस्यैव शिक्यच्छेदादेः शुद्धिकाणत्वात्। तत्र पितामहः—

शंसन्ति साक्षिणस्सर्वे शुध्यशुद्धी नृपे तथा।
सद्भिः परिवृतो राजा शुद्धमाहूय पूजयेत्॥
ऋत्विक्पुरोहिताचार्यान् दक्षिणाभिश्च तोषयेत्।
एवं कारयिता राजा भुक्त्वा भोगान् मनोरमान्॥
महतीं कीर्तिमाप्नोति ब्रह्मभूयाय कल्पते॥ इति.

इति स्मृतिचान्द्रिकायां धटारोपणविधिः

अथाग्निविधिः.

तत्र पितामहः—

अग्नेर्विधिं प्रवक्ष्यामि यथावच्छास्त्रचोदितम्।
कारयेन्मण्डलान्यष्टौ पुरस्तान्नवमं तथा॥

प्रख्यातदेवतायतनादिविहितदेशे भूशुद्धिमुद्धननावोक्षणाभ्यां कृत्वा तत्र नव मण्डलानि प्रागपवर्गाणि प्राड्विवाकः सोपवासो नृपाज्ञया प्रवृत्तः कुर्यादित्यर्थः। तानि च गोमयेन कार्याणि—

गोमयेन कृतानि स्युरद्भिः पर्युक्षितानि च ॥

इति तेनैव स्मृतत्वात् । तेषामन्तराळपरिमाणे उभे अपि याज्ञवल्क्येन दर्शिते—

षोडशाङ्गुलकं ज्ञेयं मण्डलं तावदन्तरम् ।

इति । मण्डलानि तेषामन्तराळानि च प्रत्येकं षोडशाङ्गुलपरिमाणानि कार्याणीत्यर्थः । मण्डलदेवतास्तु पितामहेन दर्शिताः—

आग्नेयं मण्डलं त्वाद्यं द्वितीयं वारुणं स्मृतम् ।
तृतीयं वायुदेवत्यं चतुर्थं यमदेवतम् ॥
पञ्चमं त्विन्द्रदेवत्यं षष्ठं कौबेरमुच्यते ।
सप्तमं सोमदेवत्यं सावित्रं त्वष्टमं तथा ॥
नवमं सर्वदेवत्यमिति दिव्यविदो विदुः ।

इति । अग्निरत्र पूज्यत इत्याग्नेयम्, हविष्ट्वेन सूक्तत्वेन वा मण्डलस्याग्नेयत्वासम्भवात् । एवं वारुणत्वादिकमपि मण्डलस्य पूजाधिकरणतया द्रष्टव्यम् । तेन 'प्रैतु होतुश्चमसः' इत्यादिप्रैषमन्त्रस्थया होतुश्चमस इत्यादिसमाख्यया होत्रादीनां तत्र चमसभक्षप्राप्तिवदाग्नेयादिसमाख्ययैवाग्न्यादीनां तत्र तत्र मण्डले पूजनं कार्यमित्यस्मादेव वचनात् प्रसिद्धम् । अतो मण्डलानां प्रोक्षणानन्तरं मण्डलाधिदेवतापूजनं कुर्यात् । ततः प्रतिमण्डलं प्रागग्रान् कुशान् क्षिपेत्.

मण्डले मण्डले देयाः कुशाश्शास्त्रप्रचोदिताः ।

इति तेनैव स्मृतत्वात् । ततः प्रथममण्डलाद्दक्षिणतोऽनतिदूरे लौकिकाग्निं प्रतिष्ठाप्य शान्तिहोमं कुर्यात् ।

शान्त्यर्थं जुहुयादग्नौ घृतमष्टोत्तरं शतम् ।

इति स्मरणात् । होमश्च 'अग्नये पावकाय स्वाहा' इत्यनेन मन्त्रेण कार्य इत्युक्तं व्माख्यातृभिः । ततस्तस्मिन् अग्नौ लोहपिण्डं तापयेत् । तथाच पितामहः—

अश्रिहीनं समं कृत्वा अष्टाङ्गुलमयोमयम् ।
पिण्डं तु तापयेदग्नौ पञ्चाशत्पलकं समम् ॥

समं अनिम्नोन्नतम् । पुनस्समग्रहणं समन्तात्तापयेदिति विधानार्थम् । षोडशपलकं वा पिण्डं तापयेत् । "अथ सप्ताश्वत्थपर्णान्तरितं षोडशपलमग्निवर्णं लोहपिण्डमञ्जलिनाऽऽदाय सप्तमर्यादां गच्छेत्" इति शङ्खलिखितस्मरणात् । तापनं तु लोहकारेण कार्यमित्याह नारदः—

जात्यैव लोहकारो यः कुशलश्चाग्निकर्मणि ।
दृष्टप्रयोगश्चान्यत्र तेनायोऽग्नौ तु तापयेत् ॥

दृष्टप्रयोगश्चान्यत्रेत्यनेन यथा लोके लोहशुद्ध्यर्थं सुतप्तं लोहमुदके निक्षिप्य पुनस्सन्ताप्योदके निक्षिप्य पुनस्सन्तापनं लोहेकार्यसिद्ध्यर्थं क्रियते तथाऽत्रापि कर्तव्यमिति दर्शितम् । तत्र तृतीयतापे वर्तमाने धर्मावाहनादि शोध्यशिरसि पत्रारोपणान्तं सर्वदिव्यसाधारणविधिं कुर्यात् । तथाच पितामहः —

इमं मन्त्रविधिं कृत्स्नं सर्वदिव्येषु योजयेत् ।

आवाहनं च देवानां तथैव परिकल्पयेत् ॥

इति । तत्र धर्माराधनसाधनेषु विशेषमाह स एव—

तत्र पूजां हुताशस्य कारयेन्मनुजाधिपः ।
रक्तचन्दनधूपाभ्यां रक्तपुष्पैस्तथैव च ॥

इति । हुताशस्य लोहपिण्डाग्नावावाहितस्य धर्मस्येति यावत् । रक्तचन्दनं च धूपश्च रक्तचन्दनधूपौ, ताभ्याम् । इन्द्राद्याराधन-साधनेषु नायं नियमः, हुताशस्येति विशेषितत्वात् । शिरस्या रोपिते प्रतिज्ञापत्रे सत्यनन्तरं शोध्यस्य कर्तव्यमाह हारीतः—

प्राङ्मुखस्तु ततस्तिष्ठेत् प्रसारितकराङ्गुलिः ।
आर्द्रवासाऽशुचिश्चैव शिरस्यारोप्य पत्रकम् ॥

स्थितिश्चाद्यमण्डले कर्तव्या ।

पश्चिमे मण्डले तिष्ठेत् प्राङ्मुखः प्राञ्जलिश्शुचिः ॥

इति पितामहस्मरणात् । शोध्यस्य प्राड्विवाकस्य च कर्तव्यमाह विष्णुः—

करौ विमृदितव्रीही तस्यादावेव लक्षयेत् ।

इति । विमृदिता व्रीहयो याभ्यां तौ विमृदितव्रीही । अनेन कराभ्यां व्रीहिमर्दनं कृत्वा शोध्यः प्रसारितकराङ्गुलिस्स्या-दित्यर्थादुक्तम् । लक्षयेदित्यस्यार्थो नारदेन प्रपञ्चितः—

लक्षयेत्तस्य चिह्नानि हस्तयोरुभयोरपि ।
प्राकृतानि च गूढानि सव्रणान्यव्रणानि च ॥

अग्निधारणात् प्राक्तनान्येतानीति ज्ञापनार्थं तस्य शोध्यस्य करद्वयस्थितव्रणादिस्थानेषु अलक्तकादिरसेन हंसपदानि कुर्यादित्यर्थः। तथाच स एव—

हस्तक्षतेषु सर्वेषु कुर्याद्धंसपदानि तु।

इति। ततः कर्तव्यमाह याज्ञवल्क्यः—

करौ विमृदितव्रीही लक्षयित्वा ततो न्यसेत्।
सप्ताश्वत्थस्य पर्णानि तावत्सूत्रेण वेष्टयेत्॥

विष्णुरपि—"ततः प्राङ्मुखस्य प्रसारितभुजद्वयस्य सप्ताश्वत्थस्य पत्राणि करयोर्दद्यात्, तानि च करद्वयसहितानि सूत्रेण वेष्टयेत्" इति। उभयत्रापि ततश्शब्देनेदं ज्ञायते–हस्ताङ्कनपत्रन्यसनयोर्मध्ये यत्स्मृत्यन्तरोक्तं होमादि तदस्मिन् मते न कर्तव्यमिति। एवंच यदुक्तं नारदेन—

कृत्वैवमभिशस्तस्य प्रथमं हस्तलक्षणम्।
शान्त्यर्थं जुहुयान्मन्त्रैर्घृतेनाग्नौ यथाविधि॥
तर्पितेष्वथ देवेषु लोकपालेषु चैव हि।
आदित्याभिमुखो भूत्वा इमं मन्त्रमुदीरयेत्॥
त्वमग्ने सर्वभूतानामन्तश्चरसि साक्षिवत्।
हव्यं वहसि देवानां हुतः शान्तिं प्रयच्छसि॥
प्रच्छन्नानि मनुष्याणां पापानि सुकृतानि च।
त्वमेव देव जानीषे न विदुर्यानि मानवाः॥
व्यवहाराभिशस्तोऽहं वह्ने तिष्ठामि संशये।

तस्मान्मां संशयारूढं धर्मतस्त्रातुमर्हसि ॥
एवमुक्तवतस्तस्य प्राङ्मुखस्य तु धीमतः ।
पत्रैरञ्जलिमापूर्य आश्वत्थैस्सप्तभिस्समैः ॥

इति । मन्त्रैः 'आकृष्णेन' इत्यादिभिः नवभिः ग्रहप्रकाशकैः । देवेषु वस्वादिसरुद्रेषु लोकपालेषु च तत्तन्नाम्ना हुतघृताद्याहुतिभिस्तर्पितेषु सत्स्वित्यर्थः । तदेतत्सर्वं वैकल्पिकमिति मन्तव्यम् । यत्तु पत्रविशेषणमुक्तं समैरिति तन्नित्यं, तेन पक्षद्वयेऽपि समपरिमाणैः पत्रैर्भवितव्यम् । तथा वेष्टनसूत्रेष्वपि विशेषस्तेन दर्शितः—

वेष्टयीत सितैर्हस्तौ सप्तभिस्सूत्रतन्तुभिः ।

इति । सितैः श्वेतैरित्यर्थः । यत्तु स्मृत्यन्तरं—

अयस्तप्तं तु पाणिभ्यामर्कपत्रैस्तु सप्तभिः ।
अन्तर्हितं हरन् शुद्धस्त्वदग्धस्सप्तमे पदे ॥

इति, तदश्वत्थपत्रालाभविषयम् । यदाह पितामहः—

पिप्पलाज्जायते वह्निः पिप्पलो वृक्षराट् स्मृतः ।
अतस्तस्य तु पत्राणि हस्तयोर्निक्षिपेद्बुधः ॥

इति । यस्मात् प्रशस्तोऽश्वत्थः तस्मात्पत्राण्येव सति सम्भवे ग्राह्याणीत्यर्थः । शमीपत्रादीनि पुनः पूर्वोक्तपत्रैस्सह समुच्चीयन्ते । तथाच स्मृत्यन्तरं—

सप्त पिप्पलपत्राणि शमीपत्राण्यथापि वा ।
दूर्वायास्सप्त पत्राणि दद्यात्तांश्चाक्षतान्न्यसेत् ॥

तथा कुसुमानि च न्यसेत्—

सप्त पिप्पलपत्राणि अक्षतान् सुमनोदधि ।

इति पितामहस्मरणात् । सुमनसः कुसुमानि । ततस्तप्तलोहापिण्डे प्राड्विवाकः 'त्वमग्ने देवाः' इत्यादिना 'महानल' इत्यन्तेन मन्त्रेण लोहपिण्डस्थमग्निमभिमन्त्रयेत् ।

तथाच पितामहः—

तापिते तु ततः पश्चात् अग्निमावाहयेच्छुचिः ।
आवाहनं तु देवानां कृत्वा पूर्वविधानवित् ॥
त्वमग्ने देवाश्चत्वारस्त्वं च यज्ञेषु हूयसे ।
त्वं मुखं सर्वदेवानां त्वं मुखं ब्रह्मवादिनाम् ॥
जठरस्थो हि भूतनां ततो वेत्सि शुभाशुभम् ।
पापं पुनासि वै यस्मात्तस्मात्पावक उच्यसे ॥
पापेषु दर्शयात्मानमर्चिष्मान् भव पावक ।
अथवा शुद्धभावेषु शीतो भव महानल ॥

इति । देवानां धर्मादीनामावाहनग्रहणमावाहनादेश्शोध्यकरसंस्कारकुसुमानिधानान्तस्य कर्मण उपलक्षणार्थम् । विष्णुस्तु लोहपिण्डस्थाग्न्यभिमन्त्रणे मन्त्रान्तरमाह—

त्वमग्ने सर्वभूतानामन्तश्चरसि साक्षिवत् ।
त्वमेवाग्ने विजानीषे न विदुर्यानि मानुषाः ॥
व्यवहाराभिशस्तोऽयं मानुषश्शुद्धिमिच्छति ।

तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसि ॥

समुच्चयेनास्य मन्त्रस्य अभिमन्त्रणसाधनत्वं न पुनर्विकल्पेन, प्रार्थनीयार्थस्य शोध्यव्यक्तिविशेषनिष्ठतया प्रकाशकत्वेन भिन्नकार्यत्वात् । यत्तु—

तृतीयतापे संतप्तं ब्रूयात् सभ्यपुरस्कृतम् ।
शृण्विमं मानवं धर्मं लोकपालैरधिष्ठितम् ॥
त्वमग्ने सर्वदेवानां पवित्रं परमं मुखम् ।
त्वमेव सर्वभूतनां हृदिस्थो वेत्सि चेष्टितम् ॥
सत्यानृते च जिह्वा वा त्वत्तस्समुपलभ्यते ।
देवादिभिरिदं प्रोक्तं नान्यथा कर्तुमर्हसि ॥
अनेनासाविदं प्रोक्तो मिथ्यावादमसौ वदेत् ।
सर्वथा च यथा मिथ्या तथाऽग्निं धारयाम्यहम् ॥
स एष त्वां धारयति सत्येनानेन मानवः ॥
सत्यवाक्यस्य चास्य त्वं शीतो भव हुताशन ।
मृषावाक्यस्य पापस्य दह हस्तौ च पापिनः ॥

इति । यत्तु नारदोक्तमग्न्यभिमन्त्रणं तत् विष्णुपितामहोक्तेनाग्न्यभिमन्त्रणेन विकल्प्यते, एकार्थत्वात् । यदा नारदोक्ताग्न्यभिमन्त्रणं क्रियते तदाऽभिमन्त्रणानन्तरं कर्तव्यमाह स एव—

अमुमर्थं च पत्रस्थमभियुक्तं यथार्थतः ।
संश्राव्य मूर्ध्नि तस्यैव न्यस्य देयो यथाक्रियम् ॥

पूर्वोक्ताभिमन्त्रणमन्त्रार्थं शिरसि निहितपत्रस्थमन्त्रार्थं च संश्राव्य

तत्पत्रं यथास्थानं निधाय लोहपिण्डो देय इत्यर्थः।यदा तु विष्णु-पितामहोक्ताग्न्यभिमन्त्रणं क्रियते तदा तस्मिन् कृते कर्तव्यमाह पितामहः—

ततस्तं समुपादाय राजा धर्मपरायणः ।
संदंशेन नियुक्तो वा हस्तयोस्तस्य निक्षिपेत् ॥

संदंशेन तं लोहपिण्डं समुपादायेत्यन्वयः । नियुक्तः प्राड्विवाकः। निक्षेपणात् प्राक् शोध्यस्य पक्षद्वयेऽपि कर्तव्यमाह याज्ञवल्क्यः—

त्वमग्ने सर्वभूतानामन्तश्चरसि पावक ।
साक्षिवत्पुण्यपापेभ्यो ब्रूहि सत्यं कवे मम ॥
तस्येत्युक्तवतो लोहं पञ्चाशत्पालिकं समम् ।
अग्निवर्णं न्यसेत्पिण्डं हस्तयोरुभयोरपि ॥

इत्युक्तवतः पूर्वोक्ताग्न्यभिमन्त्रणं कृतवतस्तस्य शोध्यस्येत्यर्थः । न्यस्ते लोहपिण्डे शोध्यस्य कर्तव्यमाह स एव—

स तमादाय सप्तैव मण्डलानि शनैर्व्रजेत् ॥ इति ।

अस्यार्थो विष्णुना विवृतः—

"तमादाय नातिद्रुतं न च विलम्बितं मण्डलेषु पदन्यासं कुर्वन् व्रजेत्" इति । मण्डलेषु द्वितीयादिष्वष्टमान्तेष्वित्यर्थः । तथा च नारदः—

हस्ताभ्यां तं समादाय प्राड्विवाकसमीरितः ।
स्थित्वैकस्मिंस्ततोऽन्यानि व्रजेत्सप्त त्वजिह्मगः ॥
असंभ्रान्तः शनैर्गच्छेत् अक्रुद्धस्सोऽनलं प्रति ।

न पातयेत्तामप्राप्य या भूमिः परिकल्पिता ॥

न मण्डलमतिक्रामेन्न चार्वाक् स्थापयेत्पदम् ।

मण्डलं चाष्टमं गत्वा ततोऽग्निं विसृजेन्नरः ॥

इति । एकस्मिन् आद्ये मण्डल इत्यर्थः । ततोऽन्यानि द्वितीयादीनि । अग्निविसर्जनं च नवमे मण्डले कर्तव्यं,

अष्टमं मण्डलं गत्वा नवमे निक्षिपेद्बुधः ।

इति पितामहस्मरणात् । निक्षेपानन्तरं परीक्षकस्य कर्तव्यमाह नारदः—

तस्यैव मुक्तपिण्डस्य कुर्यात्करनिरीक्षणम् ।

इति । शुद्ध्यशुद्धिपरिज्ञानार्थमिति शेषः । तत्राशुद्धिप्रत्यायकानि लक्षणान्याह स एव—

पूर्वदृष्टेषु चिह्नेषु ततोऽन्यत्रापि लक्षयेत् ।

मण्डलं रक्तसङ्काशं यत्रान्यच्चाग्निसम्भवम् ॥

सोऽविशुद्धस्तु विज्ञेयोऽसत्यधर्मव्यवस्थितः ।

इति । यस्य करतलद्वयमध्ये यत्रकुत्रचिदाहारितं स्फोटकाद्युपलभ्यते तमशुद्धं विजानीयादित्यर्थः । यस्य पुनर्नोपलभ्यते स शुद्धो विज्ञेयः । तथाच विष्णुः—

यो हस्तयोः क्वचिद्दग्धस्तमशुद्धं विनिर्दिशेत् ।

न दग्धस्सर्वथा यस्तु स विशुद्धो भवेन्नरः ॥

यदा तु दग्धादग्धसन्देहः तदाऽऽह नारदः—

ज्ञानेन न विभागश्चेद्दग्धाविति करौ तदा ।

व्रीहीनतिप्रयत्नेन सप्तवारांस्तु दापयेत् ॥
मर्दितो यदि नो दग्धः सभ्यैस्त्वेवं विनिश्चितम् ।
मोच्यश्शुद्धस्तु सत्कृत्य दग्धो दण्ड्यो यथाक्रमम् ॥

इति । पितामहोपि—

हृते च मर्दयेत्पश्चात् व्रीहीन्वा यदि वा यवान् ।
निर्विकारे दिनस्यान्ते शुद्धं तमिति निर्दिशेत् ॥

इति । निर्विकारे करद्वये स्थिते शुद्धमिति तं निर्दिशेदित्यर्थः । केचित्—'निर्विकारौ यदा हस्तौ' इति पठन्ति । तन्मते हरणानन्तरमेव मर्दनेन शुद्धिरवधारणीया । ननु 'दिनस्यान्ते शुद्धं तमिति निर्दिशेत्' इति पाठे,

मुक्त्वाऽग्निं मृदितव्रीहिरदग्धः शुद्धिमाप्नुयात् ।

इति याज्ञवल्क्यवचनविरोधस्स्यात् । मैवं वोचः, 'प्रहृत्य परिधीन् जुहोति' इतिवदानन्तर्याभावेऽपि क्त्वानिर्देशोपपत्तेः । यत्पुनस्तेनोक्तं—

अन्तरा पतिते पिण्डे सन्देहे वा पुनर्हरेत् ।

इति, तत् व्रीहिमर्दने कृतेऽपि यत्र सन्देहो नापैति तद्विषयम्, किं सत्यानृतवशाददाहदाहौ उत दृष्टव्यवधानादिकारणवशादिति यत्र सन्देहस्तद्विषयं च । 'अन्तरा पतिते पिण्डे' इत्यत्र दग्धश्च नोपलभ्यते इति शेषोऽवगन्तव्यः । दग्धस्योपलम्भे त्वशुद्धिनिश्चयेन पुनर्हरणानवकाशात् । अत एव नारदः—

यस्त्वन्तरा पातयति दग्धश्च न विभाव्यते ।
पुनस्तं हारयेदग्निं स्थितिरेषा दृढीकृता ॥

दग्धश्च न विभाव्यते करतलद्वयाभ्यन्तरे इति शेषः । अन्यत्र दग्धविभावनेऽपि पुनर्हारयेदेव । तथा च कात्यायनः—

प्रस्खलत्यभियुक्तश्चेत् स्थानादन्यत्र दह्यते ।
अदग्धं तं विदुर्देवास्तस्य भूयोपि दापयेत् ॥

भूयोपि पुनरपीत्यर्थः । अत्र नारदः—

अनेन विधिना कार्यो हुताशसमयस्सदा ।
ऋते ग्रीष्मादसावुक्तः कालेऽन्यस्मिंस्तु शीतले ॥ इति ॥

इति स्मृतिचन्द्रिकायां अग्निविधिः.

अथ जलविषयोरुत्सन्नानुष्ठानत्वात्तद्विधिमनाख्याय कोशविधिरुच्यते.

तत्र याज्ञवल्क्यः—

देवानुग्रान् समभ्यर्च्य तत्स्नानोदकमाहरेत् ।

इति । उग्रा देवा रुद्रदुर्गादित्यादयः । तेषामन्यतमं देवं प्राड्विवाकः कृतोपवासो गन्धपुष्पादिभिस्संपूज्य स्नापयित्वा तत्स्नानोदकं दिव्यदेशं नयेदित्यर्थः । नरं तत्र निधाय धर्मावाहनादि शोध्यशिरसि पत्रारोपणान्तं सर्वदिव्यसाधारणविधिं विधाय शोध्यं च प्राङ्मुखं कृत्वा पूर्वनिहितोदकात् प्रसृतित्रयं पाययेत् । प्रसृति-

त्रयमण्डलं च तस्मिन्नेव काले गोमयेन कार्यमिति व्याख्यातृभि-रुक्तम्। आदित्याभिमुखं कृत्वा संश्राव्य पाययेत्। तथा च याज्ञवल्क्यः—

संश्राव्य पाययेत् पश्चात् जलात्तु प्रसृतित्रयम्॥

इति। किं संश्राव्येत्यपेक्षिते नारदः—

एनश्च श्रावयित्वा तु पाययेत प्रसृतित्रयम्।

इति। एनः पापं तच्च तत्फलाभिधानमुखेन तेनैव दर्शितम्—

स्वेच्छया यः पिबेत् कोशं कश्चिच्चेद्दूषितो नरः।
विसंवदेन्नरो लोभात् छली भवति दुर्मतिः॥
आत्मनः कामकारेण कोशं पीत्वा विसंवदेत्।
दरिद्रो व्याधितो मूर्खः सप्तजन्मानि जायते॥
बलात्कोशं हि यो दत्वा हितमिच्छेन्न चात्मनः।
स विनाशी भवेत्तस्य तच्च कार्यं न सिध्यति॥

इति। अत्रान्यश्लोकमभियोक्त्रा श्रावयितव्यः सामर्थ्यात्। शो-ध्यस्तु श्रावितं श्रुत्वेदं मया न कृतमिति वदन् पिबेत्। तथाच विष्णुः—"उग्रान् देवानभ्यर्च्य तत्स्नानोदकात् प्रसृतित्रयं पिबे दिदं मया न कृतमिति व्याहरन् देवताभिमुखः" इति। एवं यस्य कस्यचिदुग्रदेवस्य स्नानोदकमाहृत्य कोशानुष्ठाने प्राप्ते नियमार्थमाह पितामहः—

भक्तो यो यस्य देवस्य पाययेत्तस्य तज्जलम्।
समभावे तु देवानामादित्यस्य तु पाययेत्॥

दुर्गायाः पाययेच्चोरान् ये च शस्त्रोपजीविनः ।
भास्करस्य तु यत्तोयं ब्राह्मणं तन्न पाययेत् ॥

इति । तथा स्नापनीयप्रदेशनियममाह स एव—

दुर्गायाः स्नापयेच्छूलमादित्यस्य तु मण्डलम् ।
अन्येषामपि देवानां स्नापयेदायुधानि तु ॥

इति । प्रसृतित्रयपानादनन्तरं कात्यायनः—

अथ दैवविसंवादः त्रिसप्ताहात्तु दापयेत् ।
अभियुक्तं प्रसन्नेन तमर्थं दण्डमेव च ॥

दैवविसंवादो दैविकव्याधीनामाविर्भावः । दैविकाश्च व्याधयस्तेनैव दर्शिताः—

क्षयातिसारविस्फोटास्तात्वस्थिपरिपीडनम् ।
नेत्ररुग्गळरोगश्च तथोन्मादः प्रजायते ॥
शिरोरुक् भुजभङ्गश्च दैविका व्याधयो नृणाम् ।

इति । अन्यान्यपि पराजयनिमित्तानि विष्णुना दर्शितानि—

यस्य पश्येद्विसप्ताहात्त्रिसप्ताहादथापि वा ।
रोगोऽग्निर्ज्ञातिमरणं राजदण्डमथापि वा ॥
तमशुद्धं विजानीयात्तथा शुद्धं विपर्यये ।

इति । नारदेनार्थभ्रंशादयोऽपि पराजये उक्ताः—

सप्ताहाभ्यन्तरे यस्य द्विसप्ताहेन वा पुनः ।
रोगोऽग्निर्ज्ञातिमरणमर्थभ्रंशो धनक्षयः ॥

प्रत्यात्मिकं भवेद्यस्य विद्यात्तस्य पराजयम् ॥

इति । प्रत्यात्मिकं न समुदायप्रयुक्तम् । अर्थोऽत्र पुत्रादिरभिप्रेतः, अन्यथा धनशब्दवैयर्थ्यात् । अत एव बृहस्पतिः—

सप्ताहाद्वा द्विसप्ताहाद्यस्यार्तिर्न प्रजायते ।
पुत्रदारधनानां च स शुद्धस्स्यान्न संशयः ॥

पितामहेनाप्यनन्तरमप्युक्तं—

त्रिरात्रात्सप्तरात्राद्वा द्विसप्ताहादथापि वा ।
वैकृतं यस्य दृश्येत पापकृत्स तु मानवः ॥

यस्य शोध्यस्येत्यर्थः । न केवलं शोध्यस्य विकृतत्वापत्तौ पापकृत्त्वं, अपि तु स्वकीयजनस्य विकृतत्वापत्तावपीत्याह स एव—

तस्यैकस्य न सर्वस्य जनस्य यदि तद्भवेत् ।
रोगोऽग्निर्ज्ञातिमरणं सैव तस्य विभावना ॥

तद्रोगादिवैकृतं कृतकोशपानस्यैकस्य यदि भवेत्तदेव पापकृत्त्वमिति न, किंतु तदीयजनस्य सर्वस्य मध्ये यदा यस्यकस्यचिद्भवेत् तदाऽपीत्यर्थः । मनुनाऽप्यत्रध्यनन्तरमुक्तं—

न चार्तिमृच्छति क्षिप्रं स ज्ञेयश्शपथैश्शुचिः ।

इति । आर्तिः पूर्वोक्तो रोगादिः । क्षिप्रं शीघ्रं, एकरात्रादर्वागिति यावत् ।अयं चावधिः स्वल्पकार्यनिर्णायकसत्यादिशपथविषयः स्वल्पकालीनायाः शुद्धिभावनायास्तत्रैवोचितत्वात्, सत्यादिशपथान् प्रस्तुत्याभिहितत्वाच्च । त्रिरात्राद्यवधयस्तु को-

शविषयाः, कोशमधिकृत्याभिधानात्। तत्रापि त्रिरात्रावधिस्त-ण्डुलविषयद्रव्यादर्वाचीनद्रव्यविषयः। सप्तरात्रावधिस्तु महा-भियोगद्रव्यादर्वाचीनद्रव्यविषयः। द्विसप्ताहावधिस्तु महाभि-योगविषयः। त्रिसप्ताहावधिस्तु,

विंशद्दशाविनाशे तु कोशपानं विधीयते।

इति प्रतिपादितकोशविषय इत्यवगन्तव्यं औचित्यात्। सर्वत्राव-धौ ऊर्ध्वमवधेर्वैकृतदर्शनेऽपि न पापकृच्छोध्यः, अवधिसामर्थ्यात्। ऊर्ध्वकालीनस्य रोगादेर्निमित्तान्तरकारितत्वात्। अत एव नारदः—

ऊर्ध्वं यस्य द्विसप्ताहाद्वैकृतं सुमहद्भवेत्।
नाभियोज्यस्स विदुषा कृतकालव्यतिक्रमात्॥

द्विसप्ताहादिति पूर्वोक्तावधीनामुपलक्षणार्थं, 'कृतकालव्यतिक्र-मात्' इति हेतोरवध्यन्तरेऽपि समानत्वात्॥

इति स्मृतिचन्द्रिकायां कोशविधिः.

अथ तण्डुलविधिः.

तत्र पितामहः—

तण्डुलानां प्रवक्ष्यामि विधिं लक्षणचोदितम्।
चौर्ये तु तण्डुला देया नान्यस्मिन्निति निश्चयः॥

अन्यस्मिन् स्त्रीसङ्ग्रहणाद्यधनविवादे इत्यर्थः। धनविवादे तु चौर्यादन्यत्रापि तण्डुला देयाः 'तदर्धार्धस्य तण्डुलाः' इति

कात्यायनेनोक्तत्वात् । न च तद्वचनं चौर्यविषयमेवास्त्विति वाच्यं 'दत्तस्यापह्नवो यत्र' इत्युपक्रमविरोधापत्तेः । अतश्चौर्य-ग्रहणमर्थविवादप्रदर्शनार्थमिति मन्तव्यम् । अत्र प्रयोगो द्व्य-हकालः । तत्र पूर्वेद्युर्यत्कर्तव्यं तदाह स एव—

तण्डुलान् क्षाळयेच्छुक्लान् शालीयान् यस्यकस्यचित् ।
मृन्मये भाजने कृत्वा आदित्यस्याग्रतश्शुचिः ॥
स्नानोदकेन संमिश्रान् रात्रौ तत्रैव वासयेत् ।
आवाहनादि पूर्वं तु कृत्वा रात्रौ विधानतः ॥

इति । शुचिर्भूत्वा प्राड्विवाको रात्रावादित्यस्य पुरतोऽनतिदूरे तण्डुलानुपकल्प्य, धर्मावाहनादि होमान्तं सर्वदिव्यसाधारणवि-धिं विधायादित्यस्नानोदकेन यथास्थितांस्तण्डुलानाप्लुत्य, प्रभातप-र्यन्तं तथैव स्थापयेदित्यर्थः । प्रभाते च यत्कर्तव्यं तदपि तेन दर्शितं—

प्रभाते कार्यिणे देयास्त्रिः कृत्वा प्राङ्मुखाय तु ।

इति । रात्रावधिवासितास्तण्डुलाः शोध्याय भक्षणार्थं त्रिवारं देया इत्यर्थः । शोध्यस्य च यदनुष्ठेयं तदप्यनुवादव्याजेन स एव दर्शयति—

प्राङ्मुखोपोषितं स्नातं शिरोरोपितपत्रकम् ।
तण्डुलान् भक्षयित्वा तु पत्रे निष्ठीवयेत्त्रिधा ॥

इति । प्राङ्मुखत्वादि निष्ठीवनान्तं प्राड्विवाकेन कारयितव्यम् । शोध्येन च कर्तव्यमित्यर्थः । पत्रे च विशेषस्तेनैव दर्शितः—

भूर्जस्यैव तु नान्यस्य अभावे पिप्पलस्य तु ।

इति । एतच्च प्रभातकृत्यं भक्षणादि सूर्यग्रहे कर्तव्यमित्याह बृहस्पतिः—

सोपवासस्सूर्यग्रहे तण्डुलान् भक्षयेच्छुचिः ।

इति । तथा शुद्ध्यशुद्धिनिमित्तानि च तेन दर्शितानि—

शुद्धिस्स्याच्छुक्लनिष्ठीवे रक्तमिश्रे च दोषभाक् ।

इति । न केवलं रक्तमिश्रे दोषभाक् अपि तु निमित्तान्तरेऽपीति चशब्दार्थः । अत एव पितामहः—

शोणितं दृश्यते यस्य हनुस्तालु च शीर्यति ।
गात्रं च कम्पते यस्य तमशुद्धं विनिर्दिशेत् ॥

इति स्मृतिचन्द्रिकायां तण्डुलविधिः

अथ तप्तमाषविधिः

तत्र पितामहः—

तप्तमाषस्य वक्ष्यामि विधिमुद्धरणे शुभम् ।
कारयेदायसं पात्रं ताम्रं वा षोडशाङ्गुलम् ॥
चतुरङ्गुलखातं तु मृन्मयं वाऽथ मण्डलम् ।

इति । मण्डलं परिमण्डलं वर्तुळमिति यावत् । एवंविधं पात्रं घृत-तैलाभ्यां गव्यघृतेनैव वा पूरयित्वा लौकिकमग्निं दिव्यदेशे प्रतिष्ठाप्य तत्र तापयेत् । तथाच स एव—

पूरयेत् घृततैलाभ्यां विंशत्या वै पलैस्तु तत् ।
गव्यं घृतमुपादाय तदग्नौ तापयेच्छुचिः॥

केचिदत्र वाशब्दाद्यश्रवणात् घृततैलगव्यघृतानां समुच्चयमिच्छन्ति, तदसत् । व्रीहियवयोरिव निरपेक्षश्रुतिबलेनैव विकल्पावगतेः । अतो विंशतिपलं घृततैलं गव्यं वा घृतं पात्रे निक्षिप्य तापयेत् । पक्षद्वयेऽपि तापे वर्तमाने धर्मावाहनादि शोध्यशिरसि पत्रारोपणान्तं सर्वदिव्यसाधारणविधिं विदध्यात् । ततःपरं पक्षद्वये प्रकारभेदः, तत्र तावत् घृततैलतापनपक्षे भेदमाह स एव—

सुवर्णमाषके तस्मिन् सुतप्ते निक्षिपेत्ततः ।
अङ्गुष्ठाङ्गुलयोगेन तप्तमाषकमुद्धरेत् ॥
कराग्रं यो न धुनुयात् विस्फोटो वा न जायते ।
शुद्धो भवति धर्मेण निर्विकारकराङ्गुलिः ॥

इति । माषकं कर्षषोडशांशप्रमाणम् । सुवर्णग्रहणमत्र द्विकृष्णलप्रमाणराजतमाषनिवृत्त्यर्थं, तस्याल्पत्वेन दुर्ग्रहत्वात् । ततश्च हैमं ताम्रं वा माषकं निक्षिपेदित्यर्थः । तस्मिन् घृततैले अङ्गुष्ठाङ्गुलियोगेन तर्जन्यङ्गुष्ठमध्यमानां समूहेनेत्यर्थः । गव्यघृततापनपक्षेऽपि कृते सर्वदिव्यसाधारणविधौ विशेषमाह स एव—

सौवर्णीं राजतीं ताम्रीमायसीं वा सुशोधिताम् ।
सलिलेन सकृद्धौतां प्रक्षिपेत्तत्र मुद्रिकाम् ॥
भ्रमद्वीचीतरङ्गाढ्ये अनखस्पर्शगोचरे ।

परीक्षेतार्द्रपर्णेन चुरुकारं सघोषकम् ॥
ततश्चानेन मन्त्रेण सकृत्तदभिमन्त्रयेत् ।
परं पवित्रममृतं घृत त्वं यज्ञकर्मसु ॥
दह पावक पापं त्वं हिमशीतं शुचौ भव ।
उपोषितं ततस्स्नातमार्द्रवाससमागतम् ॥
ग्राहयेन्मुद्रिकां तां तु घृतमध्यगतां तथा ।
प्रदेशिनीं च तस्याथ परीक्षेरन् परीक्षकाः ॥
यस्य विस्फोटका न स्युः शुद्धोसावन्यथाऽशुचिः ।

इति। अत्र प्रदेशिन्यैव मुद्रिकोद्धारणं, तस्याः परीक्षाविधानात् ।

इति स्मृतिचन्द्रिकायां तप्तमाषविधिः

अथ फालविधिः

तत्र बृहस्पतिः—

आयसं द्वादशपलं घटितं फालमुच्यते ।
अष्टाङ्गुलं भवेद्दीर्घं चतुरङ्गुलविस्तरम् ॥

एवंविधं दिव्यदेशप्रतिष्ठापिताग्नौ निक्षिप्य धर्मावाहनादौ शोध्यशिरसि पत्रारोपणान्ते सर्वदिव्यसाधारणविधावनुष्ठिते सुतप्तं कुर्यात् । सुतप्ते कृते कर्तव्यमाह स एव—

अग्निवर्णं तु तच्चोरो जिह्वया लेहयेत्सकृत् ।
न दग्धश्चेच्छुचिमियादन्यथा तु स हीयते ॥

चोरग्रहणं शोध्योपलक्षणार्थम् ।

इति स्मृतिचन्द्रिकायां फालविधिः

अथ धर्मजविधिः.

तत्र पितामहः—

अधुना संप्रवक्ष्यामि धर्माधर्मपरीक्षणम् ।
राजतं कारयेद्धर्ममधर्मं सीसकायसम् ॥
लिखेत् भूर्जे पटे वाऽपि धर्माधर्मौ सितासितौ ।
अभ्युक्ष्य पञ्चगव्येन गन्धमाल्यैस्समर्चयेत् ॥
सितपुष्पस्तु धर्मस्स्यात् अधर्मोऽसितपुष्पधृक् ।
एवं विधायोपालिप्य पिण्डयोस्तु निधापयेत् ॥
गोमयेन मृदा वाऽपि पिण्डौ कार्यौ समन्ततः ।
मृद्भाण्डकेऽनुपहते स्थाप्यौ चानुपलक्षितौ ॥
उपलिप्ते शुचौ देशे देवब्राह्मणसंनिधौ ।
आवाहयेत्ततो देवान् लोकपालांश्च पूर्ववत् ॥
धर्मावाहनपूर्वं तु प्रतिज्ञापत्रकं लिखेत् ।
यदि पापविमुक्तोऽहं धर्मस्त्वायातु मे करे ॥
अभियुक्तस्ततश्चैकं प्रगृह्णीताविलम्बितः ।
धर्मे गृहीते शुद्धः स्यादधर्मे तु स हीयते ॥
एवं समासतः प्रोक्तं धर्माधर्मपरीक्षणम् ।

इति । सीसकायसं सीसकमिश्रायसनिर्मितम् । आयसनिर्मितं वेति वर्णयन्ति । पिण्डयोस्तौ निधापयेत् पिण्डयोरभ्यन्तरे तौ स्थापयेदित्यर्थः । पिण्डौ समपरीमाणौ कर्तव्यौ,

समौ कृत्वा नवे कुम्भे स्थाप्यौ चानुपलक्षितौ ।

इति बृहस्पतिस्मरणात् ।

यदि पापविमुक्तोऽहं धर्मस्त्वायातु मे करे ।

इति मन्त्रं शोध्यो ब्रूयात्, अहमिति मन्त्रलिङ्गात् । अन्यत्सर्वं व्यक्तार्थम् ।

इति स्मृतिचन्द्रिकायां धर्मजविधिः

समाप्तं च दिव्यप्रकरणम् ॥ क्रियापादश्च समाप्तः ॥

अथ निर्णयादिकृत्यम्

तत्र सङ्ग्रहकारः—

उक्तप्रकाररूपेण स्वमतस्थापिता क्रिया ।

राज्ञा परीक्ष्य सभ्यैश्च स्थाप्यौ जयपराजयौ ॥

यो यथोक्तान्यतमया क्रियया‌ऽर्थं प्रसाधयेत् ।

भाषाक्षरसमं साध्यं स जयी परिकीर्तितः ॥

असाधयन् साधयित्वा विपरीतार्थमात्मनः ।

दृष्टकारणदोषो यः पुनस्स तु पराजयी ॥

इति । अत्र व्यासः—

जितं तु दण्डयेद्राजा जेतुः पूजां प्रवर्तयेत् ।

अजिता अपि दण्ड्याः स्युः वेदशास्त्रविरोधिनः ॥

पूजा च गन्धमाल्यवस्त्रादिना कार्या ।

जेतुः प्रवर्तते पूजा गन्धमाल्याम्बरादिना ॥

इति तेनैव स्मृतत्वात् । पूजाप्रवर्तनानन्तरं कात्यायनः—

सिद्धेनार्थेन संयोज्यो वादी सत्कारपूर्वकम् ।
लेख्यं स्वहस्तसंयुक्तं तस्मै दद्यात्तु पार्थिवः ॥

नारदोऽपि—

मध्ये यत् स्थापितं द्रव्यं चलं वा यदि वा स्थिरम् ।
पश्चात्तत्सोदयं दाप्यं जयिने पत्रसंयुतम् ॥

पत्रं जयपत्रम् । तथाच बृहस्पतिः—

पूर्वोत्तराक्रियायुक्तं निर्णयान्तं यदा नृपः ।
प्रदद्याज्जयिने लेख्यं जयपत्रं तदुच्यते ॥

जयपत्रे च यद्वक्तव्यं तदखिलं लेख्यविधावुक्तं, तदत्रानुसन्धेयम्। 'सिद्धेनार्थेन संयोज्य' इत्यस्य क्वचिद्विषये विशेषमाह याज्ञवल्क्यः—

निह्नुते लिखितं नैकमेकदेशविभावितः ।
दाप्यस्सर्वं नृपेणार्थं न ग्राह्यस्त्वनिवेदितः ॥

अस्यार्थः—निष्कवस्त्राभरणाद्यनेकं प्रतिज्ञाकाले लिखितं यदा प्रतिवादी निह्नुते मिथ्यैतदित्युक्तवान् । एकदेशविभावितः वादिना चैकदेशप्रमाणत एव सत्यं मयेत्यङ्गीकारितः स सर्वमेव प्रतिज्ञातमर्थमर्थिने नृपेण दाप्यः । नैवं प्रतिज्ञायां लिखितः । पश्चाद्वादिनोच्यमानोऽर्थः नृपेण न दाप्यतया ग्रहीतव्य इति । एतदुक्तं भवति—

छलं निरस्य भूतेन व्यवहारान् नयेन्नृपः ।

इत्युक्तमेवंविधविषये नृपेण नादर्तव्यम्, दुष्टाशयत्वस्यात्र सिद्धत्वादिति । न च वाच्यं छलानुसारित्वात् सर्वदापनमपि नृपेण नादरणीयमिति । यदाह कात्यायनः—

सर्वापलापं यः कृत्वा मिथोऽल्पमपि संवदेत् ।
सर्वमेव तु दाप्यः स्यादभियुक्तो बृहस्पतिः ॥

आदरार्थं बृहस्पतिग्रहणम् । नारदोऽपि सर्वदापनमादर्तव्यमिति दर्शयितुमभियुक्तदेयत्वमाह—

अनेकार्थाभियुक्तेन सर्वार्थव्यपलापिना ।
विभावितैकदेशेन देयं यदभियुज्यते ॥

ननु प्राचीनवचनानां प्रागुक्तार्थाभिधाने धर्मनिर्णयार्थता न स्यात् छलानुसारेण तेषां व्यवहारनिर्णयाभिधायकत्वात् । सत्यं—तथाऽपि न दोषः—प्रागुक्तविषये व्यवहारनिर्णयस्य धर्मनिर्णयबाधकत्वात् । अत एव बृहस्पतिः—

केवलं शास्त्रमाश्रित्य क्रियते यत्र निर्णयः ।
व्यवहारस्स विज्ञेयो धर्मस्तेनापि हीयते ॥

इति । यत्र प्रागुक्तविषयादावित्यर्थः । यत्तु कात्यायनेनोक्तम्—

अनेकार्थाभियोगेऽपि यावत् संसाधयेद्धनी ।
साक्षिभिस्तावदेवासौ लभते साधितं धनम् ॥

इति, तद्यत्र दुष्टाशयत्वस्यात्यन्तदार्ढ्याभावस्तद्विषयम् । प्राचीनवचनेष्विवात्र प्रतिवादिनः सर्वापलापलक्षणदौष्ट्यकथनांशा-

भावात्। केचिदस्य वचनस्य पुत्रादिदेयपित्रादिऋणविषयत्वं वद-न्ति ‘तत्रैव नाभिजानामि’ इत्युत्तरत्रयसम्भवादिति वदन्तः। तन्न समीचीनम्—स्वकृतऋणविवादेऽपि विस्मरणादिनोत्तरत्रयस्य स-म्भवात्। पुत्रादेः पित्रादिकृतऋणविवादे मिथ्यैतदित्युत्तरमुक्त-वतो निह्नववादित्वेऽपि साधितमात्रदानप्रसङ्गाच्च। अथ—पुत्रादे-र्मिथ्यैतदित्युत्तरं न सम्भवतीत्युच्यते। मैवं वोचः—ऋणग्रहण-काले प्रबुद्धस्य अप्रबुद्धस्यापि मात्रादिवचनतस्तत्सम्भवात्। अथ नाभिजानामीत्युत्तरमुक्तवति पुत्रादौ साधितमात्रलाभवचन-मित्युच्यते, तर्हि नाभिजानामीत्याद्युत्तरत्रयविषयकत्वं तस्य परिकल्प्यताम्, किं पुत्रादिविषयत्वेन। अथ—

पुत्रपौत्रै ऋणं देयं निह्नवे साक्षिभावितम्॥

इति स्मरणात् पुत्रादिविषयत्वमित्युच्यते, तर्हि मिथ्यैतदित्युक्त-पुत्रादिविषयत्वं न पुनः नाभिजानामीत्युक्तवत्पुत्रादिविषयत्वं, ‘निह्नवे साक्षिभावितम्’ इति स्मरणात्॥

अन्ये त्वन्यथा व्यवस्थापयन्ति सर्वार्थदापनवचनं प्रतिज्ञा-तार्थानां मध्ये यद्येकमप्यर्थमर्थी साधयति, तदा सर्वानेतानर्थानहं ददामीत्येवं सावष्टम्भोक्तियुक्तनिह्नवविषयम्। तद्रहितविषयं तु सा-धितमात्रलाभवचनमिति। एतदप्ययुक्तम्, ‘निह्नुते लिखितं नैकम्’ इत्यपि शेषेणाभिधानात्। न च छलोदाहरणपरत्वादस्य वाक्य-स्य तत्सिद्धये सावष्टम्भनिह्नवविषयत्वमास्थीयत इति युक्तम्, सर्वा-

पलापच्छलमादाय व्यवहारसमाप्त्यभिधानात् ।तावतैव वाक्यस्य छलोदाहरणपरत्वसिद्धेः । भाषाबलेनैवोक्तविषये सर्वदापनात् अनुवादकं च 'निह्नुते' इत्यादिवचनं, तत्समानार्थं वचनद्वयमपि स्यात् । न च–

अनेकार्थाभियोगेऽपि यावत् संसाधयेद्धनी ।

इत्यादिकात्यायनवचनपरिहारायैवमाश्रीयत इति युक्तम् । तद्विरोधस्य ऋजुमार्गेण परिहृतत्वादित्यलमतिविस्तरकारिणा मतान्तरोपन्यासनिरासेन ॥

दापनप्रकारस्तु कात्यायनेन दर्शितः—

राजा तु स्वामिने विप्रं सान्त्वेनैव प्रदापयेत् ।
देशाचारेण चान्यांस्तु दुष्टान् संपीड्य दापयेत् ॥
रिक्थिनं सुहृदं वाऽपि छलेनैव प्रदापयेत् ॥

इति । न केवलं राजा स्वामिने प्रदापयेत्, स्वयमपि दण्डं गृह्णीयादित्याह नारदः—

ऋणिकस्सधनो यस्तु दौरात्म्यान्न प्रयच्छति ।
राज्ञा दापयितव्यः स्यात् गृहीत्वांशं तु विंशकम् ॥

दाप्यार्थस्य यावान् विंशतितमो भागः तावन्तमर्थमधमर्णिकात् गृह्णीयादित्यर्थः । एतदपि प्रतिपन्नऋणिकविषयम् । विप्रतिपन्नऋणित्वे त्वाह विष्णुः—'उत्तमर्णश्चेद्राजानमियात्तद्विभावितोऽधमर्णो राज्ञे धनदशभागसमं दण्डं दद्यात् । प्राप्तार्थश्चोत्तमर्णो

विंशतितममंशम्' इति। प्राप्तार्थेन दानभृतित्वेन, न दण्डत्वेन निरपराधित्वात्। यदा त्वधमर्णो राजानमियात्तदा मनुराह—

यस्साधयन्तं छन्देन वेदयेद्धनिकं नृपे।

स राज्ञर्णचतुर्भागं दाप्यस्तस्य च तद्धनम्॥

यो राज्ञः प्रियोऽधमर्णस्तदाज्ञया प्रतिबन्धनं करिष्यामीति बुद्ध्या धनिकं छन्देन स्वेच्छया साधयन्तं प्रयुक्तधनयाचनेऽप्रवृत्तं नृपे वेदयेत् मां पीडयिष्यतीत्यावेदयेत्, असौ ऋणं तच्चतुर्भागसमं च दण्डं राज्ञा दाप्य इत्यर्थः। यत्पुनस्तेनोक्तम्—

यो यावन्निह्नवीतार्थं मिथ्या यावति वारयेत्।

तौ नृपेण ह्यधर्मज्ञौ दाप्यौ तद्द्विगुणं दमम्॥

इति तदुद्वृत्ताधमर्णोत्तमर्णविषयं, अधर्मज्ञग्रहणादित्युक्तं तद्भाष्ये। यत्तु याज्ञवल्क्येनोक्तं—

निह्नवे भावितो दद्याद्धनं राज्ञे च तत्समम्।

इति, तदुद्वृत्ताधमर्णस्योक्तदण्डपर्याप्तधनासम्भवविषये वेदितव्यम्, अन्यथा पूर्वोक्तविष्णुमनुवचनविरोधस्य दुर्वारत्वात्। मिथ्याभियोगिनस्तु अपर्याप्तधनस्यापि न तत्समदण्डः। यदाह स एव—

मिथ्याभियोगी द्विगुणमभियोगाद्धनं वहेत्॥

इति। अभियोगात् अभियुक्तधनात् द्विगुणं धनं वहेत् राज्ञे दद्यादित्यर्थः। तावद्धनाभावे तु 'आनृण्यं कर्मणा गच्छेत्'

इत्याद्यनुकल्पोऽवगन्तव्यः । यत्तु नारदेनोक्तम्—

न च मिथ्याऽभियुञ्जीत दोषो मिथ्याभियोगिनः ।
यस्तत्र विनयः प्रोक्तः सोऽभियोक्तारमाव्रजेत् ॥

इति, तत्प्रतिपदोक्तदण्डाभावविषयं सामान्यशास्त्रत्वात् । तेन निह्नवे असद्वृत्तस्य यो दण्डोऽभिहितो विष्णुना स एव सद्वृत्तस्य मिथ्याभियोगिनो भवतीत्यवगन्तव्यम् । तथा—

निह्नवे तु यदा वादी स्वयं तत्प्रतिपद्यते ।
ज्ञेया सा प्रतिपत्तिस्तु तस्यार्धो विनयः स्मृतः ॥

इति व्यासेन यो दण्डोऽभिहितः स एव मिथ्याभियोगेऽपि स्वयं तत्प्रतिपद्यमानस्य भवतीति चावगन्तव्यम् । यत्पुनर्मनुनोक्तम्—

अर्थेऽपव्ययमानं तु कारणेन विभावितम् ।
दापयेद्धनिकस्यार्थं दण्डलेशं च शक्तितः ॥

इति, तद्दशमांशदण्डदानासमर्थसद्वृत्ताधमर्णविषयमित्युक्तं तद्भाष्ये । कारणेनेति वदन् द्विपाद्व्यवहारे त्वर्थदापनमेव, न दण्डदापनम् , तत्र निह्नवमिथ्याभियोगयोरभावादिति दर्शयति । एवमेव चतुष्पादेऽपि व्यवहारे शङ्काभियोगाज्ञानोत्तरादिना मिथ्याभियोगनिह्नवाभावे दण्डाभावोऽध्यवसेयः । यत्तु स्मृत्यन्तरम्—

आद्ये तु दण्डपादस्स्यात् द्वितीयेऽर्धं तृतीयके ।

पादन्यूनं चतुर्थे च पादे सम्पूर्णदण्डभाक् ॥

इति, तद्विगीतत्वादप्रमाणमिति प्रपञ्चितं विश्वरूपाचार्येण। अतो निह्नवमिथ्याभियोगनिमित्तो दण्डश्चतुष्पद्येव व्यवहारे निमित्तसद्भावविषये ग्रहीतव्यः। तत्र ऋणादानविषयव्यवहारे दण्डविशेषो दर्शितः। निक्षेपादिविषयव्यवहारे तु दण्डविशेषस्तत्रतत्र पदे वक्ष्यते। यत्पुनः कात्यायनेनोक्तम्—

शतार्धं दापयेच्छुद्धमशुद्धो दण्डभाग्भवेत् ॥

इति, तद्दिव्यविशेषावधृतशुद्धपुरुषविषयं, यतोऽनन्तरमाह स एव—

विषे तोये हुताशे च तुलाकोशे च तण्डुले।
तप्तमाषकदिव्ये च क्रमाद्दण्डं प्रकल्पयेत् ॥
सहस्रं षट्शतं चैव तथा पञ्चशतानि तु।
चतुस्त्रिद्व्येकमेवंच हीनं हीनेषु कल्पयेत् ॥

इति। अयं च दिव्यनिबन्धनो दण्डो निह्नवमिथ्याभियोगयोरन्यतरनिबन्धेन दण्डेन समुच्चीयते, निमित्तसमुच्चयात्। पणस्तु शास्त्रोक्तदण्डेन समुच्चीयते इत्याह याज्ञवल्क्यः—

सपणश्चेत् विवादस्स्यात् तत्र हीनं तु दापयेत्।
दण्डं च स्वपणं चैव धनिने धनमेव च ॥

नारदोपि—

विवादे सोत्तरपणे द्वयोर्यस्तत्र हीयते।
स पणं स्वकृतं दाप्यो विनयं च पराजये ॥

इति । अत्र कात्यायनः—

एवं धर्मासनस्थेन समेनैव विवादिना ।
कार्याणां निर्णयो दृश्यो ब्राह्मणैस्सह नान्यथा ॥

बृहस्पतिरपि—

राज्ञा यत्नेन कर्तव्यं सन्दिग्धार्थविचारणम् ।
त्रयस्तत्रोपचीयन्ते हानिरेकस्य जायते ॥
जेताऽऽप्नोति धनं पूजां जितो विनयनिग्रहम् ।
जयं दानं दमं राजा सभ्याः पुण्यमवाप्नुयुः ॥

इति । नारदोपि—

एवं पश्यन् सदा राजा व्यवहारान् समाहितः ।
वितत्येह यशो दीप्तं शक्रस्यैति सलोकताम् ॥

बृहस्पतिरपि—

एवं शास्त्रोदितं राजा कुर्वन्निर्णयपालनम् ।
वितत्येह यशो लोके महेन्द्रसचिवो भवेत् ॥
साक्षिलेख्यानुमानेन प्रकुर्वन् कार्यनिर्णयम् ।
वितत्येह यशो राजा ब्रध्नस्याप्नोति विष्टपम् ॥

इति । मनुरपि—

कामक्रोधौ तु संयम्य योऽर्थं धर्मेण पश्यति ।
प्रजास्तमनुवर्तन्ते समुद्रमिव सिन्धवः ॥

यस्त्वधर्मेण कार्याणि मोहात्कुर्यान्नराधिपः ।
अचिरात्तं दुरात्मानं वशे कुर्वन्ति शत्रवः ॥ इति ॥

इति स्मृतिचान्द्रिकायां निर्णयादिकृत्यम् ॥

अथान्यान्यपि दण्डविषयाणि कानिचिद्वचनानि लिख्यन्ते. तत्र नारदः—

शारीरश्चार्थदण्डश्च दण्डस्तु द्विविधः स्मृतः ।
शारीरस्ताडनादिस्तु मरणान्तः प्रकीर्तितः ॥
काकण्यादिस्त्वर्थदण्डः सर्वस्वान्तस्तथैवच ।

इति । अत्र शारीरो दण्डभेदः परिगणयितुं शक्यो नार्थदण्डभेद इत्याह स एव—

शारीरो दशधा प्रोक्तो ह्यर्थदण्डस्त्वनेकधा ।

इति । दशधेति न संख्यानियमार्थम्, अतो बहुविधस्य शारीर दण्डस्य वक्ष्यमाणत्वात् । तथाहि—मनुना तावन्नवविधश्शारीरो दण्ड इति दर्शितः—

दश स्थानानि दण्डस्य मनुस्स्वायम्भुवोऽब्रवीत् ।
उपस्थ उदरं जिह्वा हस्तौ पादौ च पञ्चमम् ॥
चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च ।

इति । उपस्थः स्त्रीपुंसयोर्लिङ्गम् । तन्निग्रहोऽगम्यागमने । चौर्ये त्वाहारनिवृत्त्यादिना जठरस्य निग्रहः । वाक्पारुष्ये जिह्वायाः ।

दण्डपारुष्ये हस्तयोः। पादप्रहारादौ पादयोः। गोप्यनिरीक्षणादौ चक्षुषः। परस्त्रीस्तनानुलेपनगन्धग्रहणादौ नासिकायाः। राजमन्त्रश्रवणादौ कर्णयोः। उत्कोचप्रदानादौ व्ययप्रतिबन्धादिना धनस्य। महापातकादौ देहस्य। अयं चोपस्थादीनां निग्रहो यत्रागम्यागमनचौर्यादौ क्षत्रविट्शूद्राणां दण्डविशेषो नाम्नातस्तत्र कार्यः—

त्रिषु वर्णेषु तानि स्युरक्षतो ब्राह्मणो व्रजेत्॥

इति क्षत्रियादिषु सामान्येनाभिधानात्। अक्षतो ब्राह्मणः पूर्वोक्तदण्डस्थानेष्वदण्डितो ब्राह्मण इत्यर्थः। व्रजेदिति वदन् यो निर्वासितो देशान्तरं गच्छति तस्यैवोक्तदशस्थानेष्वदण्डो न पुनर्ब्राह्मणमात्रस्येति दर्शयति। अत एव निर्वासनविधिशेषतयाऽपि तेनोक्तम्—

न जातु ब्राह्मणं हन्यात् सर्वपापेष्ववस्थितम्।
राष्ट्रादेनं बहिष्कुर्यात्समग्रधनमक्षतम्॥

इति। यस्य तु न बहिष्कारः तस्य क्षत्रियादिवदेव दण्डः। तथा च स एव—

चतुर्णामपि वर्णानां प्रायश्चित्तमकुर्वताम्।
शारीरं धनसंयुक्तं दण्डं धर्म्यं प्रकल्पयेत्॥

यत्तु गौतमेनोक्तं—'न शारीरो ब्राह्मणदण्डः' इति, तद्वधरूपस्याङ्गभङ्गात्मकस्य निषेधार्थं, न पुनरङ्गनिग्रहात्मकस्यापि।

तथात्वे पूर्वोक्तवचनविरोधात् । अत एव बृहस्पतिना विशेषितः—

महापातकयुक्तोपि न विप्रो वधमर्हति ।

इति । हारीतेनापि—

न त्वङ्गभेदं विप्रस्य प्रवदन्ति मनीषिणः ।

इति । एवञ्चाङ्गनिग्रहात्मक एव शारीरो दण्डो विप्रस्य न तु वधाद्यात्मक इत्यनुसन्धेयम् । अत एवापस्तम्बः—'चक्षुर्निरोधस्त्वेतेषु ब्राह्मणस्य' इति । निरोधश्चक्षुषो बन्धनादिना कार्यो न त्वाश्रयोद्धरणेन । अङ्गभङ्गस्य निषिद्धत्वात् । यत्तु शङ्खेनोक्तम्—'त्रयाणामपि वर्णानां धनापहारवधबन्धक्रिया । विवासनाङ्ककरणं ब्राह्मणस्य' इति, तद्दरिद्रब्राह्मणविषयम् । तथाच ब्राह्मणं प्रकृत्य गौतमः—'कर्मवियोगविख्यापनविवासनाङ्ककरणान्यवृत्तौ' इति । अवृत्तौ निर्धन इत्यर्थः । एतदुत्तमसाहसविषयम् । ऋणापलापादिविषये तु मनुराह—

क्षत्रविट्शूद्रयोनिस्तु दण्डं दातुमशक्नुवन् ।
आनृण्यं कर्मणा गच्छेद्विप्रो गच्छेच्छनैश्शनैः ॥

कर्मकरणासामर्थ्ये तु कात्यायन आह—

धनदानासहं बुद्ध्वा स्वाधीनं कर्म कारयेत् ।
अशक्तौ बन्धनागारं प्रवेश्यो ब्राह्मणादृते ॥

मनुरपि—

स्त्रीबालोन्मत्तवृद्धानां दरिद्रानाथरोगिणाम् ।
शफाविदलरज्ज्वाद्यैर्विदध्यान्नृपतिर्दमम् ॥

एवञ्च बन्धनाङ्ककरणकर्मकरणबन्धनागारप्रवेशनताडनरूपाः शारीरदण्डभेदाः पञ्च विज्ञेयाः । अतश्शारीरो दशधेत्युपलक्षणार्थमुक्तम् । नावधारणार्थमिति मन्तव्यम् । 'दण्डस्तु द्विविधस्स्मृतः' इत्येतदप्युपलक्षणार्थमेव, विधान्तरस्यापि स्मृतत्वात् । तथाहि—

शिरसो दण्डनं मुण्डस्तस्य निर्वासनं पुरात् ।
ललाटे चाभिशस्ताङ्कः प्रयाणं गर्दभेन च ॥

तस्य ब्राह्मणस्येत्यर्थः । ब्राह्मणस्य प्रकृतत्वात् । अथ वधस्थाने मुण्डनं दण्ड इत्याह याज्ञवल्क्यः—

ब्राह्मणस्य वधो मौण्ड्यं पुरान्निर्वासनं तथा ।
ललाटे चाभिशस्ताङ्कः प्रयाणं गर्दभेन च ॥

एवञ्च क्षत्रियादौ वध एव न मुण्डनम् । तत्र प्रतिनिधित्वेनास्मृतत्वात् । अत एव मनुः—

मौण्ड्यं प्राणान्तिको दण्डो ब्राह्मणस्य विधीयते ।
इतरेषां तु वर्णानां दण्डः प्राणान्तिको भवेत् ॥

उत्तमसाहस इति शेषः । तथाच नारदः—

वधस्सर्वस्वहरणं पुरान्निर्वासनाङ्कने ।
तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहसे ॥
अविशेषेण सर्वेषामेष दण्डविधिः स्मृतः ।
वधादृते ब्राह्मणस्य न वधं ब्राह्मणोऽर्हति ॥

इति । वधादृत इत्यङ्गच्छेदस्याप्युपलक्षणार्थम्,

न त्वङ्गभेदं विप्रस्य प्रवदन्ति मनीषिणः ।
तपसा चेज्यया चैव ब्राह्मणः पूज्यते सदा ॥

इति हारीतस्मरणात् । मनुस्तु—

वधदण्डपरित्यागे हेतुमाह—

न ब्राह्मणवधात्पापात् नाधर्मो विद्यते क्वचित् ।
तस्मात्तस्य वधं राजा मनसाऽपि न चिन्तयेत् ॥

अतो महापातकयुक्तोपि विप्रो न वध्य इत्याह बृहस्पतिः—

महापातकयुक्तोपि न विप्रो वधमर्हति ।

इति । किं तर्ह्यर्हतीत्यपेक्षितेऽनन्तरमुक्तं तेनैव—

निर्वासनाङ्कने मौण्ड्यं तस्य कुर्यान्नराधिपः ।

इति । निर्वासनमत्र देशतो न पुनः पुरात् । यदाह बोधायनः— 'तप्तेनायसेन ललाटेऽङ्कयित्वा विषयान्निर्वासनम्' इति । कुर्यादिति शेषः । अङ्कने तु विशेषो नारदेन दर्शितः—

गुरुतल्पे भगः कार्यः सुरापाने सुराध्वजः ।
स्तेये तु श्वपदं कार्यं ब्रह्महण्यशिराः पुमान् ॥

अङ्कनं त्विदं न क्षत्रियादिषु कर्तव्यम् । यदाहोशना—

ब्राह्मणस्यापराधेषु चतुर्ष्वङ्को विधीयते ।
गुरुतल्पे सुरापाने स्तेये ब्राह्मणहिंसने ॥
इतरेषां तु वर्णानामङ्कनं नात्र कारयेत् ।

इति । कस्तर्हि दण्डस्तत्रेत्यपेक्षिते बृहस्पतिः—

महापराधयुक्तांश्च वधदण्डेन शासयेत् ॥

इति । यदा तु वधदण्डेन महापराधिनो निग्रहीतुं नशक्यास्तदा मनुराह—

वधेनापि यदा त्वेतान् निग्रहीतुं न शक्नुयात् ।
तदैषु सर्वमप्येतत् प्रयुञ्जीत चतुष्टयम् ॥

किं तच्चतुष्टयमित्यपेक्षिते याज्ञवल्क्यः—

वाग्दण्डस्त्वथ धिग्दण्डो धनदण्डो वधस्तथा ।
योज्यास्समस्ता व्यस्ता वाऽप्यपराधवशादिमे ॥

वाग्दण्डः परुषशापवचनात्मकः । धिग्दण्डो धिगिति कुत्सनम् । समस्तानां योजने क्रममाह मनुः—

वाग्दण्डं प्रथमं कुर्याद्धिग्दण्डं तदनन्तरम् ।
तृतीयं धनदण्डं तु वधदण्डमतः परम् ॥

व्यस्तानां तु योजने व्यवस्थामाह बृहस्पतिः—

स्वल्पापराधे वाग्दण्डो धिग्दण्डः पूर्वसाहसे ।
मध्यमे त्वर्थदण्डस्तु राजद्रोहेषु बन्धनम् ॥
निर्वासनं वधो वाऽपि कार्यमात्महितैषिणा ।
व्यस्तास्समस्ता एकस्य महापातककारिणः ॥

इति । तथा पुरुषापेक्षयाऽपि व्यवस्था तेनैव दर्शिता—

मित्रादिषु प्रयुञ्जीत वाग्दण्डं धिक् तपस्विनाम् ।

विवादिनो नरांश्चान्यान्दोषिणोऽर्थेन दण्डयेत् ॥

आदिग्रहणेन मान्या जना गृह्यन्ते ।

गुरून् पुरोहितान् पूज्यान् वाग्दण्डेनैव दण्डयेत् ।
विवादिनो नरांश्चान्यान् धिग्धनाभ्यां च दण्डयेत् ॥

इति तेनैवोक्तत्वात् । यत्तु शङ्खेनोक्तम्—'अदण्ड्यौ मातापितरौ स्नातकपुरोहितौ परिव्राजकवानप्रस्थौ जन्मकर्मश्रुतिशीलशौचाचारवन्तश्च' इति । यदपि कात्यायनेन—

आचार्यस्य पितुर्मातुर्बान्धवानां तथैव च ।
एतेषामपराधेषु दण्डो नैव विधीयते ॥

इति, तच्छारीरार्थदण्डयोर्निषेधार्थं, न पुनर्दण्डमात्रस्य । यदाह मनुः—

पिताऽऽचार्यस्सुहृन्माता भार्या पुत्रः पुरोहितः ।
नादण्ड्यो नाम राज्ञोस्ति धर्माद्विचलितः स्वकात् ॥

बृहस्पतिरपि—

ऋत्विक्पुरोहितामात्याः पुत्रास्सम्बन्धिबान्धवाः ।
धर्माद्विचलिता दण्ड्या निर्वास्या राजहिंसकाः ॥

यत्तु गौतमेनोक्तं—'षड्भिः परिहार्यो राज्ञाऽवध्यश्चावन्ध्यश्चादण्ड्यश्चाबहिष्कार्यश्चापरिवाद्यश्चापरिहार्यश्च' इति तदेतत् 'स एष बहुश्रुतो भवति । लोकवेदवेदाङ्गवित् । वाकोवाक्येतिहासपुराणकुशलः । तदपेक्षः तद्वृत्तिः । चत्वारिंशता

संस्कारैरसंस्कृतः। त्रिषु कर्मस्वभिरतः। षट्सु वा। सामयाचारिकेष्वभिविनीतः' इति प्रतिपादितबहुश्रुतविषयम्। अतो न प्राचीनवचनविरोधः। कात्यायनोप्यदण्ड्यमाह—

प्राणात्यये तु यत्र स्यादकार्यकरणं कृतम्।
दण्डस्तत्र तु नैव स्यादेष धर्म्यो भृगुस्मृतः॥

नारदस्तु विहितदण्डार्धेन दण्डमाह—

अयुक्तं साहसं कृत्वा प्रत्यापत्तिं व्रजेत्तु यः।
ब्रूयात्स्वयं वा सदसि तस्य चार्धो दमस्स्मृतः॥

व्यासोपि—

व्याधिना पीडितो यस्तु यः कश्चिदपि ताम्यति।
नैतन्मया पुनः कार्यं ब्रूयात्तस्यार्धको दमः॥

अत्र पक्षान्तरमाह गौतमः—'अनुज्ञानं वा वेदवित्समयवचनात्' इति। अनुज्ञानं अदण्डयित्वोत्सर्जनम्। तथा विहितदण्डादभ्यधिकमूनं वा दोषिणः पीडाजननसमर्थं दण्डं विदध्यादित्याह स एव—'दण्डो दमनादित्याहुस्तेनादान्तान् दमयेत्' इति। यावति पीडाविशेषे दमनकार्योपशमस्तावत्पीडाकरं कुर्यादित्यर्थः। तथाच मनुः—

अनुबन्धं परिज्ञाय देशकालौ च तत्त्वतः।
सारापराधावालोच्य दण्डं दण्ड्येषु पातयेत्॥

याज्ञवल्क्योपि—

ज्ञात्वाऽपराधं देशं च कालं बलमथापि वा ।
वयः कर्म च वित्तं च दण्डं दण्ड्येषु पातयेत् ॥

तत्रोदाहरणमाह मनुः—

कार्षापणं भवेद्दण्ड्यो यत्रान्यः प्राकृतो जनः ।
तत्र राज्ञो भवेद्दण्डः सहस्रमिति धारणा ॥

प्राकृतो दरिद्रः । राजा ऐश्वर्येणाधिष्ठितः । कात्यायनोऽपि—

येन दोषेण शूद्रस्य दण्डो भवति धर्मतः ।
तेन चेत् क्षत्रविप्राणां द्विगुणो द्विगुणो भवेत् ॥
प्रव्रज्यावसितं शूद्रं जपहोमपरायणम् ।
वधेन शासयेत्पापं दण्ड्यो वा द्विगुणं दमम् ॥

बृहस्पतिरपि—

वधार्हस्सुवर्णशतं दमं दाप्यस्तु पूरुषः ।
अङ्गच्छेदार्हकस्त्वर्धं संदंशार्हस्तदर्धकम् ॥
ताडनं बन्धनं चैव तथैव च विडम्बनम् ।
एष दण्डो हि दासस्य नार्थदण्डो बृहस्पतिः ॥

नारदोऽपि—

काकण्यादिस्तु यो दण्डः स तु माषपरः स्मृतः ।
माषावरार्धो यः प्रोक्तः कार्षापणपरस्तु सः ॥
कार्षापणावरार्धस्तु चतुष्कार्षापणोत्तरः ।
द्व्यवरोऽष्टपरश्चान्यस्त्र्यवरो द्वादशान्ततः ॥

कार्षापणास्तु ये प्रोक्तास्सर्वे ते स्युश्चतुर्गुणाः ।

इति । काकण्यादिशब्दार्था दिव्यप्रकरणे दर्शिताः । अत्र कात्यायनः—

कल्पितो यस्य यो दण्डस्त्वपराधस्य यत्नतः ।
पणानां ग्रहणं तु स्यात्तन्मूल्यं वाऽथ राजनि ॥
माषपादो द्विपादो वा दण्डो यत्र प्रवर्तितः ।
अनिर्दिष्टं तु विज्ञेयं माषकं तु प्रकल्पयेत् ॥
यत्रोक्तो माषैर्दण्डो राजतं तत्र निर्दिशेत् ।
कृष्णलैश्चोक्तमेव स्यादुक्तदण्डविनिश्चयः ॥

इति । पणानां कार्षापणानामित्यर्थः । तेषां सङ्ख्याभेदनिन्धनाः पारिभाषिक्यः संज्ञा मनुना दर्शिताः—

पणानां द्वे शते सार्धे प्रथमः साहसस्स्मृतः ।
मध्यमः पञ्च विज्ञेयः सहस्रं चैव चोत्तमः ॥

इयं परिभाषा प्रथमापराधविषयेऽनुवर्तव्या । पुनःपुनरपराधविषये त्वाह याज्ञवल्क्यः—

साशीतिपणसाहस्रो दण्ड उत्तमसाहसः ।
तदर्धं मध्यमः प्रोक्तस्तदर्धमधमस्स्मृतः ॥

अतो यत्रयत्रोत्तमसाहसादिशब्दैर्दण्डो निगद्यते तत्र तत्र एतत्सङ्ख्याकाः कार्षापणास्तन्मूल्यनिष्कादयो वा ग्रहीतव्याः । एवमुक्तप्रकारो दण्डः सर्वलोकानन्दहेतुरित्याह स एव—

यथाशास्त्रं प्रयुक्तस्सन् सदेवासुरमानवम् ।
जगदानन्दयेत्सर्वमन्यथा तत्प्रकोपयेत् ॥

तथोच्छास्त्रदण्डनस्य निन्दां विपरीतस्य प्रशंसां चाह स एव—

अधर्मदण्डनं स्वर्गकीर्तिलोकविनाशनम् ।
सम्यक्तु दण्डनं राज्ञः स्वर्गकीर्तिजयावहम् ॥

दण्ड्यास्तु तेन दण्डेन क्षीणपापा भवन्तीत्याह नारदः—

राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवाः ।
निर्मलाः स्वर्गमायान्ति सन्तस्सुकृतिनो यथा ॥

कात्यायनोपि—

शुद्धिस्तु शास्त्रतत्त्वज्ञैश्चिकित्सा समुदाहृता ।
प्रायश्चित्तं च दण्डं च ताभ्यां सा द्विविधा स्मृता ॥

इति स्मृतिचन्द्रिकायां दण्डविषयाणि ॥

अथ पुनर्न्यायः.

तत्र नारदः—

स्त्रीषु रात्रौ बहिर्ग्रामादन्तर्वेश्मन्यरातिषु ।
व्यवहारः कृतोप्येषः पुनः कर्तव्यतामियात् ॥

स्त्रीभिश्शत्रुभिर्वा रहसि वा निर्णीतो व्यवहारोऽज्ञानपक्षपातयोस्सम्भवात् पुनर्विचारणीय इत्यर्थः । एवं बलात्कारेण रागद्वेषाद्युपाधिना वा निर्णीतं निवर्त्य व्यवहारान्तरं प्रवर्तनीयम् । तथाच याज्ञवल्क्यः—

बलोपाधिविनिर्वृत्तान्व्यवहारान्निवर्तयेत् ॥

इति । ततः पश्चाद्व्यवहारान्तरं प्रवर्तयेदित्यभिप्रायः । तथा व्यवहर्तृवैगुण्येऽप्येवं कार्यमित्याह स एव—

मत्तोन्मत्तार्तव्यसनिबालभीतादियोजितः ।
असन्दिग्धकृतश्चैव व्यवहारो न सिध्यति ॥

आदिशब्देन वृद्धयोजितादयो व्यवहारा गृह्यन्ते । अत एव मनुः—

मत्तोन्मत्तार्ताद्यधीनैः बालेन स्थविरेण वा ।
असम्बन्धकृतश्चैव व्यवहारो न सिध्यति ॥

असम्बन्धः अर्थिप्रत्यर्थिसंबन्धरहितः । नारदोपि—

पुरराष्ट्रविरुद्धश्च यश्च राज्ञा विवर्जितः ।
अनादेयो भवेद्वादः धर्मविद्भिरुदाहृतः ॥

हारीतोपि—

राज्ञा विवर्जितो यस्तु स्वयं पौरविरोधकृत् ।
राष्ट्रस्य वा समस्तस्य प्रकृतीनां तथैव च ॥
अन्ये वा ये पुरे ग्रामे महाजनविरोधकाः ।
अनादेयास्तु ते सर्वे व्यवहाराः प्रकीर्तिताः ॥

एवंचैवंविधव्यहारं तीरितमप्यनुशिष्टमपि निवृत्य व्यवहारान्तरं कर्तव्यमिति तात्पर्यार्थोऽनुसन्धेयः । तीरितानुशिष्टयोर्भेदमाह कात्यायनः—

असत्सदिति यः पक्षस्सभ्यैरेवावधार्यते ।

तीरितः सोऽनुशिष्टस्तु साक्षिवाक्यात् प्रकीर्तितः ॥

साक्षिवाक्यादवधारितोऽनुशिष्ट इत्यर्थः । यत्पुनर्मनुनोक्तं—

तीरितं चानुशिष्टं च यत्र क्वचन यद्भवेत् ।

कृतं तद्धर्मयोर्विद्यात् न तद्भूयो निवर्तयेत् ॥

इति, तत् स्त्रीकृतत्वादिनिवृत्तिहेत्वभावविषय एवोत्सर्गमात्रमिति मन्तव्यम् । अत एव तस्यापवादमाह बृहस्पतिः—

कुलादिभिर्निश्चितेऽपि न संतोषं गतस्तु यः ।

विचार्य तत्कृतं राजा कुकृतं पुनरुद्धरेत् ॥

विहितनिर्णेतृनिर्णीतेऽपि व्यवहारसमाप्तिरन्यायेनेति यदि विवादी मन्यते तदाऽपि पुनर्न्यायः कार्य इत्यर्थः । कुकृतत्वे सिद्धे प्राङ्न्यायद्रष्टॄणां दण्डमाह नारदः—

दुर्दृष्टे व्यवहारे तु सभ्यास्ते दण्डमाप्नुयुः ।

न हि जातु विना दण्डात् कश्चिन्मार्गेऽवतिष्ठते ॥

अयं च सभ्यानामेव दण्डः जेतुः दुर्दर्शनाप्रयोजकत्वे वेदितव्यः । प्रयोजकत्वे तत्रास्यापि दण्डः, तथा च बृहस्पतिः—

निश्चित्य बहुभिस्सार्धं ब्राह्मणैश्शास्त्रपारगैः ।

दण्डयेज्जयिना सार्कं पूर्वं सभ्यांस्तु दोषिणः ॥

जयिना सार्कं दण्डनमपि सभ्यदण्डप्रकरणोक्तविधिनैवेत्याह याज्ञवल्क्यः—

दुर्दृष्टांस्तु पुनर्दृष्ट्वा व्यवहारान्नृपेण तु ।
सभ्यास्सजयिनो दण्ड्या विवादाद्द्विगुणं दमम् ॥

दुर्दृष्टान् सजयिसभ्यदोषेणेत्यर्थः । यदा तु साक्षिदोषेण व्यवहारस्य दुष्टता, तदा साक्षिदण्डप्रकरणोक्तविधिना साक्षिण एव दण्ड्या न जयी नापि सभ्याः । यदा पुनः सजयिसाक्षिदोषेण, तदा त एव दण्ड्याः, न सभ्या इत्यभिप्रायः । एवमसन्तोषमात्रेण पुनर्न्यायः प्रकृतस्य निर्णयस्य न्यायाभासत्वे सति विधातव्यः । सम्यङ्न्यायत्वे नारद आह—

तीरितं चानुशिष्टं च यो मन्येत विधर्मतः ।
द्विगुणं दण्डमास्थाय तत्कार्यं पुनरुद्धरेत् ॥

विधर्मतः धर्मशास्त्रविरोधतो जातमिति यो विवादी सम्याङ्निर्णीतमप्यौद्धत्यात् मन्यत इत्यर्थः । अत्र व्यवहारसमाप्तेरन्यथात्वासम्भवात् पुनर्न्यायानन्तरमपि प्राङ्न्यायपराजित एवाङ्गीकृतदण्डेन दण्ड्य इत्याह याज्ञवल्क्यः—

यो मन्येताजितोऽस्मीति न्यायेनापि पराजितः ।
तमायान्तं पुनर्जित्वा दापयेत् द्विगुणं दमम् ॥

एवं सदण्डः पुनर्न्यायः सनृपोत्तरसभायामेव, नृपस्यैव दण्डनेऽधिकारात् । नृपरहितायां तूत्तरसभायां दण्डविरहितः पुनर्न्यायः कार्यः दण्डांशस्य नृपैककार्यत्वात् । उत्तरसभयाच पूर्वसभातो ज्यायस्या भवितव्यं, अन्यथा सन्देहानिवृत्तेः । सभ्यानां च ज्या-

यस्त्वतारतम्यं निर्णेतृनिर्णयप्रकरणे दर्शितम्। नृपसभादृष्टस्य कुदृष्टत्वशङ्कायां तु प्रकृष्टनृपान्तरसभायां पुनर्न्यायः, तथाच स्मृत्यन्तरम्—

न्यायापेतं यदन्येन राज्ञाऽज्ञानकृतं भवेत्।
तदप्यन्यायविहितं पुनर्न्याये निवेशयेत्॥

यत्पुनः पितामहेनोक्तं—

ग्रामे दृष्टः पुरं यायात्पुरे दृष्टस्तु राजनि।
राज्ञा दृष्टः कुदृष्टो वा नास्ति तस्य पुनर्नयः॥

इति, तत्पूर्वसभातः प्रकृष्टसभान्तरालाभविषयम्। स्ववाक्यजितस्य तु प्रकृष्टसभान्तरसद्भावेऽपि न पुनर्न्याय इत्याह नारदः—

साक्षिसभ्यावसन्नानां दूषणे दर्शनं पुनः।
स्ववाचैव जितानां तु नोक्तः पौनर्भवो विधिः॥

साक्षिवाक्यात्सभ्यैरेव कृताद्वा निर्णयात् पराजितानां व्यवहारस्य पुनर्दर्शनं पूर्वदर्शनस्य दूषणे सतीत्यर्थः। सभ्यग्रहणममात्यादेरुपलक्षणार्थम्। अत एव मनुः—

अमात्यः प्राड्विवाको वा यः कुर्यात्कार्यमन्यथा।
तत्स्वयं नृपतिः कुर्यात्तं सहस्रं च दण्डयेत्॥ इति॥

इति स्मृतिचन्द्रिकायां पुनर्न्यायः

———

अथ कृतनिवर्तनम्

तत्र मनुः—

योगाधमनविक्रीतं योगदानप्रतिग्रहम् ।
यत्र वाऽप्युपधिं पश्येत्तत्सर्वं विनिवर्तयेत् ॥

योगः परकीयधनस्यात्मीयत्वापादकहेत्वभावेऽपि याचितकादिना हस्तगतत्वादिसम्बन्धः । अधमनं बन्धकरणम्, योगेनाधमनम् । एवं योगविक्रीतादावपि विग्रहः । यमोपि—

बलाद्दत्तं बलाद्भुक्तं बलाद्यच्चापि लेखितम् ।
सर्वान् बलकृतानर्थान्निवर्त्यानाह वै मनुः ॥

कात्यायनोऽपि—

उन्मत्तेनैव मत्तेन तथा भावान्तरेण वा ।
यद्दत्तं यत्कृतं वाऽथ प्रमाणं नैव तद्भवेत् ॥

नारदोपि—

यद्बालः कुरुते कार्यमस्वतन्त्रस्तथैव च ।
अकृतं तदिति प्राहुः शास्त्रे शास्त्रविदो जनाः ॥

बालास्वतन्त्रावपि तेन निरूपितौ—

गर्भस्थैस्सदृशो ज्ञेय आऽष्टमाद्वत्सराच्छिशुः ।
बाल आषोडशाद्वर्षात् पौगण्डश्चापि शब्द्यते ॥
परतो व्यवहारज्ञस्स्वतन्त्रः पितरं विना ॥

इति । अनेन पितृमानस्वतन्त्र इत्यर्थादुक्तम् । उक्तंच शङ्खलिखि-

ताभ्यां—'अस्वतन्त्राः पितृमन्तः' इति । पितृग्रहणं मातुरपि प्रदर्शनार्थम् । अत एव नारदः—

जीवतोर्न स्वतन्त्रः स्याज्जरयाऽपि समन्वितः ।

इति । जीवतोर्मातापित्रोरिति शेषः ।

तयोरपि पिता श्रेयान् बीजप्राधान्यदर्शनात् ।
अभावे बीजिनो माता तदभावे तु पूर्वजः ॥

इति तेनैवानन्तरमुक्तत्वात् । अनेन ज्येष्ठवानप्यस्वतन्त्र इत्युक्तम् । न केवलं पितृमातृज्येष्ठवानेवास्वतन्त्र इत्याह स एव—

अस्वतन्त्राः स्त्रियः पुत्रा दासा ये च परिग्रहाः ॥

इति । परिग्रहा उपजीविनः । कार्यविशेषेषु स्त्रीणामस्वातन्त्र्यमित्याह हारीतः—

दानार्थे वा धनार्थे वा धर्मार्थे वा विशेषतः ।
आदाने वा विसर्गे वा न स्त्री स्वातन्त्र्यमर्हति ॥

अन्यानप्यस्वतन्त्रानाह नारदः—

अस्वतन्त्राः प्रजास्सर्वाः स्वतन्त्रः पृथिवीपतिः ।
अस्वतन्त्रः स्मृतश्शिष्यः आचार्ये तु स्वतन्त्रता ॥

अत्र स्वतन्त्रनिरूपणं चास्वतन्त्रकृतं कार्यं तेनैव निवर्तनीयमिति दर्शयितुम् । अत एव कात्यायनः—

अस्वतन्त्रकृतं कार्यं तस्य स्वामी निवर्तयेत् ।
न भर्त्रा विवदेतान्यो भीतोन्मत्तकृताद्दते ॥

भीतोन्मत्तादिकृतनिवर्तने राज्ञ एवाधिकारात् भीतोन्मत्तादि-

स्वामिना कृतनिवर्तकेन सहान्यस्य विवादो नात्यन्तानुचित इत्यभिप्रायः । अस्वतन्त्रकृतनिवर्तनस्य क्वचिदपवादमाह नारदः—

एतान्येव प्रमाणानि भर्ता यद्यनुमन्यते ।
पुत्रः पत्युरभावे वा जाया वा पतिपुत्रयोः ॥
तथा दासकृतं कार्यमकृतं परिचक्षते ।
अन्यत्र स्वामिसन्देशान्न दासः प्रभुरात्मनः ॥
पुत्रेण च कृतं कार्यं यत्स्यादच्छन्दतः पितुः ।
तदप्यकृतमेवाहुः दासः पुत्रश्च तौ समौ ॥

इति । अस्वतन्त्रकृतनिवर्तनं स्वतन्त्रानुमत्यभावविषये कार्यमित्यर्थः । कात्यायनोपि—

न क्षेत्रगृहदासानां दानाधमनविक्रयाः ।
अस्वतन्त्रकृतास्सिद्धिं प्राप्नुयुर्नानुवर्णिताः ॥

अनुवर्णितास्तु सिद्धिं प्राप्नुवन्तीत्याह स एव—

प्रमाणं सर्व एवैते पण्यानां क्रयविक्रये ।
यदि संव्यवहारं ते कुर्वन्तोप्यनुमोदिताः ॥

एवं क्षेत्रादीनां क्रयादिकरणे स्वतन्त्रेण नियुक्ताः भ्रात्रादयोऽस्वतन्त्राः प्रमाणं स्युरित्याह स एव—

क्षेत्रादीनां तथैव स्युः भ्राता भ्रातृसुतस्सुतः ।
निसृष्टाः कृत्यकरणे गुरुणा यदि गच्छता ॥

निसृष्टाः नियुक्ता इत्यर्थः । तथाच बृहस्पतिः—

यस्स्वामिना नियुक्तस्तु धनायव्ययपालने ।
कुसीदकृषिवाणिज्ये निसृष्टार्थस्तु स स्मृतः ॥
प्रमाणं तत्कृतं सर्वं लाभालाभव्ययोदयम् ।
स्वदेशे वा विदेशे वा स्वामी तं न विसंवदेत् ॥

इति । कात्यायनोऽपि निसृष्टार्थकृतं कार्यं न स्वामी परिवर्तयितु-मर्हतीत्याह—

निसृष्टार्थस्तु यो यस्मिन् तस्मिन्नर्थे प्रभुस्तु सः ।
तद्भर्ता तत्कृतं कार्यं नान्यथा कर्तुमर्हति ॥

एवमनुमतिनियुक्तयोरभावेऽपि कुटुम्बभरणार्थमस्वतन्त्रकृतं स्व-तन्त्रो नान्यथाकर्तुमर्हतीत्याह मनुः—

कुटुम्बार्थे त्वधीनोऽपि व्यवहारं समाचरेत् ।
स्वदेशे वा विदेशे वा तन्न्यायान्न विचालयेत् ॥

एवमापत्प्रतीकारार्थेऽपि द्रष्टव्यम् । तथाच नारदः—

स्त्रीकृतान्यप्रमाणानि कार्याण्याहुरनापदि ।

स्त्रीग्रहणमस्वतन्त्रोपलक्षणार्थम् । एवंचापद्यस्वतन्त्रकृतान्यपि प्र-माणानीत्यार्थिकोऽर्थः प्रत्येतव्यः । अत्रापवादप्रदर्शनार्थमाह स एव—

विशेषतो गृहक्षेत्रदानाधमनविक्रयाः ।

इति । गृहक्षेत्रयोर्दानाधमनविक्रयास्त्वापद्यप्यस्वतन्त्रकृता न सि-ध्यन्तीत्यर्थः । एवं तद्भाष्ये व्याख्यातम् । तथा स्वतन्त्रेणा-प्यस्वतन्त्रकल्पेन कृतं कार्यं न सिध्यतीत्याह नारदः—

स्वतन्त्रोऽपि हि यत्कार्यं कुर्यादप्रकृतिं गतः ।
तदप्यकृतमेवाहुरस्वतन्त्वत्वहेतुतः ॥

स्वतन्त्राश्च तेनैव निरूपिताः—

त्रयः स्वतन्त्रा लोकेऽस्मिन् राजाऽऽचार्यस्तथैव च ।
प्रतिप्रति च[1] सर्वेषां वर्णानां स्वगृहे गृही ॥
स्वातन्त्र्यं तु स्मृतं ज्येष्ठे ज्यैष्ठ्यं गुणवयःकृतम् ।

इति । गृहीति वदन् गृहिण्याः स्वतन्त्रता नास्तीति दर्शयति । तेन यद्यपि मातृमतोऽस्वतन्त्रतोक्ता, तथाऽपि मातुस्स्वतन्त्रताऽवगन्तव्या । अत एवाभर्तृकया कृतस्य कार्यस्य पुत्राद्यनुमत्यैव सिद्धिरुक्ता । 'प्रकृतिं गतः' इत्यस्याप्यर्थस्तेनैव दर्शितः—

कामक्रोधाभिभूतार्ता भयव्यसनपीडिताः ।
रागद्वेषपरीताश्च ज्ञेयास्त्वप्रकृतिं गताः ॥

एवंच स्वतन्त्रप्रकृतिस्थकृतं कार्यं सिध्यति, न त्वप्रकृतिस्थस्वतन्त्रकृतमित्याह स एव—

कुले ज्येष्ठस्तथा श्रेष्ठः प्रकृतिस्थश्च यो भवेत् ।
तत्कृतं स्यात् कृतं कार्यं नास्वतन्त्रकृतं क्वचित् ॥

स्वतन्त्रप्रकृतिस्थकृतमपि पुत्रविक्रयादि कार्यं न सिध्यति, तत्र तस्यास्वतन्त्रत्वादित्याह कात्यायनः—

सुतस्य सुतदाराणां वशित्वं त्वनुशासने ।
विक्रये चैव दाने च वशित्वं न सुते पितुः ॥

---

[1] प्रकृतिस्थश्च, इति पाठान्तरम्.

अतस्सुतविक्रयादि कार्यं स्वतन्त्रप्रकृतिस्थकृतमपि निवर्तनीय-मित्यभिप्रायः । एकपुत्रविषयमेतदिति दत्ताप्रदानिकाख्यपदे वक्ष्यामः । एवमनेकवारकृतैकर्तृकैककर्मकविक्रयादावपि पुनर्विक्रयादिर्वशित्वाभावान्न सिध्यतीत्याह याज्ञवल्क्यः—

सर्वेष्वर्थविवादेषु बलवत्युत्तरा क्रिया ।
आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा ॥

इति । तेनोत्तरादिक्रिया निवर्तनीयेत्यभिप्रायः ॥

इति स्मृतिचन्द्रिकायां कृतनिवर्तनम्.

अथ बालादिधनविषयाणि कानिचिद्वचनानि लिख्यन्ते.

तत्र मनुः—

बालदायादकं रिक्थं तावद्राजाऽनुपालयेत् ।
यावत् स्यात् स समावृत्तो यावद्वाऽतीतशैशवः ॥

बालदायादकं बालस्वामिकं रिक्थं द्रव्यम् । अविद्यमानाप्तपुरुष-विषयमेतत् । बालग्रहणं स्वधनरक्षणासमर्थोपलक्षणार्थमिति स्पष्टयितुमाह स एव—

वशाऽपुत्रासु चैवं स्यात् रक्षणं निष्कुलासु च ।
पतिव्रतासु च स्त्रीषु विधवास्वातुरासु च ॥

वशा वन्ध्या । अपुत्रा अविद्यमानपुत्रा । निष्कुला स्वपक्षहीना । वशाप्रभृतीनां धनं येऽपहरन्ति तेषां दण्डमाह स एव—

जीवन्तीनां तु तासां ये तद्धरेयुस्स्वबान्धवाः ।
ताञ्छिष्याच्चोरदण्डेन धार्मिकः पृथिवीपतिः ॥

रक्षणसमर्थस्यापि धनं तत्स्थानापरिज्ञानादिना स्वाम्यनुपात्तमन्येन तूपादाय राज्ञे विज्ञापितं जनसमूहेषु विख्याप्य राज्ञा रक्ष्यमित्याह गौतमः—

'प्रणष्टमस्वामिकमधिगम्य राज्ञे प्रब्रूयुः । विख्याप्य संवत्सरं राज्ञा रक्ष्यम्' इति । यत्तूक्तं मनुना—

प्रणष्टस्वामिकं रिक्थं राजा त्र्यब्दं निधापयेत् ॥

इति, तदत्यन्तदूरदेशे स्वामिस्थितिसम्भावनाविषयम् । निधापनं च स्वधनामिश्रभावेन राज्ञा कार्यं, तथा च स एव—

प्रणष्टाधिगतं द्रव्यं तिष्ठेद्युक्तैराधिष्ठितम् ।
ये तत्र चोरा गृह्णीयुः तान् राजेभेन घातयेत् ॥

स्वामिनं प्रति प्रणष्टमन्येन च लब्धं प्रणष्टाधिगतम् । इभेन हास्तिना । प्रणाष्टाधिगतस्य द्रव्यस्य प्रत्यर्पणमाह याज्ञवल्क्यः—

प्रणष्टाधिगतं देयं नृपेण धनिने धनम् ॥

इति । धनी च तद्धनं स्वामित्वमुद्भाव्य गृह्णीयात् । तथाच मनुः—

ममेदमिति यो ब्रूयात् सोऽनुयोज्यो यथाविधि ।
संवाद्य रूपसङ्ख्यादीन् स्वामी तद्द्रव्यमर्हति ॥

यो ममेदमिति ब्रूयात् स तस्य स्वामित्वज्ञानाय राजपुरुषैः कस्मिन् देशे कास्मिन् काले कीदृग्वर्णं कीदृशसंस्थानं किंसङ्ख्याकं

किंपरिमाणकं प्रणष्टमिति पृष्टो यादृशं प्रणष्टस्य संस्थानादिकं तादृशमेव वदन् तद्द्रव्यं ग्रहीतुमर्हतीत्यर्थः । विसंवादे त्वस्वामित्वात् ग्रहीतुं नार्हतीत्यभिप्रायः । प्रत्युत परद्रव्यापहारे प्रवृत्तत्वात् दण्डमर्हतीत्याह स एव—

अवेदयानो नष्टस्य देशं कालं च तत्त्वतः ।
वर्णं रूपं प्रमाणं च तत्समं दण्डमर्हति ॥

तत्त्वतः अवेदयानो विसंवादं कुर्वाणः तत्समं प्रणष्टाधिगतसमम् । प्रणष्टाधिगतं संवत्सरादर्वागेव ग्रहीतुमर्हतीत्याह याज्ञवल्क्यः—

शौल्किकैः स्थानपालैर्वा नष्टापहृतमाहृतम् ।
अर्वाक्संवत्सरात् स्वामी हरेत परतो नृपः ॥

अत्यन्तदूरदेशस्थस्वामिविषये तु मनुराह—

अर्वाक् त्र्यब्दाद्धरेत्स्वामी परतो नृपतिर्हरेत् ।

इति । ननु नृपतिर्हरेदित्येतत् परद्रव्यापहारप्रतिषेधकशास्त्रविरुद्धं, सत्यं—अत एवास्य पृथङ्निहितस्थानात् नृपतिः स्वधनस्थानमाहरेदित्यर्थोऽवगन्तव्यः । एवञ्चावधिमतिक्रम्यागतायापि स्वामिने रूपसङ्ख्यादिभिर्भावितं प्रणष्टाधिगतं देयमेव । किंतु ततः किंचिद्द्रव्यमवध्यतिक्रमापराधात् नृपो गृह्णीयात् । तथाच स एव—

आददीताथ षड्भागं प्रणष्टाधिगतात् नृपः ।
दशमं द्वादशं वाऽपि सतां धर्ममनुस्मरन् ॥

अथैत्यतिक्रान्तावधेः स्वामिनस्समागमनानन्तर्यमुच्यते। समागमस्यात्यन्तविलम्बे षष्ठो भागः । अतिविलम्बे तु दशमो भागः विलम्बाभावे तु द्वादशो भाग इति व्यवस्था मन्तव्या। यत्तु गौतमेनोक्तं—'ऊर्ध्वमधिगन्तुश्चतुर्थः राज्ञश्शेषः' इति, तदतिक्रान्तावधिकस्य स्वामिनो नाशनिश्चयविषये द्रष्टव्यम् । स्वामिनि ध्रियमाणे त्वधिगन्तुः नृपभागचतुर्थांशो भवतीत्यस्मादेव वचनात् गम्यते । यत्तु याज्ञवल्क्येनोक्तम्—

पणानेकशफे दद्यात् चतुरः पञ्च मानुषे ।
महिषेऽष्ट गवां द्वौ द्वौ पादं पादमजाविके ॥

इति । तदेकशफादौ विशेषशास्त्रं मनूक्तषड्भागाद्यादानविधेर्बाधकमिति कैश्चिद्व्याख्यातृभिरुक्तम् । अन्यैस्त्वेकशफादावधिगन्त्रे देयं निरूपयितुं तदित्युक्तम् । प्रणष्टाधिगतनिधिहरणमधिकृत्य विशेषमाह मनुः—

ममायमिति यो ब्रूयान्निधिं सत्येन मानवः ।
तस्याददीत षड्भागं राजा द्वादशमेव वा ॥
अनृतं तु वदन्दण्ड्यस्स वित्तस्यांशमष्टमम् ॥

इति । ममायं, यतो मया मत्पुरुषैर्वा निहित इति सत्येन रूपसङ्ख्यासंवादादिप्रमाणेन ज्ञापयेदित्यर्थः । स्वामिनो निर्गुणत्वे

षड्भागमाददीत । सगुणत्वे तु द्वादशभागमिति व्यवस्थाऽत्र मन्तव्या । तथा निधिस्वामिनो विद्वद्ब्राह्मणत्वे तु तेन राज्ञे न किंचिदपि दातव्यमित्याह स एव—

विद्वांस्तु ब्राह्मणो दृष्ट्वा पूर्वोपनिहितं निधिम् ।
अशेषतोप्याददीत सर्वस्याधिपतिर्हि सः ॥

पूर्वोपनिहितं स्वपित्रादिभिरुपनिहितम् । विद्वद्ग्रहणं षट्कर्मिणोप्युपलक्षणार्थम् । अत एव वसिष्ठः—'ब्राह्मणश्चेदधिगच्छेत् षट्कर्मसु वर्तमानस्सर्वं हरेत्' इति । षट्कर्मसु यजनादिष्वित्यर्थः । यत्पुनर्मनुनोक्तम्—

निधीनां हि पुराणानां धातूनामेव च क्षितौ ।
अर्धभाग्रक्षणाद्राजा भूमेरधिपतिर्हि सः ॥

इति, तत् उक्तलक्षणब्राह्मणाधिगतास्मर्यमाणस्वामिकनिधिविषयं, पुराणानामित्यभिधानात् । यत्तु वसिष्ठेनोक्तम्—'अप्रज्ञायमानं वित्तं योऽधिगच्छेद्राजा तद्धरेदधिगन्त्रे षष्ठमंशं प्रदाय' इति, तदुक्तलक्षणरहिताधिगन्तृविषयम् । अत एव याज्ञवल्क्यः—

इतरेण निधौ लब्धे राजा षष्ठांशमाप्नुयात् ।
अनिवेदितविज्ञातो दाप्यस्तद्दण्डमेव च ॥

विद्याषट्कर्मसम्पन्नब्राह्मणादितरस्मै निध्यधिगन्त्रे दातुं राजा षष्ठांशमधिगतनिधिसकाशादाहरेदिति पूर्वार्धस्यार्थः । अधिगतनिधिवञ्चकात्तं निधिं सर्वं शक्त्यपेक्षया दण्डं च राजा गृह्णीयादित्युत्तरार्धस्यार्थः । राज्ञ एवाधिगन्तृत्वे मनुराह—

यत्र पश्येन्निधिं राजा पुराणं निहितं क्षितौ ।
तस्मात् द्विजेभ्यो दत्वाऽर्धं शेषं कोशे निवेशयेत् ॥

स्वकीयनिधेरधिगमे तु सर्वं कोशे निवेशयेत् । 'निध्यधिगमो राजधनम्' इति गौतमस्मरणात् । चोरहृतं धनं प्रति तेनोक्तं— 'चोरहृतमपजित्य यथास्थानं गमयेत्, कोशाद्वा दद्यात्' इति । प्रथमपक्षकरणासमर्थविषये द्वितीयः पक्षः । यथाऽऽह व्यासः—

प्रत्याहर्तुमशक्तस्तु धनं चोरैर्हृतं यदि ।
स्वकोशात्तद्धि देयं स्यात् अशक्तेन महीक्षिता ॥ इति ॥

इति स्मृतिचन्द्रिकायां बालादिधनविषयाणि.

श्रीकेशवादित्यसमुद्भवस्य देवस्य शान्तद्विजराजमूर्तेः ।
सच्चन्द्रिकां प्राप्य सुखेन लोकाः कुर्वन्तु सर्वं व्यवहारकर्म ॥

इति सकलविद्याविशारद श्रीकेशवादित्यभट्टोपाध्यायसूनु याज्ञिक देवणभट्टोपाध्याय सोमयाजिविरचितायां स्मृतिचन्द्रिकायां व्यवहारकाण्डे प्रथमः परिच्छेदः

अत्रेयं प्रकरणानुपूर्वी

व्यवहारस्वरूपनिरूपणम् । अष्टादशपदनिरूपणम् । व्यवहारभेदः । निर्णेतृनिर्णयः । धर्मस्थानेऽवस्थानम् । व्यवहारदर्शनविधिः । आसेधविधिः । व्यवहारदर्शनोपक्रमः । प्रतिज्ञापादः । उत्तरपादः । विवादविषयाणि । प्रत्याकलितपादः । क्रियापादः । लेख्यनिरूपणम् । लेख्यपरीक्षा । भुक्तिनिरूपणम् । साक्षिलक्षणानि । साक्षिभेदाः । असाक्षिभेदाः । साक्ष्युद्भावनम् । साक्षिपरीक्षा । साक्ष्यनुयोजनविधिः । साक्ष्यप्रश्नविधिः । साक्षिवादविधिः । साक्षिवचोविषयाणि । साक्षिविषयाणि । असाक्षिप्रत्ययाः । दिव्यनिरूपणम् । अभियोगाल्पत्वमहत्त्वज्ञानोपयोगीनि । धनपरिमाणतो दिव्यव्यवस्था । विवादिजात्यादितो दिव्यव्यवस्था । ऋतुतो दिव्यव्यवस्था । दिव्यदेशाः । घटनिर्माणविधिः । सर्वदिव्यसाधारणविधिः । घटारोपणविधिः । अग्निविधिः । कोशविधिः । तण्डुलविधिः । तप्तमाषविधिः । फालविधिः । धर्मजदिव्यविधिः । निर्णयादिक्रमम् । दण्डविषयाणि । पुनर्न्यायः । कृतनिवर्तनम् । बालादिधनविषयाणि । इति ॥ ४७ ॥

॥ व्यवहारकाण्डे प्रथमपरिच्छेदे प्रकरणानुपूर्वी ॥